Government Oriental Library Series

Edited by the Pandits under the Supervision of the Curator,
Government Oriental Library, Mysore.

Bibliotheca Sanskrita No. 43

स्मृतिचन्द्रिका

श्रीयाज्ञिकदेवणभट्टोपाध्यायरचिता

संस्कारकाण्डः प्रथमः

SMRITICHANDRIKA

BY
DEVANA-BHATTA

EDITED BY
L. SRINIVASACHARYA
Pandit, Govt. Oriental Library, Mysore

I. SAMSKARA KANDA

PUBLISHED UNDER THE AUTHORITY OF THE
GOVERNMENT OF HIS HIGHNESS THE
MAHARAJA OF MYSORE

MYSORE:
PRINTED AT THE GOVERNMENT BRANCH PRESS
1914

Rs. 1—8—0

Government Oriental Library Series

EDITED BY PANDITS UNDER THE SUPERVISION OF THE CURATOR, GOVT. ORIENTAL LIBRARY, MYSORE

Bibliotheca Sanskrita No. 43

स्मृतिचन्द्रिका

श्रीयाज्ञिकदेवणभट्टोपाध्यायरचिता

संस्कारकाण्डः प्रथमः

SMRITICHANDRIKA

BY

DEVANA-BHATTA

EDITED BY

L. SRINIVASACHARYA

Pandit, Govt. Oriental Library, Mysore

I. SAMSKARA KANDA

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF MYSORE

MYSORE:

PRINTED AT THE GOVERNMENT BRANCH PRESS

1914

NOTE

The following manuscripts have been used in preparing this edition :—

(1) A paper manuscript (No. C 21) of the Government Oriental Library, Mysore.

(2) A palm-leaf manuscript belonging to the Melkote Sanskrit College.

(3) A paper manuscript belonging to the Adyar Library.

17-7-14. A.M.S.

स्मृतिचन्द्रिकायां संस्कारकाण्डे
विषयसूचिका

इति संस्कारकाण्डविषयसूचिका.

अशुद्धसंशोधनम्.

पुटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
7	12	भ्रूयुः	ब्रूयुः
15	23	सात्रि	साक्ति
36	14	षारि	पारि
42	6	ऋणवान्	ऋणवा
,,	7	चर्येण	चर्येण
50	18	तदाहः	तद्दहः
59	,,	ददयोः	पदयोः
89	19	मितृतो	पितृतो
97	13	प्रयु	प्रत्यु
104	9	मिमिंति	मिति
128	18	ज्ञानार्थम्	ज्ञानार्थी
165	20	कालावधि	कालावधिः
174	1	भून्वा	भूत्वा
175	15	भवि	भाविष्य
196	4	स्तिव	स्तत्र
210	9	णार्थम्	रणार्थम्
227	19	मौतमोपि	गौतमोपि

श्रीमहागणपतये नमः

याज्ञिक देवणभट्ट विरचिता

स्मृतिचन्द्रिका.

संस्कारकाण्डः.

वागीश्वरीं गणेशं च नत्वा विद्वदनुग्रहात् ।
सर्वलोकहितार्थाय क्रियते स्मृतिचन्द्रिका ॥
स्वाभिप्रायेण हि मया न किञ्चिदिह लिख्यते ।
किन्तु वाचनिकं सर्वं अतो ग्राह्यैव निर्भयैः ॥

प्रमाणसाधनम्.

मन्वादिप्रणीतानामेव धर्मशास्त्राणां वेदमूलत्वादेव तान्येव धर्मे प्रमाणानीति तदधिगमोपयोगितया तच्छास्त्रप्रणेतारः प्रथमं प्रदर्श्यन्ते । तत्र पैठीनसिः—

तेषां मन्वङ्गिरोव्यासगौतमात्र्युशनोयमाः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ॥
विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो गुरुः ।
प्रचेता नारदो योगी बोधायनपितामहौ ॥

सुमन्तुः कश्यपो बभ्रुः पैठीनो व्याघ्र एव च ।
सत्यव्रतो भरद्वाजो गार्ग्यः कार्ष्णाजिनिस्तथा ॥
जाबालिर्जमदग्निश्च लोगाक्षिर्ब्रह्मसम्भवः ।
इति धर्मप्रणेतारः षट्त्रिंशदृषयस्स्मृताः ॥

इति । ननु किमियं परिसङ्ख्या ? मैवम्, तथा सति वत्समरीचिदेवलपारस्करपुलस्त्यपुलहक्रतुऋष्यशृङ्गलिखितच्छागलेयादीनां धर्मशास्त्रप्रणेतृत्वं न स्यात् । न च तथाऽस्त्विति वाच्यम्, तेषामपि वेदमूलस्मृतिशास्त्रप्रणेतृत्वेन मन्वादिभ्योऽविशेषात् । अत एव शङ्खः—

"मनुयमदक्षविष्ण्वङ्गिरोबृहस्पत्युशनआपस्तम्बगौतमसंवर्तात्रेयहारीतकात्यायनशङ्खलिखितपराशरव्यासशातातपप्रचेतोयाज्ञवल्क्यादयः."

इत्यादिग्रहणं कृतवान् । अतः प्रदर्शनार्थमेव परिगणनं न्याय्यम् । अत्राङ्गिराः—

जाबालिर्नाचिकेतश्च स्कन्दो लोगाक्षिकाश्यपौ[1] ।
व्यासस्सनत्कुमारश्च शन्तनुर्जनकस्तथा ॥
व्याघ्रः कात्यायनश्चैव जातूकर्णः कपिञ्जलः ।
बोधायनः कणादश्च विश्वामित्रस्तथैव च ॥
उपस्मृतय इत्येताः प्रवदन्ति मनीषिणः ॥

---

[1] कश्यपौ.—क.

इति । अथ पुराणानि—

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
तथाऽन्यन्नारदीयं च मार्कण्डेयं च सप्तमम् ।
आग्नेयमष्टमं चैव भविष्यं नवमं तथा[1] ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं तथा[1] ।
वाराहं द्वादशं चैव स्कान्दं चैव त्रयोदशम् ।
चतुर्दशं वामनं च कौर्मं पञ्चदशं स्मृतम् ॥
मात्स्यं च गारुडं चैव ब्रह्माण्डं च तथाऽपरम् ॥

वक्त्रनपेक्षत्वेन वेदश्च प्रमाणम् । तन्मूलत्वेन स्मृत्याचारावपि । तन्मूलत्वं च तत्प्रतिपादितार्थाभिधायित्वात् । तथा च भृगुः—

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे ब्रह्म[2]ज्ञानमयो हि सः ॥

इति । शङ्खोऽपि—

'तत्र वेदमूलास्स्मृतयः.'

इति । एतदप्यदृष्टार्थानामेव, न पुनर्दृष्टार्थानाम् । तथा च पुराणम्—

सर्वा एता वेदमूला दृष्टार्थाः परिहृत्य तु ॥

इति । ननु यदि स्मृतिशास्त्रस्य वेदप्रतिपादितार्थपरत्वेन वेदमूलत्वं तर्हि तेनैवालं किं धर्मशास्त्रेणेत्याशङ्क्याह मरीचिः—

---

[1] स्मृतम्.—क. [2] सर्वं.—क.

दुर्बोधा वैदिकाश्शब्दाः प्रकीर्णत्वाच्च ये खिलाः ।
तज्ज्ञैस्त एव स्पष्टार्थाः स्मृतितन्त्रे प्रतिष्ठिताः ॥

इति । एवं पुराणानामपि प्रामाण्यं प्रयोजनवत्त्वं च सिद्धम् । अत एव वेदचतुष्टयं दर्शयित्वाऽऽह श्रुतिः—

'इतिहासपुराणं पञ्चमम्.'

इति । न च श्रुत्यादीनां पौरुषेयत्वादितर्कबलेनाप्रामाण्यं शङ्कनीयं, तस्याप्रतिष्ठितत्वाद्दोषाभिधानाच्च । तथा च मनुः—

योऽवमन्येत ते तूभे हेतुशास्त्राश्रयो द्विजः ।
स साधुभिर्बहिष्कार्यः नास्तिको वेदनिन्दकः ॥

इति । उभे श्रुतिस्मृती । यमोऽपि—

एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा ।
तान्येतानि प्रमाणानि न हन्तव्यानि हेतुभिः ।
यस्तानि हेतुभिर्हन्यात् सोऽन्धे तमसि मज्जति ॥

इति । धर्मशास्त्रग्रहणं पुराणादेरपि प्रदर्शनार्थम् । अत एव विष्णुः—

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥

इति । एवं च गृह्यकाराणामपि प्रामाण्यमविरुद्धम् । तेषामपि मन्वादिप्रणीतस्यैव संस्कारकलापस्य स्वशाखावगतमन्त्रविनियोगद्वारेण प्रयोजकत्वात् । तथा च देवलः—

मन्वादयः प्रयोक्तारो धर्मशास्त्रस्य कीर्तिताः ।
तत्प्रयुक्तप्रयोक्तारो गृह्यकारास्समूचिरे ॥

इति । इति स्मृतिचन्द्रिकायां प्रमाणसाधनम् ॥

धर्मप्रमाणानि.

अथ धर्मप्रमाणानि तत्र याज्ञवल्क्यः—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

इति । पुराणं ब्राह्मादि । न्यायः तर्कः । मीमांसा वेदवाक्यविचारः । धर्मशास्त्रं मन्वादिस्मृतयः । अङ्गैः व्याकरणादिभि युक्ताः चत्वारो वेदाः। एताश्चतुर्दश विद्यानां धर्मज्ञानानां स्थानानि निमित्तानि प्रमाणानि धर्मस्य च विद्याद्वारेण। मनुरपि—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनां आत्मनस्तुष्टिरेव च ॥

इति । अयमर्थः—वेदः धर्ममूलं धर्मे प्रमाणम्, तथा वेदविदां स्मृतिशीले अपि, शीलं रागद्वेषादिवर्जनम् । आचारः कङ्कणबन्धनादिः । आत्मतुष्टिः वैकल्पिकेषु पदार्थेषु यस्मिन् क्रियमाणे आत्मनः प्रीतिः साऽपि प्रमाणमिति । व्यासोऽपि—

धर्ममूलं वेदमाहुः ग्रन्थराशिमकृत्रिमम् ।
तद्विदां स्मृतिशीले च साध्वाचारं मनःप्रियम् ॥

साधवः शिष्टाः । तथा च मनुः—

शिष्टाचारस्मृतिर्वेदास्त्रिविधं धर्मलक्षणम् ।

इति । लक्षणं प्रमाणमित्यर्थः । शिष्टानामपि स्वरूपं स एवाह—

धर्मेणाधिगतो यैस्तु वेदस्सपरिबृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥

इति । इतिहासपुराणान्यङ्गानि च वेदस्य परिबृंहणानि । तथा च बृहस्पतिः—

इतिहासपुराणेभ्यो वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदः मामयं प्रतरिष्यति ॥

श्रुतिः प्रत्यक्षहेतुः धर्माधिगतौ येषां ते तथोक्ताः । ननु यदि वेदविदाचारः प्रमाणं तर्हि इन्द्रचन्द्रादेरहल्यातारादिगमनमपि प्रमाणं स्यात् । न च तथा । अतः कथमाचारप्रामाण्यम्? तदाह गौतमः—

'दृष्टो धर्मव्यतिक्रमः साहसं च (तेषां तेजोविशेषेण प्रत्यवायो न विद्यते.'[1])

इति । साहसं परशुरामादेः मातुः शिरश्छेदादि । उच्यते—सत्यं इन्द्रादीनामहल्यागमनमपि, तथाऽपि तेषां तप-

[1] रेखाद्वयाङ्कितस्थाने 'महताम्' इत्येव मुद्रितपुस्तके पाठः.

स्संजनिततेजोविशेषेण योगिनां प्रत्यवायो न भवति। अस्मदादीनां तदभावेन तत्करणे भवत्येव प्रत्यवायः । तदाह्यापस्तम्बः—

तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ।
तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवर(जोऽबल)ः[1] ॥

इति । मनुरपि—

धर्मव्यतिक्रमो दृष्टो महतां साहसं तथा ।
तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरजोऽबलः ॥

इति । यत्र मनुस्मृत्यादयो न सन्ति तत्र परिषद्वचनं प्रमाणमित्याह मनुः—

अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मस्स्यादशङ्कितः ॥

इति । धर्मेषु धर्मप्रमाणेष्वित्यर्थः । ते च शिष्टाः दशावराः । तदाह गौतमः—

'अनाम्नाते[2] दशावरैः शिष्टैः ऊहवद्भिः अलुब्धैः प्रशस्तं कार्यम्.'

इति । यत्तैः प्रशस्तमित्युक्तं तत्कार्यमित्यर्थः । बोधायनोऽपि—

'तदभावे दशावरा परिषत्.'

---

[1] रेखाद्वयमध्यगतः पाठो न मुद्रितपुस्तके. [2] अनाज्ञाते इति सूत्रपाठः.

इति । तदभावे श्रुत्याद्यभावे । याज्ञवल्क्योऽपि—

चत्वारो वेदधर्मज्ञाः परिषत्त्रैविद्यमेव वा ।
सा ब्रूते यं स धर्मस्स्यादेको वाऽध्यात्मवित्तमः ॥

इति । धर्मः धर्मशास्त्रम् । तिस्रो विद्या येषां ते त्रैविद्याः तेषां समूहः त्रैविद्यम् । ऋगादिवेदत्रयज्ञा धर्मज्ञांश्च त्रयो वा परिषत् इत्यभिप्रायः । तथा च मनुः—

ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च ।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ॥

इति । अध्यात्मवित्तमः अध्यात्मविदां श्रेष्ठो धर्मज्ञश्च स एको वा यमर्थं ब्रूते धर्मतया सोऽपि धर्मस्स्यात् । वसिष्ठोऽपि—

त्रैविद्यवृद्धा यं ब्रूयुः धर्मं धर्मविदो जनाः ।
पतने पातने चैव स धर्मो नात्र संशयः ॥

इति । तदपि श्रुत्यादिवदेव प्रमाणमित्याह यमः—

वेदाः प्रमाणं स्मृतयः प्रमाणं
धर्मार्थयुक्तं वचनं प्रमाणम् ।
यस्य प्रमाणं न भवेत्प्रमाणं
न तस्य कुर्याद्वचनं प्रमाणम् ॥

यस्य श्रुत्यादिकं प्रमाणं न भवति तस्य वाक्यं न प्रमाणम् । अतः तत्परित्याज्यमित्यभिप्रायः । अत एव

प्रचेताः—

अमीमांसा बहिश्शास्त्राः ये चान्ये वेदवर्जिताः ।
यत्ते ब्रूयुः न तत्कुर्यात् वेदाद्धर्मो विधीयते ॥

इति । तथा सम्प्रदायोऽपि क्वचित्प्रमाणमित्याह मनुः—

येनास्य पितरो याताः येन याताः पितामहाः ।
तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यति ॥

स्वकुलपरम्परायात आचारः सम्प्रदायः । सोऽपि शास्त्रविप्रतिपत्तौ द्रष्टव्यः । तथा च सुमन्तुः—

यत्र शास्त्रगतिर्भिन्ना सर्वकर्मसु भारत ।
उदितेऽनुदिते चैव होमभेदो यथा भवेत् ॥
तस्मिन्कुलक्रमायातमाचारं त्वाचरेद्बुधः ।
स गरीयान्महाबाहो सर्वशास्त्रोदितादपि ॥

तथा धर्मज्ञसमयोऽपि प्रमाणमित्याह आपस्तम्बः—

‘धर्मज्ञसमयः प्रमाणं वेदाश्च.’

इति। एतच्च धर्मशास्त्रस्यापि धर्मोपयोगित्वादध्ययने फलश्रवणाच्च तदध्येतव्यमित्याह मनुः—

यथैव वेदाध्ययनं धर्मशास्त्रमिदं तथा ।
अध्येतव्यं ब्राह्मणेन नियतं स्वर्गमिच्छता ॥

यमोऽपि—

धन्यं[1] यशस्यमायुष्यं पुण्यं स्वर्ग्यं तथैव च ।

[1] धर्म्यं—क.

धारणं धर्मशास्त्रस्य वेदानां धारणं तथा ॥
ग्रहणाद्धर्मशास्त्रस्य ब्रह्मलोकमवाप्नुयात् ।

बृहस्पतिरपि—

श्रुतिस्मृती हि विप्राणां चक्षुषी परमे मते ।
काणस्तत्रैकया हीनः द्वाभ्यामन्धः प्रकीर्तितः ॥

अधीत्य चतुरो वेदान् सषडङ्गपदक्रमान् ।
स्मृतिहीना न शोभन्ते चन्द्रहीनेव शर्वरी ॥

इति । मनुरपि—

इदं शास्त्रमधीयानो ब्राह्मणस्संशितव्रतः ।
मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते ॥

इति । अत्र ब्राह्मणग्रहणं द्विजात्युपलक्षणार्थम्, अत एव यमः—

इदं शास्त्रमधीयानो ब्राह्मणः क्षत्रियोऽपि विट् ।
पुनाति हि पितॄन् पूर्वान् सप्त सप्तावरानपि ॥

यत्पुनर्मनुनोक्तम्—

विदुषा ब्राह्मणेनेदं अध्येतव्यं प्रयत्नतः ।
विद्भिश्च प्रवक्तव्यं सम्यङ्नान्येन केनचित् ॥

तच्छूद्राधिकारनिवृत्तिपरम्, अत एव शूद्राधिकारं प्रकृत्य यमः—

तस्मादस्याधिकारोऽस्ति न वेदेषु न तु स्मृतौ ।

इति । अतस्सिद्धो द्विजातीनामेवाध्ययनेऽधिकारः.

इति । एवं तदर्थानुष्ठानेऽपि द्रष्टव्यम्, अत एव मनुः—

निषेकादिश्मशानान्तं[1] मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित् ॥

इति । निषेको गर्भाधानम्, श्मशानं प्रेतकर्म । व्यासोऽपि—

तेन स्मार्तमनुष्ठानमन्तरेण[2] तु वैदिकम् ।
प्रवर्तते द्विजातीनां धर्मशुद्धिमभीप्सुभिः ॥

इति । यत्पुनश्शाक्यादिप्रणीतं तन्नानुष्ठेयम्, तस्यावेदमूलत्वात् । तदुक्तं चतुर्विंशतिमते—

अर्हच्चार्वाकवाक्यानि बौद्धादिपठितान्यपि ।
विप्रलम्भकवाक्यानि तानि सर्वाणि वर्जयेत् ॥

व्यासोऽपि—

एतेभ्योऽपि यदन्यत्स्यात् किञ्चिद्धर्माभिधायकम् ।
तद्दूरतरतो विद्धि मोहस्तस्याश्रयो मतः ॥

इति । किं तर्हि अनुष्ठेयमित्यपेक्षिते स एवाह—

वेदार्थवित्तमैः कर्म यत्स्मृतं[3] मुनिभिः पुरा ।
तद्यत्नेनानुतिष्ठेत तन्निषिद्धं तु वर्जयेत् ॥

ते हि वेदार्थतत्त्वज्ञाः लोकानां हितकाम्यया ।
आदिष्टवन्तो यं धर्मं तं धर्मं न विचालयेत् ॥

---

[1] नान्तो—ख. [2] न—ख, [3] यत्कृतम्—ख.

इति । अत्र कात्यायनः—

यत्रोपदिश्यते कर्म कर्तुरङ्गं न वोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ॥
यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु ।
तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्याऽपराजिता ॥
आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः ।
तदाऽऽसीनेन कर्तव्यं न प्रह्वेण न तिष्ठता ॥
प्रवृत्तमन्यथा कुर्याद्यदि मोहात्कथंचन ।
यतस्तदन्यथाभूतं तत एव समापयेत् ॥
समाप्तं यदि जानीयान्मयैतदयथाकृतम् ।
तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः ॥
प्रायो यस्यां क्रियायां[1] तु साङ्गं तत्क्रियते पुनः ।
तदङ्गस्याक्रियायां तु नावृत्तिर्नैव तत्क्रिया ॥

इति । ननु किमत्र सकलस्मार्ताङ्गोपसंहारेणानुष्ठानं उत न (अन्येन)? यदि[2] नोपसंहारः, तदा

सर्वशाखोपसंहारादुक्तः श्रौतो यथा विधिः ।
सर्वस्मृत्युपसंहारात् स्मार्तोऽप्युक्तस्तथा विधिः ॥

इत्यादिविरोधस्स्यात् । अथोपसंहारः, तदा नानुष्ठातुं शक्यं विरुद्धोपसंहारसम्भवात् । उच्यते—सत्यं यदि सर्वोपसंहारः स्यात्; किन्तु यन्नाम्नातं स्वतन्त्रेण तावन्मात्रपरिपूरण[3]मेवा-

[1] प्रधानस्याक्रियायां तु—ख. [2] स्मार्तोपसंहारेणानुष्ठानमुत न वा? यदि—इति स्मृतिरत्नाकरे. [3] परिहरण—ख.

न्यतः क्रियत इत्यविरोधः । अत एव कात्यायनः—

यन्नाम्नातं स्वशाखायां पारक्यमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयं अग्निहोत्रादिकर्मवत् ॥

इति । अनेनैवाभिप्रायेणोक्तं, 'सर्वस्मृत्युपसंहारात्' इति ॥
यत्तु कात्यायनेनोक्तम्—

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत् ॥

इति, तन्निराकांक्षाभिप्रायं, यतस्स एवाह—

आत्मतन्त्रे तु यन्नोक्तं तत्कुर्यात्पारतन्त्रिकम् ।

इति । इति स्मृतिचन्द्रिकायां धर्मप्रमाणानि ।

धर्मस्वरूपनिरूपणम्

श्रुत्यादिप्रमाणको धर्म इत्युक्तम् । तस्य धर्मस्य सामान्यलक्षणमाह विश्वामित्रः—

यमार्याः क्रियमाणं तु शंसन्त्यागमवेदिनः ।
स धर्मो यं विगर्हन्ते तमधर्मं प्रचक्षते ॥

इति । मनुरपि—

विद्वद्भिस्सेवितस्सद्भिः नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातः यो धर्मस्तं निबोधत ॥

इति । तथा विशेषतोऽपि स एवाह—

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणम् ॥

इति । धृतिः धैर्यम् । अपराधेऽपि चित्तस्याविकारः क्षमा । अन्तःकरणसंयमः दमः । अस्तेयं अदत्तास्वीकारः । शौचं बाह्यमाभ्यन्तरं च । इन्द्रियनिग्रहः निषिद्धेभ्यः इन्द्रियाणां निवारणम् । ह्रीः अकार्यनिवृत्तिः । विद्या आत्मज्ञानम् । सत्यं यथार्थवचनम् । तच्च प्रियमेव वेदितव्यम् । तथा च मनुः—

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मस्सनातनः ॥

इति । अक्रोधः क्रोधराहित्यम् । एतद्दशकं धर्मलक्षणं धर्मस्वरूपमित्यर्थः । व्यासोपि—

सत्यं दमस्तपश्शौचं संतोषो ह्रीः क्षमाऽऽर्जवम् ।
ज्ञानं शमो दया ध्यानमेष धर्मस्सनातनः ॥

इति । सत्यादीनां लक्षणं स एवाह—

सत्यं भूतहितं प्रोक्तं मनसो दमनं दमः ।
तपः स्वधर्मवर्तित्वं शौचं सङ्करवर्जनम् ॥
संतोषो विषयत्यागः ह्रीरकार्यनिवर्तनम्[1] ।
क्षमा द्वन्द्वसहिष्णुत्वं आर्जवं समचित्तता ॥
ज्ञानं तत्त्वार्थसम्बोधः शमः चित्तप्रशान्तता ।
दया भूतहितैषित्वं ध्यानं निर्विषयं मनः ॥

---

[1] ह्रीरकार्यविलक्षणम्—क. ह्रीश्च कार्यविसर्जनम्—ख.

इति । तथा च धर्मान्तराण्यपि स एवाह—

दानं यज्ञः सतां पूजा वेदधारणमार्जवम् ।
एष धर्मः परो ज्ञेयः फलवान्प्रेत्य चेह च ॥

भोगेष्वासक्तिरहितं[1] तथैवात्मावलोकनम् ।
श्रेयः परं मनुष्याणां कपिलः प्राह पार्थिव ॥

सर्वत्र समदार्शित्वं निर्ममत्वमसङ्गिता ।
श्रेयः परं मनुष्याणां प्राह पञ्चशिखो मुनिः ॥

इति । सुमन्तुरपि—

वर्णत्वमेकमाश्रित्य यो धर्मस्संप्रवर्तते ।
वर्णधर्मस्स उक्तस्तु यथोपनयनं किल ॥

यस्त्वाश्रमत्वमाश्रित्य अधिकारः प्रवर्तते ।
स एवाश्रमधर्मस्स्यात् भिक्षादण्डादिको यथा ॥

वर्णत्वमाश्रमत्वं च योऽधिकृत्य प्रवर्तते ।
स वर्णाश्रमधर्मस्तु यथा मौञ्जी तु मेखला ॥

यो गुणेन प्रवर्तेत गुणधर्मस्स उच्यते ।
यथा मूर्धाभिषिक्तस्य प्रजानां परिपालनम् ॥

निमित्तमेकमाश्रित्य यो धर्मस्संप्रवर्तते ।
नैमित्तिकस्स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥

इति । इति स्मृतिचन्द्रिकायां धर्मस्वरूपनिरूपणम् ।

श्रुत्यादिबलाबलनिर्णयः

अथ श्रुत्यादीनां बलाबलम् । तत्र मनुः—

श्रुतिद्वैधं तु यत्र स्यात् तत्र धर्मावुभौ स्मृतौ ।

[1] ष्वसक्तिस्सततं—क & ख.

उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः ॥

इति । यत्र श्रुत्योः द्वैविध्यं परस्परविरोधतः तत्र श्रुतिप्रतिपादितौ द्वावपि धर्मौ, यतः मन्वादिभ्यः पूर्वतरैरपि तौ धर्मावित्युक्तौ । तुल्यप्रमाणविशिष्टत्वादनयोः विकल्प इत्यभिप्रायः । अनेनैव स्मृत्योर्विरोधेऽपि विकल्प इत्युक्तं भवति । अत एव स्मृत्यधिकारे गौतमः—

'तुल्यबलविरोधे विकल्पः'

इति । श्रुतिस्मृत्योर्विरोधे स्मृतेः बाध एव । यथाऽऽह लोगाक्षिः—

श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सदा ॥

इति । एवमाचारस्यापि स्मृतिविरोधे बाध एव स्यात्,

'श्रुतिस्मृतिविहितो धर्मः तदभावे शिष्टाचारः प्रमाणम्'

इति वसिष्ठस्मरणात् । एवं परिषद्वचनेऽपि द्रष्टव्यम् । तदुक्तं चतुर्विंशतौ—

स्मृतेर्वेदविरोधेन परित्यागो यथा भवेत् ।
तथैव लौकिकं वाक्यं स्मृतिबाधात्परित्यजेत् ॥

इति । यत्र पुनर्मानवस्य स्मृत्यन्तरेण विरोधः तत्र मनूक्त एव श्रेयान् । तदाहाङ्गिराः—

यत्पूर्वं मनुना प्रोक्तं धर्मशास्त्रमनुत्तमम् ।
न हि तत्समतिक्रम्य वचनं हितमात्मनः ॥

इति । मनूक्तमतिक्रम्यान्यदीयं वचनं आत्मनो ज्ञानाय[1] न भवति । बृहस्पतिरपि—

वेदादुपनिबद्धत्वात्प्राधान्यं तु मनोस्स्मृतम् ।
मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यते ॥

श्रुतिरपि—

यद्वै किं च मनुरवदत्तद्भेषजम् ।

इति । यत्र पुनर्धर्मद्वयविरोधस्तत्र लघीयस एव[2] बाध इत्याह व्यासः—

धर्मं यो बाधते धर्मो न स धर्मः कथं चन ।
अविरोधी तु यो धर्मः स धर्मस्सद्भिरुच्यते ॥
तस्माद्विरोधे धर्मस्य निश्चित्य गुरुलाघवम् ।
यतो भूयस्ततो विद्वान् कुर्याद्धर्मविनिर्णयम् ॥

इति । इति स्मृतिचन्द्रिकायां श्रुत्यादिबलाबलनिर्णयः.

देशनिर्णयः.

अथ देशनिर्णयः । तत्र मनुः—

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्[1] ।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥

इति ।

कुरुक्षेत्रं च मत्स्याश्च पाञ्चालाश्शूरसेनकाः[3] ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरम् ॥

---

[1] हिताय.—क. [2] लघुधर्मस्यैव—ख. [3] शूरसेनजाः.

अनन्तरं ईषदूनामित्यर्थः ।

हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशना[1]दपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥

विनशनं सरस्वत्या अन्तर्धानदेशः ।

आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात् ।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥

इति । अत्र च पूर्वः पूर्वं उत्तरोत्तरात्प्रशस्तः । तथा च सुमन्तुः—

ब्रह्मावर्तः परो देश ऋषिदेशस्त्वनन्तरः ।
मध्यदेशस्ततो न्यूनः आर्यावर्तस्ततः परः ॥

इति । यत्पुनर्मनुनोक्तं—

कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशः म्लेच्छदेशस्ततः परः ॥

इति, तत्पूर्वोक्तदेशचतुष्टयालाभे द्रष्टव्यं, तदनन्तरमस्याभिधानात् । एतच्च न देशान्तरनिराकरणाय । यत आह विष्णुः—

चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते ।
स म्लेच्छदेशो विज्ञेय आर्यावर्तस्ततः परः ॥

इति । अतश्च यत्र कृष्णसारश्चातुर्वर्ण्यव्यवस्थानं वा स धर्मदेश इति मन्तव्यम् । तथा चादिपुराणम्—

---

[1] ग्विवसना.—ख.

कृष्णसारैर्यवैर्दर्भैश्चातुर्वर्ण्याश्रमैस्तथा ।
समृद्धो धर्मदेशस्स्यादाश्रयेरन्विपश्चितः ॥

इति । एतैर्विहीनो म्लेच्छदेश इत्यभिप्रायः । म्लेच्छदेश इति वदन् तत्र धर्मक्रियानिषेधमाह । अत एव विष्णुः—

न म्लेच्छविषये श्राद्धं कुर्यान्न गच्छेत्तं विषयम्[1] ।

इति । आदिपुराणेऽपि—

अधर्मदेशमध्ये तु कृत्वा क्रतुशतान्यपि ।
न पश्यन्ति द्विजाश्श्रेयो यान्तुस्स्वर्गे महागळम् ॥

इति । अनेनैवाभिप्रायेण याज्ञवल्क्योऽप्याह—

यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत ॥

इति । धर्मानुष्ठानतयेति शेषः । तस्य धर्मसाधनत्वात् । अत एव संवर्तः—

स्वभावाद्यत्र विचरेत्कृष्णसारस्सदा मृगः ।
धर्मदेशस्स विज्ञेयो द्विजानां धर्मसाधनम् ॥

इति । स्वभावादनादित[2] इत्यर्थः । शङ्खस्त्वार्यावर्तमाह—

कृष्णमृगो यावद्विचरति तावदार्यावर्तस्स्यात् ।

इति । आर्यावर्त इत्यनुवृत्तौ वसिष्ठोऽपि—

यावत्कृष्ण[3]मृगो विचरति ।

[1] गच्छेन्म्लेच्छविषयं.—क & ख [2] दनिवारितः—ख.
[3] यावद्वा न कृष्ण.—ख.

इति । आर्यावर्तोत्पन्नस्यादिपुराणे नियमविशेष उक्तः—

आर्यावर्ते समुत्पन्नो द्विजो वा यदि वाऽद्विजः ।
नर्मदां सिन्धुपारं च करतोयां न लङ्घयेत् ॥
आर्यावर्तमतिक्रम्य विना तीर्थक्रियां द्विजः ।
आज्ञां चैव तथा पित्रोरैन्दवेन विशुद्ध्यति ॥

करतोया नदी । एवमुक्तेष्वपि देशेषु केषु चिदपवादमाह मनुः—

न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते ।
न पाषण्डिद्विजाक्रान्ते नोपसृष्टेऽन्त्यजैर्नृभिः ॥

इति । व्यासोऽपि—

देशांश्छूद्रावृतानन्यानधार्मिकजनावृतान् ।
म्लेच्छावृतान्प्रयत्नेन वर्जयेद्धार्मिको जनः[1] ॥

इति । अत्राप्यपवादमाह पितामहः—

शूद्रराज्येऽपि निवसेद्यत्र मध्ये तु जाह्नवी ।
सोऽतिपुण्यतमो देशो नरैरपि[2] समाश्रितः ॥
कुरुक्षेत्रनिवासेन वाराणस्यां च मानवः ।
अहिंसकः पाप[3]रतः पापं हित्वा दिवं व्रजेत् ॥
न गङ्गाया विना वासः सर्वक्षत्रक्षयादृते ।
काश्यां हि मरणं श्रेष्ठं विना क्षेत्रं प्रजापतेः ॥

---

[1] द्विजः—क & ख. [2] ऽनार्यैरपि—क.
[3] स्नान.—क & ख.

गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
निवासो न विना पुण्यैर्नराणामिह जायते ॥

सर्वक्षत्रक्षयः कुरुक्षेत्रम् । व्यासोपि—

ते देशास्ते जनपदास्ते शैलास्ते तथाऽऽश्रमाः ।
पुण्या त्रिपथगा येषां मध्ये याति सरिद्वरा ॥

आदिपुराणेऽपि.—

यत्र गङ्गा सरिच्छ्रेष्ठा स देशस्तत्तपोवनम् ।
सिद्धक्षेत्रं च तज्ज्ञेयं गङ्गातीरसमाश्रितम् ॥

विष्णुधर्मोत्तरे—

प्रभासे पुष्करे काश्यां नैमिशेऽमरकण्टके ।
गङ्गायां सरयूतीरे निवसेद्धार्मिको जनः ॥

व्यासोपि—

अन्तर्वेदिर्मध्यदेशं ब्रह्मावर्तं च यज्ञियम् ।
मिश्रितं सरयूतीरं पुष्करं नैमिशं तथा ॥
देशानेतान्निवासाय संश्रयेरन् द्विजातयः ।

इति । अत्र द्विजातिग्रहणं शूद्रस्य प्रदर्शनार्थं, तस्य आपद्येव मनुना देशानुग्रहस्मरणात्—

एतान् द्विजातयो देशान् संश्रयेरन्प्रयत्नतः ।
शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्शितः ॥

इति ।

निषिद्धदेशाः

अथ निषिद्धदेशाः । तत्र बोधायनः—

आनर्ता अङ्गमगधास्सौराष्ट्रा दक्षिणापथः ।
अपास्यास्सिन्धुसौवीरा एते सङ्कीर्णयोनयः ॥

इति । व्यासोऽपि—

अङ्गवङ्गान्ध्रविषयो ये चान्ये म्लेच्छजातयः ।
कृष्णसारविहीनाश्च देशानेतान्विसर्जयेत् ॥

आदिपुराणेऽपि—

काञ्चीकोसलसौराष्ट्रा देवराष्ट्रा द्विकच्छजाः[1] ।
सौवीर[2] कोङ्कणोद्भूता एतेऽष्टौ निन्दिता भृशम् ॥
पञ्च नद्यो वहन्त्येता यत्र निस्रुस पर्वतात् ।
आरट्टा नाम ये देशा न तेष्वार्योऽन्वहं वसेत् ॥
नर्मदासिन्धुकाशीनां पारं पद्मस्य पश्चिमम् ।
गत्वा नरकमाप्नोति तीर्थकालाधिकं वसन् ॥
अङ्गवङ्गकलिङ्गाश्च[3] विन्ध्यमालवकास्तथा ।
नर्मदादक्षिणं यच्च सिन्धोरुत्तरमेव च ॥
पौण्ड्रश्चैव सुराष्ट्रश्च चैद्यकेरलमागधाः[4] ।

---

[1] वेदराष्ट्रा द्व्यकच्छपाः. ख. [2] कावेरी— क ; काश्मीर—ख.
[3] ङ्गान्ध्र—ख. [4] चैद्यमागधिकाः खगाः—ख.

न विवाहं तथा श्राद्धं यज्ञं चैव समाचरेत् ॥
पापदेशाश्च ये केचित्पापैरध्युषिता जनैः ।
गत्वा देशानपुण्यांस्तु कृत्स्नं पापं समश्नुते ॥
सौराष्ट्रं सिन्धुसौवीरं आवन्त्यं दक्षिणापथम् ।
गत्वैतान्कामतो देशान् कलिङ्गांश्च पतेद्द्विजः ॥

इति । एतत्पूर्वोक्तकृष्णसारादिविहीनदेशाभिप्रायं मन्तव्यं, तस्यापि धर्मसाधनत्वात् । बोधायनस्तु सिन्धुसौवीरादिगमने प्रायश्चित्तमाह—

सिन्धुसौवीरसौराष्ट्रान् तथा प्रत्यन्तवासिनः[1] ।
अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति ॥

इति । प्रत्यन्तोऽन्तदेशः । तथा च श्रुतिः—

तस्मान्न जघन्यान्नान्त्यान्

इति । आदिपुराणेऽपि.—

सौराष्ट्रसिन्धुसौवीरमावन्त्यं दक्षिणापथम् ।
एतान्देशान्द्विजो गत्वा पुनस्संस्कारमर्हति ॥
हिमवत्कौशिकं विन्ध्यं पारं पद्मस्य पश्चिमम् ।
तीर्थयात्रां विना गत्वा पुनस्संस्कारमर्हति ॥
तस्मात्प्रभातसमये गत्वा गङ्गातटं[2] शुभम् ।
प्रत्यन्तवासशुद्ध्यर्थं करिष्यामो महत्तपः ॥

---

[1] प्रत्यन्तवासिनश्चण्डालदेशाः—वेद्य. [2] जलं—क & ख.

इति । तथा द्विजानामापदि वृत्त्यर्थं देशानुग्रहः स्कन्दपुराणे दर्शितः—

अङ्गवङ्गकलिङ्गांश्च पार्वतांस्तत्समीपगान् ।
सिन्धुसौवीरसौराष्ट्रान् केरला[1]न्ध्रकमालवान् ॥
निवासाय द्विजो नित्यमनापदि विसर्जयेत् ।
एतेष्वापदि गत्वा तु तन्निवृत्तौ पुनर्व्रजेत्[2] ॥

इति ॥ इति स्मृतिचन्द्रिकायां निषिद्धदेशनिर्णयः ॥

देशधर्माः

अथ देशधर्माः । तत्र बोधायनः—

"पञ्चधा विप्रतिपत्तिर्दक्षिणतः अनुपनीतेन भार्यया च सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृपरिणयनमिति । तथोत्तरतः ऊर्णाविक्रयः सीधुपानमुभयतोदद्भिर्व्यवहारः आयुधीयकं समुद्रयानमिति. इतर इतरास्मिन्कुर्वन्दुष्यतीतर इतरस्मिन् । तत्र तत्र देशप्रामाण्यमेव स्यात्" ।

इति । अयमर्थः इतरो दाक्षिणात्य इतरस्मिन्नुदीच्ये देशेऽनुपनीतादिना सह भोजनादिकं कुर्वन् दुष्यति न स्वदेशे । तथोदीच्य इतरास्मिन्दक्षिणे ऊर्णाविक्रयादिकं कुर्वन् दुष्यति न स्वदेशे, कुतः देशप्रामाण्यात् देशनिबन्धनत्वात्प्रामाण्यस्येत्यर्थः । बृहस्पतिरपि—

---

[1] पारदा—क & ख. [2] एतानप्यापदि गृही संश्रयेद्वृत्तिकाङ्क्षिणः—क & ख.

उद्वाह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः ।
मध्यदेशे कर्मकराश्शिल्पिनश्च[1] गवाशिनः ॥
मत्स्यादाश्च नराः पूर्वे व्यभिचाररतास्स्त्रियः ।
उत्तरे मद्यपा नार्यस्स्पृश्या नृणां रजस्वलाः ॥
सहजाताः प्रगृह्णन्ति भ्रातृभार्यामभर्तृकाम् ।

इति । एतेषां च देशव्यवस्थया प्रामाण्यमाह स एव—

देशजातिकुलानां च ये धर्मास्तत्प्रवर्तिताः[2] ।
तथैव ते पालनीयाः प्रजा प्रक्षुभ्यतेऽन्यथा ॥

इति । देवलोऽपि—

येषु देशेषु ये देवाः येषु देशेषु ये द्विजाः ।
येषु देशेषु यत्तोयं या च यत्रैव मृत्तिका[3] ॥
येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः ।
तत्र तान्नावमन्येत धर्मस्तत्रैव तादृशः ॥
यस्मिन्देशे पुरे ग्रामे त्रैविद्यनगरेऽपि वा ।
यो यत्र विहितो धर्मस्तं धर्मं न विचालयेत्[4] ॥

इति । एवमविशेषेण देशधर्माणां प्रामाण्यप्रसक्तौ मनुराह—

सद्भिराचरितं यच्च धार्मिकैश्च द्विजातिभिः ।
तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत् ॥

---

[1] शिखिनश्च–क. शिल्पनश्च—ख. [2] तत्प्रकीर्तिताः । क, ख.
[3] वृत्तिका—क. [4] विचारयेत्.—क.

इति। सद्भिराचरितं यच्छ्रुत्यादिप्रमाणाविरुद्धं तद्देशकुलजातीनां धर्मत्वेन प्रकल्पयेदित्यर्थः। तथा च गौतमः—

देशजातिकुलधर्मा आम्नायैरविरुद्धाः प्रमाणम्।

इति। तत्र विरुद्धा अपि क्वचित्क्वचिद्दृश्यन्ते। यथा—

विरुद्धास्तु प्रदृश्यन्ते दाक्षिणात्येषु सम्प्रति।
स्वमातुलसुतोद्वाहो मातृबन्धुत्वदूषितः॥

अभर्तृकभ्रातृभार्याग्रहणं चातिदूषितम्।
कुले कन्याप्रदानं च देशेष्वन्येषु दृश्यते॥
तथा भ्रातृविवाहोऽपि पारसीकेषु दृश्यते।
तथैकादशरात्रादौ श्राद्धे भुक्तं तु यैर्द्विजैः॥
तेभ्यश्श्राद्धे पुनर्दानं केचिन्नेच्छन्ति देशिनः।
दत्वा धान्यं वसन्तेऽन्ये शरदि द्विगुणं पुनः॥
गृह्णन्ति बन्धुक्षेत्रं च प्रविष्टे द्विगुणे धने।
भुज्यतेऽन्यैरप्रविष्टे मूले तच्च विकथ्यते॥
इत्थं विरुद्धानाचारान्प्रभूतान्विनिवर्तयेत्।
देशजात्यादिधर्मस्य प्रामाण्यमविरोधिनः॥
शास्त्रेणातो नृपस्सर्वं शास्त्रं दृष्ट्वा प्रवर्तयेत्।

इति। तथा लोकविरुद्धमपि परित्याज्यमेव। तदाह वराहमिहिरः—

देशाचारस्तावदादौ विचिन्त्यः
देशेदेशे या स्थितिस्सैव कार्या ।
लोकविद्विष्टं पण्डिता वर्जयन्ति
दैवज्ञा ये लोकमार्गेण यान्ति ॥

इति स्मृतिचन्द्रिकायां देशधर्माः.

युगधर्माः.

अथ युगधर्माः । तत्र मनुः—

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥
तपः परं[1] कृतयुगे त्रेतायां ज्ञानमेव च ।
द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे ॥

तपः कृच्छ्रचान्द्रायणादि परं प्रधानमित्यर्थः । बृहस्पतिरपि.—

तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्मृतम् ।
द्वापरे चाध्वरः प्रोक्तस्तिष्ये दानं दया दमः ॥

तिष्यः कलिः । पराशरोऽपि.—

कृते तु मानवो धर्मस्त्रेतायां गौतमस्य तु ।
द्वापरे शङ्खलिखितौ कलौ पाराशरस्स्मृतः ॥
त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे ॥

---

[1] धर्मः.—ख.

कृते संभाष्य पतितस्त्रेतायां स्पर्शनेन तु ।
द्वापरे धनमादाय कलौ पतति कर्मणा ॥

बृहस्पतिरपि.—

कृते यदब्दाद्यो धर्मस्स त्रेतायामृतुत्रयात् ।
द्वापरे तु त्रिपक्षेण कलावह्ना तु तद्भवेत् ॥

विष्णुपुराणेऽपि.—

यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तु ।
द्वापरे तच्च[1] मासेन अहोरात्रेण तत्कलौ ॥

ब्रह्माण्डपुराणेऽपि—

त्रेतायामाब्दिको धर्मो द्वापरे मासिकस्स्मृतः ।
यथाशक्ति चरेत्प्राज्ञः तमह्ना प्राप्नुयात्कलौ ॥

विष्णुधर्मोत्तरेऽपि.—

पुष्करं तु कृते सेव्यं त्रेतायां नैमिशं तथा ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥

इति स्मृतिचन्द्रिकायां युगधर्माः.

कलियुगधर्माः.

अथ कलियुगधर्माः । तत्र व्यासः—

ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।

---

[1] पञ्च—क.

यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥
धर्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ ।
अल्पायासेन धर्मज्ञास्तेन तुष्टोऽस्म्यहं कलौ ॥

इति । आदिपुराणेऽपि—

यस्तु कार्तयुगो धर्मो न कर्तव्यः कलौ युगे ।
पापप्रसक्तास्तु यतः कलौ नार्यो नरास्तथा ॥
न विद्रुत्ता न शुद्धोऽर्थः न शुद्धिर्मनसः कलौ ।
यतोऽतस्सत्यमेवैकं नराणामुपकारकम् ॥

इति । कार्तः कृतयुगसम्बन्धी । तथा निषिद्धधर्मा अपि तत्रैवोक्ताः—

दीर्घकालं ब्रह्मचर्यं धारणं च कमण्डलोः ।
गोत्रान्मातृसपिण्डात्तु विवाहो गोवधस्तथा ॥
नराश्वमेधौ मद्यं च कलौ वर्ज्या द्विजातिभिः ।

क्रतुरपि—

देवराच्च सुतोत्पत्तिः दत्ता कन्या न दीयते ।
न यज्ञे गोवधः कार्यः कलौ च न कमण्डलुः ॥

ब्राह्मे[1].—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥

---

[1] पुराणेऽपि.—क.

इति । तथाऽन्येऽपि धर्मज्ञसमयप्रमाणमाहुः[1]

विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम् ।
बालिकाऽक्षतयोन्योश्च वरेणान्येन संस्कृतिः ॥
कन्यानामसवर्णानां विवाहश्च द्विजातिभिः ।
आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् ॥
द्विजस्याब्धौ तु नौयातुः शोधितस्यापि सङ्ग्रहः ।
सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥
महाप्रस्थानगमनं गोहिंसा चैव[2] गोसवे ।
सौत्रामण्यामपि सुराग्रहणस्य च सङ्ग्रहः ॥
अग्निहोत्रहवण्याश्च सहालीढा[3] परिग्रहः ।
वानप्रस्थाश्रमस्यापि प्रवेशो विधिचोदितः ॥
वित्तं स्वाध्यायसापेक्षमघसङ्कोचनं तथा ।
प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ॥
संसर्गदोषस्स्तेनाद्यैर्महापातकनिष्कृतिः ।
वरातिथिपितृभ्यश्च पशूपहरण[4]क्रिया ॥
दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ।
सवर्णानां तथा दुष्टैस्संसर्गश्शोधितैरपि ॥
अयोनौ सङ्ग्रहे वृत्ते[5] परित्यागो गुरुस्त्रियाः ।
अस्थिसञ्चयनादूर्ध्वमङ्गस्पर्शनमेव च ॥

---

[1] प्रमाणकास्सन्ति यथा.—क, ख.
[2] गोसंज्ञप्तिश्च.–वै.
[3] लेह्यो लीढा.–वै.
[4] पशूपाकरण.–वै.
[5] सङ्ग्रहो वित्ते.–वै.

शमितृत्वं च विप्राणां सोमविक्रयणं तथा ।
षड्भुक्तानशनेनान्नहरणं हीनकर्मणः ॥
शूद्रेषु दासगोपालकुलमित्रार्थसीरिणाम् ।
भोज्यान्नता गृहस्थस्य तीर्थसेवाऽतिदूरतः ॥
शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीरिता ।
आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा ॥
प्रजार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः ।
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ॥
बलात्काराद्धि दुष्टस्त्रीसङ्ग्रहो विधिचोदितः ।
यतेस्तु सर्ववर्णेषु भिक्षाचर्या विधानतः ॥
नवोदके दशाहं च दक्षिणा गुरुचोदिता ।
ब्राह्मणादिषु शूद्रस्य पचनादिक्रियाऽपि च ॥
भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ।
गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ॥
पितापुत्रविरोधेषु साक्षिणां दण्डकल्पनम् ।
यत्र सायं गृहस्थत्वं[1] सूरिभिस्सत्य[2] तत्परैः ॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः ॥
समयश्चापि साधूनां प्रमाणं वेदवद्भवेत् ।

इति । उक्तमापस्तम्बेनापि—

---

[1] गृहस्थस्य.—क. [2] स्तत्त्व–स्मृ. र.

धर्मज्ञसमयः प्रमाणं वेदाश्च ।

इति । इति स्मृतिचन्द्रिकायां परिभाषा समाप्ता ।

संस्कारपरिभाषा.

अधुना लेशतस्संस्कारकाण्डमुच्यते । तत्र गौतमः—

गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामेतेषां च अष्टका पार्वणं श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजी चेति सप्त पाकयज्ञसंस्थाः अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ आग्रयणचातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यष्षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाः इत्येते चत्वारिंशत्संस्काराः । अथाष्टावात्मगुणाः—दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहा.

इति । वेदव्रतानि प्राजापत्यादीनि । स्नानं समावर्तनम् । सहधर्मचारिणीसंयोगो विवाहः । पञ्चयज्ञा देवयज्ञादयः । अष्टका श्राद्धविशेषः । पार्वणं पर्वणि क्रियमाणं स्थालीपाकलक्षणम् । श्राद्धं मासिश्राद्धम् । श्रावणी सर्पबलिः । आग्रहायणी आग्रयणम् । चैत्री होलकाख्यकर्म । आश्वयुजी

इन्द्रध्वजहोमाख्यम्[1] । अन्ये प्रसिद्धाः । केचिदौपासनहोमो वैश्वदेवं पार्वणमष्टका मासिश्राद्धं सर्पबलिरीशानबलिरिति सप्तपाकयज्ञानाहुः । आत्मगुणानां लक्षणं बृहस्पतिराह—

यदा तु बन्धुवर्गेषु मित्रे द्वेष्टरि वा सदा ।
आपन्नो रक्षितव्यस्तु दयैषा परिकीर्तिता ॥

बाह्ये चाभ्यन्तरे चैव दुःख उत्पादिते परैः ।
न कुप्यति न चाहन्ति सा क्षमा परिकीर्तिता ॥

न गुणान्गुणिनो हन्ति स्तौति मन्दगुणानपि ।
नान्यदोषेषु रमते साऽनसूया प्रकीर्तिता ॥

अभक्ष्यपरिहारस्तु दुष्टसंसर्गवर्जनम्[2] ।
स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्तितम् ॥

शरीरं पीड्यते येन सुशुभेनापि कर्मणा ।
अत्यन्तं तन्न कर्तव्यमनायासस्स उच्यते ॥

प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् ।
एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥

स्तोकादपि हि दातव्यं मुदितेनान्तरात्मना ।
अहन्यहनि यत्किञ्चिदकार्पण्यं हि तत्स्मृतम् ॥

यथोपपन्नैस्सन्तोषः कर्तव्यस्स्वागतैर्द्विजैः ।

---

[1] इन्द्रध्वजमहोत्सवाख्यम्.—ख. [2] संसर्गश्चाप्यनिन्दितैः—क. ख.

परार्थं नाभिलाषेत साऽस्पृहा परिकीर्तिता ॥

इति । यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्रह्मण स्सायुज्यमाप्नोतीत्याह मनुः—

संस्कारैस्संस्कृतः पूर्वैरुत्तरैरपि संस्कृतः ।
नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्रह्मलौकिकम् ॥
ब्राह्मं पदमवाप्नोति यस्मान्न च्यवते पुनः ।

इति । गर्भाधानादयः पूर्वसंस्काराः । उत्तरे पाकयज्ञादयः । तदाह हारीतः—

द्विविध एव संस्कारो भवति ब्राह्मो दैवश्च । गर्भाधानादिस्स्मार्तो ब्राह्मः । पाकयज्ञहविर्यज्ञसो-माश्चेति दैवः । ब्राह्मसंस्कारसंस्कृतः ऋषीणां समानतां सलोकतां सायुज्यं गच्छति । दैवेनो-त्तरेण संस्कृतो देवानां समानतां सलोकतां सायुज्यं गच्छति ॥

इति । एतच्च गुणविहीनसंस्काराद्यभिप्रायेण । अत एव गौतमः—

यस्यैते चत्वारिंशत्संस्कारा न चाष्टावात्मगुणा न स ब्रह्मणस्सायुज्यं सालोक्यं च गच्छति ।

इति । अतश्च यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च तस्यैवेदं ब्रह्मसायुज्यप्राप्तिलक्षणं फलमित्यवगन्तव्यम् । अत्र

च गर्भाधानाद्युपनयनपर्यन्ता एव संस्कारास्सर्वेषां नियताः न पुनस्स्नानादयः । तथात्वे,

यमिच्छेत्कर्तुं तमाविशेद्यदितरथा ब्रह्मचर्यादेव प्रव्रजेत् ।

इति विरोधस्स्यात् । एते च संस्कारा द्विजातीनामेव । यदाह याज्ञवल्क्यः—

विप्रक्षत्रियविट्छूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ।
निषेकाद्याश्श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ॥

इति । निषेको गर्भाधानं आद्यं यासां तास्तथोक्ताः । श्मशानं प्रेतकर्म । द्विजातीनां मन्त्रतः क्रिया इति वदन् शूद्रस्यामन्त्रकास्संस्कारा इत्याह । अत एव संस्काराधिकारे यमः—

शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः ।

इति । एतच्च चूडाकरणान्तसंस्काराभिप्रायम् । अत एवाहापस्तम्बः—

अशूद्राणामदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि ।

इति । ब्रह्मपुराणे तु शूद्रस्य विवाहेतरसकलसंस्कारनिषेधो दर्शितः—

विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा ।

इति । अतो विधिविहितप्रतिषिद्धत्वाद्विकल्पो वेदितव्यः । मनुरपि द्विजानामेव समन्त्रकस्संस्कार इत्याह—

वैदिकैः कर्मभिः पुण्यैर्निषेकाद्यैर्द्विजन्मनाम् ।
कार्यश्शरीरसंस्कारः पावनः प्रेत्य चेह च ॥

इति । वैदिकमन्त्रसाध्यत्वाद्वैदिककर्माणि पावनानि वैदिकानां पापप्रशमनद्वारेण । तदाह स एव—

गार्भैर्होमैर्जातकर्मचूडामौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमार्जति ॥

इति । बीजं शुक्लशोणितं तद्दोषजनितं बैजिकं अशुचि । गर्भनिवासजनितं गार्भिकम् । होमग्रहणमहोमात्मकस्य गर्भाधानादेरपि प्रदर्शनार्थम् । अत एव गर्भाधानादि चूडाकरणान्तं कर्माभिधाय याज्ञवल्क्यः—

एवमेनश्शमं याति बीजगर्भसमुद्भवम् ।

इति । इति स्मृतिचन्द्रिकायां संस्कारपरिभाषा ॥

गर्भाधानम्.

अथ गर्भाधानम् । तत्र याज्ञवल्क्यः—

षोडशर्तुर्निशास्स्त्रीणां तस्मिन्युग्मासु संविशेत् ।

इति । रजोदर्शनप्रभृति षोडश निशाः स्त्रीणामृतुर्गर्भग्रहणस्य कालः ।

तस्मिन् युग्मासु समासु रात्रिषु संविशेद्गच्छेत् यदि पुत्रार्थी भवति । कन्यार्थी त्वयुग्मासु । तथा च मनुः—

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम् ॥

इति । तथा चापस्तम्बः—

चतुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां युग्मां
प्रजानिःश्रेयसमृतुगमनमित्युपदिशन्ति ॥

इति । व्यासोऽपि—

रात्रौ चतुर्थ्यां पुत्रस्स्यादल्पायुर्धनवर्जितः ।
पञ्चम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः ।
सप्तम्यामप्रजा योषिदष्टम्यामीश्वरस्सुतः ।
नवम्यां सुभगा नारी दशम्यां च परः पुमान् ॥
एकादश्यामधर्म्या स्त्री द्वादश्यां पुरुषोत्तमः ।
त्रयोदश्यां सुता तत्र वर्णसङ्करकारिणी ॥
धर्मध्वजः कृतज्ञस्स्यादात्मवेदी दृढव्रतः ।
प्रजायते चतुर्दश्यां गणौघैर्जगतीपतिः ॥
राजपत्नी महाभागा राजवंशगता तथा ।
जायते पञ्चदश्यां तु बहुपुत्रा पतिव्रता ॥
विद्यालक्षणसम्पन्नः सत्यवादी जितेन्द्रियः ।

आश्रयस्सर्वभूतानां षोडश्यां जायते पुमान् ॥

इति । युग्मास्वपि गच्छन् प्रतिषिद्धेतरास्वेव गच्छेत् । तत्र प्रतिषिद्धान्याह मनुः—

अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ।
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥
तासामाद्याश्चतस्रस्तु निन्दितैकादशी तथा ।
त्रयोदशी च शेषास्स्युः प्रशस्ता दश रात्रयः ॥

इति । तासां षोडशरात्रीणां मध्ये रजोदर्शनादारभ्य चतस्रो रात्रीर्वर्जयेत् । अत एव पैठीनसिः—

न प्रथमे न द्वितीये न तृतीये न चतुर्थ आह्वयेत् ।

इति । केचित्तु स्नानादूर्ध्वं चतस्रो वर्जयेदित्याहुः । पूर्वं तस्याः स्पर्शननिषेधेनैव गमनस्यापि निषिद्धत्वात् तद्गमने प्रायश्चित्तविधानाच्च । अतः

'षोडशर्तुर्निशास्स्त्रीणाम्'

इति स्नानादूर्ध्वं वेदितव्यं, तन्न—

ऋतुस्स्वाभाविकस्त्रीणां रात्रयष्षोडश स्मृताः ।
चतुर्भिरितरैस्सार्धमहोभिस्सद्विगर्हितैः ॥

इति मनुवचनविरोधात् । न हि स्नानादूर्ध्वं गर्हिता रात्रयस्सन्ति । तदाह कात्यायनः—

रजस्वला चतुर्थेऽह्नि स्नानाच्छुद्धिमवाप्नुयात् ।

इति । अर्वाक्पुनः—

सैषा ब्रह्महत्या स्त्रीणां यन्मासिमासि

रजोदर्शनं यस्ततो जायते सोऽभिशस्तः ।

इत्यादिभिर्गर्हितश्रवणात् पूर्वोक्तैव ज्यायसी । यत्तु गर्भाधानमधिकृत्य हारीतेनोक्तं—

'चतुर्थेऽह्नि स्नातायां युग्मासु च'

इति तच्चतुर्थेऽह्नि (स्नातायां) रजोनिवृत्तौ द्रष्टव्यम् । अत एव गोभिलः—

'यदर्तुमती भवत्युपरतशोणिता तदा सम्भवकालः'

इति ।

'षोडशर्तुनिशास्त्रीणाम्'

इति वदन् अह्नि गर्भाधाननिषेधमाह । अत एव शङ्खलिखितौ—

'नार्तवे दिवा मैथुनं व्रजेत् । क्लीवा अल्पवीर्याश्च दिवा प्रसूयन्तेऽल्पायुषश्च'

इति । याज्ञवल्क्योऽपि संवेशने विशेषमाह—

एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत् ।

सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ॥

इति । सुस्थ इन्दौ चन्द्रबले सति मघामूले विहाय क्षामां कृशां

सकृद्गच्छन् लक्षण्यं लक्षणयुक्तं पुत्रं जनयेदित्यर्थः । ज्योतिश्शास्त्रेऽपि—

पैत्र्यं पौष्णं नैर्ऋतं चापि धिष्ण्यं
त्यक्त्वा नारीं सुप्रसन्नां प्रसन्नः ।
पुष्टः क्षामां पुत्रकामोऽभिगच्छन्
सल्लक्षण्यं पुत्रमाप्नोति सत्यम् ॥

इति । पैत्र्यं मघानक्षत्रम् । पौष्णं रेवती । नैर्ऋतं मूलम् । धिष्ण्यं नक्षत्रम् । क्षामता तु तस्मिन्काले रजस्वलाव्रतेनैव भवति । यदा रजोनिवृत्तिर्भवति तदा लघ्वाहारादिना क्षामता सम्पादनीया पुत्रोत्पत्त्यर्थम् । पुंसा च शुक्लवृद्ध्यर्थं स्निग्धादिभोजनं कर्तव्यम् । तथा च बृहस्पतिः—

स्त्रियो रजोऽधिके स्त्री स्यात्पुमांच्छुक्लाधिके भवेत् ।
तस्माच्छुक्लविवृद्ध्यर्थं वृष्यं स्निग्धं च भक्षयेत् ॥
लघ्वाहारां स्त्रियं कुर्यादेवं सञ्जनयेत्सुतम् ।

इति । वृष्यं वीर्यवृद्धिकरं द्रव्यम् । मनुरपि—

पुमान्पुंसोऽधिके शुक्ले स्त्री भवत्यधिके स्त्रियः ।
समेऽपुमान्पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः ॥

इति । समे साम्ये वीजद्वयस्य अपुमान्नपुंसक इति यावत् । पुंस्त्रियौ वा यदि तदा वीजविभागः । तदाह यमः—

यदि संयोगकाले तु पुरुषो रागमोहितः ।
द्विधा समुत्सृजेच्छुक्लं यमळं तत्र जायते ॥

इति । क्षीणे निस्सारेऽल्पे च विपर्ययः गर्भाग्रहणम् । ऋतुयौगपद्ये तु गमनक्रममाह देवलः—

यौगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत् ।
रक्षणार्थमपुत्राणां ग्रहणक्रमशोऽपि वा ॥

इति । तीर्थमृतुः । तद्यौगपद्ये तु वर्णक्रमेणोद्वाहक्रमेण वा गच्छेत् । अपुत्राणां पूर्वमित्यर्थः । अनेन ऋतुकालातिक्रमः कथमपि न कार्य इत्युक्तं भवति । अत एव मनुः—

ऋतुकालाभिगामी स्यात्स्वदारनिरतस्सदा ।
पर्ववर्जं व्रजेदेनां तद्व्रतो रतिकाम्यया ॥

इति । तद्व्रतः पुत्रोत्पत्तिव्रतः । अनेन विनाऽपि रतिकाम्यया पुत्रजन्मार्थमृतौ गच्छेदेवेति नियम्यते । अन्यथा दोषश्रवणात् । तथा च पराशरः—

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥

इति । बोधायनोऽपि—

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
पितरस्तस्य तन्मासं तस्मिन्रेतसि शेरते ॥

इति । सन्निधिग्रहणादसन्निधौ न दोष इति मन्तव्यम् । सन्निधा-
वपि यावदशक्तः तावददोष एव । तथा च स्मृतिः—

यस्स्वदारानृतुस्नातान् सन्निधौ नोपगच्छति ।
भ्रूणहत्यामवाप्नोति प्रजा प्राप्ता विनश्यति ॥

एतदजातपुत्रविषयम्—

जायमानो वै ब्राह्मणस्त्रिभिर् ऋणवान् जायते ब्रह्म-
चर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य
एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी ॥

इत्यस्याश्श्रुतेरेकपुत्रोत्पादनेनैव चरितार्थत्वात् । उक्तं च
कूर्मपुराणे—

ऋतुकालाभिगामी स्याद्यावत्पुत्रोऽभिजायते ।

इति । ननु पुत्रान्तरोत्पत्तिविधायकोऽप्यस्ति—

'दशास्यां पुत्रानाधेहि'

इति । सत्यं न त्वियं विधायिका स्यात्, किं तु बह्वपत्यप्रशंसा-
र्था । अत एव नारदः[1]—

ऋणमस्मिन्सन्नयत्यमृतत्वं च गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥
अनन्ताः पुत्रिणो लोका नापुत्रस्येति च श्रुतिः ।

---

[1] वसिष्ठः—ख ; पराशरः—क.

इति । ज्येष्ठपुत्रस्य जननमात्रेण पितुरानृण्यं भवतीत्यभिप्रायः । तथा च मनुः—

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ॥

इति । अत एवेतरेषां कामजन्मत्वमप्याह स एव—

यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते ।
स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥

इति । तेनाजातपुत्रस्यैवायमृतुगमननियम इति सिद्धम् ।

॥ इति स्मृतिचन्द्रिकायां गर्भाधानम् ॥

पुंसवनम्.

अथ पुंसवनम् । तत्र याज्ञवल्क्यः—

गर्भाधानमृतौ पुंसस्सवनं स्पन्दनात्पुरा ।

इति । प्राग्गर्भचलनात्पुंसवनाख्यं कर्म कार्यमित्यर्थः । बैजवापो विशेषमाह—

मासि द्वितीये तृतीये वा पुरा स्पन्दतः ।

इति । पुंसवनमित्यनुवृत्तौ पारस्करोऽपि—

'मासि द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण चन्द्रमा युक्तस्स्यात्'

इति । पुन्नक्षत्राणि च रत्नकोशेऽभिहितानि—

हस्तो मूलं श्रवणः पुनर्वसुर्मृगशिरास्तथा तिष्यः।
पुंसंज्ञितेषु कार्येष्वेतानि शुभानि धिष्ण्यानि ॥

इति । धिष्ण्यानि नक्षत्राणि । बृहस्पतिस्तु गर्भस्पन्दने पुंसवनमाह--

गर्भाधानमृतौ कुर्यात्सवनं स्पन्दिते शिशौ ।

इति । इति पुंसवनम्.

सीमन्तोन्नयनम्.

अथ सीमन्तोन्नयनम् । तत्र लोगाक्षिः—

'तृतीये गर्भमासे सीमन्तोन्नयनं कारयेत्'

इति । आपस्तम्बोऽपि—

'सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि'

इति । बैजावापोऽपि—

'अथ सीमन्तोन्नयनं मासि चतुर्थे पञ्चमे षष्ठे वाऽपि'

इति । साङ्ख्यायनगृह्येऽपि—

'सप्तमे मासि प्रथमे गर्भे सीमन्तोन्नयनम्.'

इति । याज्ञवल्क्योऽपि—

षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च ।

इति । एते आगते जात इत्यर्थः । शङ्खोऽपि—

'गर्भस्पन्दने सीमन्तोन्नयनं यावद्वा न प्रसवः' ।

इति । अत्र शौनकेन विशेष उक्तः—

‘आपूर्यमाणपक्षे यथा पुंसा नक्षत्रेण चन्द्रमा युक्तस्स्यात्’

इति । एतच्च सीमन्तोन्नयनं क्षेत्रसंस्कारत्वात् सकृदेव कार्यं न प्रतिगर्भम् । तथा च हारीतः—

सकृत्संस्कृतसंस्कारास्सीमन्तेन द्विजस्त्रियः ।
यंयं गर्भं प्रसूयन्ते स सर्वस्संस्कृतो भवेत् ॥

इति । देवलोऽपि—

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।

इति । केचित्सीमन्तोन्नयनं गर्भसंस्कार इति प्रतिगर्भमावर्तयन्ति । तथा च विष्णुः—

सीमन्तोन्नयनं कर्म तत्स्त्रीसंस्कार इष्यते ।
केचिच्च गर्भसंस्काराद्गर्भगर्भे[1] प्रयुञ्जते ॥

इति । अकृतसीमन्तायाः प्रसवे सत्यव्रत आह—

स्त्री यदाऽकृतसीमन्ता प्रसूयेत कथं चन ।
गृहीतपुत्रा विधिवत्पुनस्संस्कारमर्हति ॥

इति । एतेषां च पक्षाणां तत्तद्गृह्यानुसारेण व्यवस्था वेदितव्या ।

इति स्मृतिचन्द्रिकायां सीमन्तोन्नयनम्.

गर्भिणीधर्माः.

अथ गर्भिणीधर्माः । तत्र कश्यपः[2]—

---

[1] केचिद्गर्भस्य संस्काराद्गर्भगर्भे—वै. [2] पाद्मोदितं कश्यपः—ख.

नावस्करेषूपविशेन्मुसलोलूखलादिषु ।
जलं च नावगाहेत शून्यागारं च वर्जयेत् ॥
वल्मीकं नाधितिष्ठेत न चोद्विग्नमना भवेत् ।
विलिखेन्न नखैर्भूमिं नाङ्गारेण न भस्मना ॥
न शयालुस्सदा तिष्ठेद्व्यायामं च विवर्जयेत् ।
न तुषाङ्गारभस्मास्थिकपालेषु समाविशेत् ॥
वर्जयेत्कलहं लोकैर्गात्रभङ्गं तथैव च ।
न मुक्तकेशी तिष्ठेत्तु नाशुचिस्स्यात्कदा चन ॥
न शयीतोत्तरशिरा न चैवाधश्शिराः क्वचित् ।
न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती ॥
नामङ्गल्यं वदेद्वाक्यं न च हास्यादिकं तथा ।
कुर्याच्छ्वशुरयोर्नित्यं पूजां मङ्गलतत्परा ॥
तिष्ठेत्प्रसन्नवदना भर्तृप्रियहिते रता ।

इति । तथा मात्स्योदितं कश्यप आह—

सन्ध्यायां नैव भोक्तव्यं गर्भिण्या तु प्रयत्नतः ।
न स्नातव्यं न गन्तव्यं वृक्षमूलेषु सर्वदा ॥
न शयालुस्सदा तिष्ठेन्मश्वच्छायां विवर्जयेत् ।
सर्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत् ॥
कृतरक्षा सुभाषा च वास्तुपूजनतत्परा ।

दानशीला तृतीयायां पार्वत्यां नक्त[1]माचरेत् ॥

पतिव्रता भवेन्नारी विशेषेण तु गर्भिणी ।

यस्तु तस्या भवेत्पुत्रः शतायुर्वृत्ति[2]संयुतः ॥

अन्यथा गर्भपतनमवाप्नोति न संशयः ।

इति । सुश्रुतोऽपि—

'ततः प्रभृति व्यायामव्यवसायातितर्पणादिवास्व-
प्नरात्रिजागरणशोकभययानारोहणवेगधारणकुक्कु-
टासनशोणितमोक्षणानि परिहरेत्'

इति । ततः प्रभृति गर्भग्रहणप्रभृतीत्यर्थः । तद्ग्रहणं च श्रमादि-
भिर्लिङ्गैरवगन्तव्यम् । तान्यपि तेनैवोक्तानि—

'सद्यो गृहीतगर्भायां श्रमो ग्लानिः पिपासा सक्थि-
क्षेदनं[3]शुक्रशोणितयोस्सम्बन्धे स्फुरणं च योन्याः'

इति । गर्भिण्याश्च यदभिलषितं तत्तस्यै दातव्यम् । अन्यथा
दोषश्रवणात् । तथा च याज्ञवल्क्यः—

दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ।

वैरूप्यं मरणं वाऽपि तस्मात्कार्यं प्रियं स्त्रियाः ॥

इति । श्रुतिरपि—

'द्विहृदयां नारीं दौहृदिनीमाचक्षते ।

---

[1] सक्ति —वै. [2] स्थिरायुर्वृद्धि —वै. [3] स्पन्दनं —वै.

तदभिलषितं दद्यात् । वीर्यवन्तं चिरायुषं पुत्रं जनयति’ इति । इति गर्भिणीधर्माः.

जातकर्म.

अथ जातकर्म । तत्र विष्णुः—

जातकर्म ततः कुर्यात्पुत्रे जाते यथोदितम् ।

स्वगृह्य इति शेषः । ततस्स्नानानन्तरमित्यर्थः । तथा च संवर्तः—

जाते पुत्रे पितुस्स्नानं सचेलं तु विधीयते ।

इति । तच्च शीतोदकेन कार्यम् । तदाह जाबालिः—

कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्य[1]मेव वा ।

इति । एतच्च रात्रावपि कार्यं ‘जाते पुत्रे’ इति जननानन्तरमस्य विधानात् । अत एव वासिष्ठः—

पुत्रजन्मनि यज्ञे च तथा सङ्क्रमणे रवेः ।
राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि ॥

इति । यज्ञेऽवभृथे । स्नानग्रहणं दानस्यापि प्रदर्शनार्थम् । अत एव व्यासः—

रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः ।
नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु ॥

इति । तदपि नैमित्तिकदानमित्याह स एव—

---

[1] कार्य—वै.

ग्रहणोद्वाहसङ्क्रान्तियात्राऽऽर्तिप्रसवेषु च ।
दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति ॥
पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षयम् ।

इति । रात्रिस्नाने तु विशेषमाह शाङ्खायनः—

दिवा यदाहृतं तोयं कृत्वा स्वर्णयुतं तु तत् ।
रात्रिस्नाने तु सम्प्राप्ते स्नायादनलसन्निधौ ॥

इति । जातकर्म च नाभिवर्धनात्प्रागेव कार्यम् । तदाह मनुः—

प्राङ्नाभिवर्धनात्पुंसां जातकर्म विधीयते ।

इति । नाभिवर्धनं नाभिच्छेदनम् । हारीतोऽपि तमेवार्थं सहेतुकमाह—

'प्राङ्नाभिच्छेदनात्संस्कारपुण्यार्थान्कुर्वन्ति ।
छिन्नायामाशौचम्'

इति । संस्कारो जातकर्म । पुण्यार्थान् दानानि । जैमिनिरपि—

यावन्न छिद्यते नाळं तावन्नाप्नोति सूतकम् ।
छिन्ने नाळे ततः पश्चात्सूतकं तु विधीयते ॥

इति । यत्तु विष्णुधर्मोत्तरे—

अच्छिन्ननाभ्यां कर्तव्यं श्राद्धं वै पुत्रजन्मनि ।
आशौचोपरमे कार्यमथ वा नियतात्मभिः ॥

इति तद्द्रव्यविप्रकर्त्राद्यभावे वेदितव्यम् । अत एव जाबालिः—

जन्मनोऽनन्तरं कार्यं जातकर्म यथाविधि ।
दैवादतीतकालं चेदतीते सूतके भवेत् ॥

इति । श्राद्धमेतदामद्रव्येण कार्यम् । यदाह प्रचेताः—

स्त्री शूद्रस्स्वपचश्चैव जातकर्मणि वाऽप्यथ ।
आमश्राद्धं तथा कुर्याद्विधिना पार्वणेन तु ॥

इति । स्वपचस्स्वयंपच इत्यर्थः । सत्यव्रतोऽपि—

'पुत्रजन्मनि नाभिकर्तनात्पूर्वं[1] कृतजातकर्मा श्राद्धं[2] कुर्यात्'

इति । यत्पुनर्व्यासेनोक्तं—

द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।
हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला ॥

इति । तदामद्रव्याभावे द्रष्टव्यम् । अतोऽस्य हीनत्वाद्द्रव्यमत्र भोज्यं विवक्ष्यते । द्विजः भोक्ता । आदिपुराणे तु जातश्राद्धे पक्वान्ननिषेधो दर्शितः—

जातश्राद्धे न दद्याद्धि पक्वान्नं ब्राह्मणेष्वपि ।
यस्माच्चान्द्रयणाच्छुद्धिस्तेषां भवति नान्यथा ॥

इति । कुमारजन्मदिनं प्रकृत्याह हारीतः—

'जाते कुमारे पितृणामामोदात्पुण्यं तदाहुः'

---

[1] पुण्यं—क, ख. [2] आमश्राद्धं—ख.

इति। आमोदो हर्षः। पुण्यं दानादिकर्मणि प्रशस्तमित्यर्थः। अत एवादिपुराणं--

देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम्।
आयान्ति तस्मात्तदहः पुण्यं पूज्यं च सर्वदा॥
तत्र दद्यात्सुवर्णं तु भूमिं गां तुरगं रथम्।
छत्रं छागं वस्त्रमाल्यं शयनं चासनं गृहम्॥

इति। प्रतिग्रहश्च नाभ्यामच्छिन्नायाम्। तदर्वाक्क्रियमाणो न दोषायेत्याह शङ्खः--

'कुमारप्रसवे नाभ्यामच्छिन्नायां गुडतिलहिरण्यवस्त्रगो-धान्यप्रतिग्रहेष्वदोषस्तदहरित्येके गुर्वर्थं कुर्वता'

इति। वृद्धमनुरपि--

जाते कुमारे तदहः कामं कुर्यात्प्रतिग्रहम्।
हिरण्यधान्यगोवासस्तिलान्नगुडसार्पिषाम्॥

इति। वृद्धयाज्ञवल्क्योऽपि—

तत्र सर्वं प्रतिग्राह्यं कृतान्नं तु विवर्जयेत्।
भक्षयित्वा तु तन्मोहाद्द्विजश्चान्द्रायणं चरेत्॥

इति। एतच्च प्रतिग्रहविधानं सकुल्यानामेव। तदाह शङ्खः—

'सर्वेषां सकुल्यानां द्विपदचतुष्पदधान्यहिरण्यादि दद्यात्'

इति। एतच्चाशौचमध्येऽपि कार्यम्। तदाह प्रजापतिः—

आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुद्ध्यति ॥

इति । इति स्मृतिचन्द्रिकायां जातकर्म.

नामकरणम्.

अथ नामकरणम् । अत्र यमः—

नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत् ।
पुण्ये नक्षत्रदिवसे मुहूर्ते वा गुणान्विते ॥

इति । पुण्ये नक्षत्रे पुण्ये वाऽहनि प्रशस्ते वा मुहूर्त इत्यर्थः । तथा च मनुः—

नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत् ।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥

इति । जन्मप्रभृति दशम्यां नामधेयं पिता कारयेत्कुर्यादित्यर्थः । नामकरणे तस्याधिकारात् । अत एव शङ्खः—

'कुलदेवतानक्षत्रादिभिरसम्बन्धं[1] पिता कुर्यादन्यो वा कुलवृद्धः'

इति । पितुरभावे कुलवृद्ध इति मन्तव्यम् । अत एव विष्णुपुराणम्—

ततस्तु नाम कुर्वीत पितैव दशमेऽहनि ।

[1] नक्षत्रादिसम्बन्धं – क; नक्षत्राभिसम्बन्धं—ख.

इति । एतच्च शास्त्रान्तरोक्तकालोपलक्षणार्थम् । अत एव याज्ञवल्क्यः—

अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः ।

इति । भविष्यत्पुराणेऽपि—

नामधेयं दशम्यां तु केचिदिच्छन्ति पार्थिव ।
दशम्यामपरे रात्रौ मासे पूर्णे तथाऽपरे ॥
अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषिणः ।

इति । गृह्यपरिशिष्टेऽपि—

'जननाद्दशरात्रे[1] शतरात्रे संवत्सरे वा नामकरणम्'

इति । शङ्खोऽपि विशेषमाह—

'दशम्यामुत्थाप्य पिण्डविवर्धनं पितॄणां तत्र सान्निध्यं (इति श्रुतेः)[2] ब्रह्मणे चाहुतिं पूर्वं पितॄननुमान्य तदहरेव नामकरणं कुर्यात्'

इति । उत्थाप्य पूर्वशय्यात इति शेषः । पिण्डविवर्धनं श्राद्धम् । अत एव पारस्करः—

'दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति'

इति । अत्रापि तत्तद्गृह्यानुसारेण व्यवस्था । मनुस्तत्स्वरूपमाह—

मङ्गल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितम् ।

---

[1] व्युष्टे इत्यधिकः पाठः मदनपारिजाते. [2] मदनपारिजातपाठः.

वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ॥

इति । मङ्गलबलधननिन्दाप्रतिपादकान्येव तेषां क्रमेण नामधेयानि भवन्तीत्यर्थः । अत्रोपपदान्यपि स एवाह—

शर्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम् ।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ॥

इति । शर्मरक्षापुष्टिप्रेष्यवाचकान्येतेषां क्रमेणोपपदानीत्यर्थः । एवं चैवं नामधेयानि भवन्ति--भद्रशर्मा, शक्तिपालः, धनपुष्टः, हीनदासः इति । यमोऽप्युत्तरपदविशेषमाह—

शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः ।
भूतिर्दत्तश्च वैश्यस्य दासश्शूद्रस्य कारयेत् ॥

इति । अत्रापि च—

'मङ्गल्यं ब्राह्मणस्य स्यात्'

इति मनुनोक्तैः पूर्वपदैर्नामधेयानि द्रष्टव्यानि । बैजावापस्त्वन्यथा नामधेयमाह—

'पिता नाम करोत्येकाक्षरं द्व्यक्षरं त्र्यक्षरं चतुरक्षरमपरिमितं वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानान्तम्'

इति । अयमर्थः—घोषवन्ति यान्यक्षराणि वर्गतृतीयचतुर्थानि तान्यादौ कार्याणि । अन्तस्था यरलवास्ते मध्ये कर्तव्याः ।

अभिनिष्ठानो विसर्जनीयः । एतदन्त इत्यर्थः । अथ वा पितामहादिनामसम्बन्धं नाम कुर्यात् यदाह शङ्खः—

'कुलदेवतानक्षत्राभिसम्बन्धं पिता कुर्यादन्यो वा कुलवृद्धः'

इति । स्त्रीणां पुनर्नामधेयं मनुराह—

स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ॥

इति । सुखोद्यं सुखोच्चारणम् । मङ्गल्यं मङ्गलवाचि । दीर्घवर्ण आकार ईकारो वा । अत एव पारस्करः—

'अयुग्माक्षरमाकारान्तं स्त्रियै तद्धितम्'

इति । शङ्खोऽपि—

'ईकारान्तं स्त्रीणामेवं कृते नाम्नि शुचि तत्कुलं भवति'

इति । इति स्मृतिचन्द्रिकायां नामकरणम्.

निष्क्रमणम्.

अथ निष्क्रमणम् । तत्र मनुः—

चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् ।

इति । यस्मिन् जन्मेति शेषः । पुराणेऽपि—

द्वादशेऽहनि कर्तव्यं शिशोर्निष्क्रमणं गृहात् ।

चतुर्थे मासि कर्तव्यं तथाऽन्येषां मतं विभो ॥

इति । ततः किं कर्तव्यमिति ? शङ्ख आह—

चतुर्थे मासि कर्तव्यं बालस्यादित्यदर्शनम् ।

इति । यमोऽपि—

ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम् ।
चतुर्थे मासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम् ॥

इति । लोगाक्षिरपि—

'तृतीये मासे दर्शनमादित्यस्य'

इति । अत्रापि यथास्वगृह्यं व्यवस्था । येषां[1] तु शाखिनामनाम्नातं तेषां तु विकल्प एव[1] ।

इति स्मृतिचन्द्रिकायां निष्क्रमणम् ।

कर्णवेधः.

अथ कर्णवेधः । तत्र ज्योतिश्शास्त्रम्—

कार्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा ।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने ॥
सुनक्षत्रे शुभे चन्द्रे सुस्थे शीर्षोदये शुभे ।
दिनच्छिद्रव्यतीपातविष्टिवैधृतिवर्जिते ।
शिशोरजातदन्तस्य मातुरुत्सङ्गवर्तिनः ।

---

[1] वाक्यमिदं 'ग' पुस्तके न दृश्यते.

सौचिको वेधयेत्कर्णौ सूच्या द्विगुणसूत्रया ॥
हस्तोऽश्विनी स्वातिपुनर्वसू च तिष्येन्दुचित्रा हरिरेवती च ।
चन्द्रेऽनुकूले गुरुशुक्रवारे कर्णौ तु वेध्यावमरेज्यलग्ने ॥

अमरेज्यो बृहस्पतिः ।

इति स्मृतिचन्द्रिकायां कर्णवेधनम् ।

अन्नप्राशनम्

अथान्नप्राशनम् । तत्र मनुः—

षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ।

यमोऽपि—

ततोऽन्नप्राशनं मासि षष्ठे कार्यं यथाविधि ।
अष्टमे वाऽथ कर्तव्यं यद्वेष्टं मङ्गलं कुले ॥

लोगाक्षिरपि—

'षष्ठे मास्यन्नप्राशनं जातेषु दन्तेषु वा' ।

इति । शङ्खोऽपि—

'संवत्सरेऽन्नप्राशनमर्धसंवत्सर इत्येके'

इति । अत्रापि यथास्वगृह्यं व्यवस्था । मार्कण्डेयोऽत्र विशेषमाह—

देवतापुरतस्तस्य धात्र्युत्सङ्गगतस्य च ।
अलङ्कृतस्य दातव्यमन्नं पात्रेऽथ काञ्चने ॥
मध्वाज्यकनकोपेतं प्राशयेत्पायसं तु तत् ।
कृतप्राशमथोत्सङ्गाद्धात्री बालं समुत्सृजेत् ॥

इति। अन्नप्राशनानन्तरं बालस्य जीविकापरीक्षामाह स एव—

देवाग्रतोऽथ विन्यस्य शिल्पं भाण्डानि सर्वशः।
शस्त्राणि चैव शास्त्राणि ततः पश्येत्तु लक्षणम्॥
प्रथमं यत्स्पृशेद्बालः ततो भाण्डं स्वयं तथा।
जीविका तस्य बालस्य तेनैव तु भविष्यति॥

इति। इत्यन्नप्राशनम्.

चूडाकरणम्.

अथ चूडाकरणम्। तत्र मनुः—

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमाब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्॥

यमोऽपि—

ततस्संवत्सरे पूर्णे चूडाकर्म विधीयते।
द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोदनात्॥

इति। वैजावापोऽपि—

"तृतीये वर्षे चूडाकरणम्"

इति। शङ्खोऽपि—

"तृतीये वर्षे चूडाकर्म पञ्चमे वा"

इति। लोगाक्षिरपि—

'तृतीयस्य वर्षस्य भूयिष्ठे गते चूडाः कर्तव्याः'

इति। चूडाश्शिखाः। शौनकोऽपि—

'तृतीये वर्षे चौलं यथाकुलधर्मं वा'

इति । यस्मिन्कुले यथा चूडाकर्म तथैव कार्यमित्यर्थः । अत्रापि तत्तद्गृह्यानुसारेण व्यवस्था । अत्र ऋषिव्यवस्थया चूडादिनियममाह लोगाक्षिः—

दक्षिणतः कमुजा[1] वासिष्ठानामुभयतोऽत्रिकाश्यपानां मुण्डा भृगवः पञ्चचूडा अङ्गिरसः वाजि[2]मेके मङ्गलार्थाशिखिनोऽन्ये यथाकुलधर्मं वा शुक्लपक्षस्य पुण्याहे पर्वाणि वा ।

इति । कमुजा चूडा । वाजिः केशपङ्क्तिः । अन्ये तु शिखामात्रं यत्र क्वचन मङ्गलार्थं कुर्वन्ति । अत्र (च) जन्मप्रभृति वर्षसङ्ख्या वेदितव्या ।

'जन्मनोऽधितृतीये वर्षे चौलं पुनर्वस्वोः'

इत्यापस्तम्बस्मरणात् । पुनर्वसुग्रहणं विहितनक्षत्रोपलक्षणार्थम् । अत एव व्यासः—

अश्विनी श्रवणं स्वाती चित्रा पुष्यपुनर्वसू ।
धनिष्ठारेवतीज्येष्ठामृगहस्तेषु कारयेत् ॥

क्षौरमिति शेषः । तथा निषिद्धान्यपि स एवाह—

नक्षत्रे तु न कुर्वीत यस्मिन् जातो भवेन्नरः ।
न प्रोष्ठदद्वयोः कार्यं नैवाग्नेये च भारत ॥

---

[1] कमुजा केशपङ्क्तिरिति पराशरमाधवीये. [2] राजि—क.

तिथिं प्रतिपदं रिक्तां विष्टिं चैव विवर्जयेत् ।
वारं शनैश्चरादित्यभौमानां रात्रिमेव च ॥

इति । ज्योतिश्शास्त्रेऽपि—

क्षौरे तु मासं क्षपयेद्दिनेश्वरः शनैश्चरस्सप्त कुजस्तथाऽष्टौ ।
आचार्यशुक्रेन्दुबुधाः क्रमेण दद्युर्दशैकादश सप्त पञ्च ॥

इति । तथा केषुचिद्विषयेषु नक्षत्रे निषेधापवादो ज्योतिश्शास्त्रे वर्णितः—

नृपाज्ञया ब्राह्मणसम्मतौ वा[1]बन्धस्य मोक्षे क्रतुदीक्षणेषु[2]।
विवाहकाले मृतसूतके च सर्वेषु शस्तं क्षुरकर्म कार्यम्[3] ॥

इति । इति स्मृतिचन्द्रिकायां चूडाकरणम्.

स्त्रीसंस्काराः.

अथ स्त्रीसंस्काराः । तत्र याज्ञवल्क्यः—

तूष्णीमेताः क्रियास्स्त्रीणां विवाहस्तु समन्त्रकः ।

याः जातकर्मादिचूडाकरणपर्यन्ताः क्रियास्ताः स्त्रीणां विना मन्त्रेण कार्याः । अर्वाक्पुनर्विशेषज्ञापनात्सर्वं मन्त्रेणैव । मनुरपि—

अमन्त्रका तु कार्येयं स्त्रीणामावृदशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥

---

[1] सम्मते च.—ख. [2] बन्धस्य मो... ......क्रतुदीक्षणे वा. ख.
[3] भेषु—ख ; तेषु—हेमाद्रिः.

इति । आवृज्जातकर्मादिक्रिया । अनेनोक्तकर्मकालातिक्रमो न कार्य इत्याह । अत एव तदातिक्रमे प्रायश्चित्तमाह कात्यायनः–

देवतानां विपर्यासे जुहोतिषु कथं भवेत् ।
सर्वप्रायश्चित्तं हुत्वा क्रमशो जुहुयात्पुनः ॥

संस्कारा अतिपद्येरन् स्वकालाच्चेत्कथं चन ।
हुत्वैतदेव कर्तव्याः ये तूपनयनादधः[1] ॥

सर्वप्रायश्चित्तमपि तेनैवोक्तम्––

"सर्वप्रायश्चित्तं च पञ्चभिः प्रत्यृचं 'त्वं नो अग्ने' इति द्वाभ्यां, 'अयाश्चाग्ने', 'ये ते शतम्', 'उदुत्तमम्' इति च"

इति । उपनयनकालातिपत्तौ व्रात्यस्तोमाद्येव[2] । गोविलस्तु विशेषमाह––

तूष्णीमेताः क्रियास्स्त्रीणाममन्त्रेण तु होमतः[3] ।

इति । स्त्रीणां तु विवाह एवोपनयनमित्याह मनुः––

वैवाहिको विधिस्स्त्रीणामौपनायनिकस्स्मृतः[4] ।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥

[1] तूपनयनादयः—ख.
[2] व्रात्यप्रायश्चित्तं भवत्येव—वैद्य.
[3] स्त्रीणां मन्त्रेण तु होमः । मदनपा.
[4] संस्कारो वैदिकस्स्मृतः—मनुः.

इति । अत्र पतिसेवा गुरुशुश्रूषा । गृहार्थो गृहकृत्यं तत्करणमग्निपरिचर्येति । अतश्चात्रापि प्रागुपनयनात्कामचारवादभक्षा इत्यादि समानम् । यत्तु हारितेनोक्तम्—

'द्विविधास्स्त्रियो ब्रह्मवादिन्यस्सद्योवध्वश्च । तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे च भिक्षाचर्येति । सद्योवधूनां चोपस्थिते विवाहे कथंचिदुपनयनमात्रं कृत्वा विवाहः कार्यः'

इति । तत्कल्पान्तराभिप्रायम् । तथा च यमः—

पुरा कल्पे तु नारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनं च वेदानां सावित्रीवचनं तथा ॥
पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः ।
स्वगृहे चैव कन्यायाः भैक्षचर्या विधीयते ॥
वर्जयेदजिनं चीरं जटाधारणमेव च ।

इति । इति स्मृतिचन्द्रिकायां स्त्रीसंस्काराः.

अनुपनीतधर्माः.

अथानुपनीतधर्माः । तत्र गौतमः—

'प्रागुपनयनात्कामचारवादभक्षः'

इति । कामचार इच्छागतिः । कामवादोऽश्लीलादिभाषणम् । कामभक्षः पर्युषितादिभोजनम् । एतेषु प्रागुपनयनान्न दोष इत्यभिप्रायः । तथा च विष्णुपुराणम्—

भक्ष्याभक्ष्ये तथाऽपेये वाच्यावाच्ये तथाऽनृते ।
अस्मिन्काले न दोषस्स्यात्स यावन्नोपनीयते ॥

इति । न पापेय इत्यनेन मद्यादिपाने न दोष इति शङ्कनीयम्। वर्जयेदित्यनुवृत्तौ.

'नित्यं मद्यं ब्राह्मणः'

इति गौतमस्मरणात् । नित्यग्रहणमनुपनीतस्यापि निषेधप्राप्त्यर्थम् । न च प्रागुपनयनाद्ब्राह्मण्यमेव नास्तीत्यपि शङ्कनीयम्.

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।

इति मनुना ब्राह्मणस्य सत उपनयनविधानात् । एवं गौतमादिवचनं महापातकादिव्यतिरिक्तविषयमिति मन्तव्यम् । तथा च स्मृत्यन्तरम्—

स्यात्कामचारभक्षोक्तिर्महतः पातकादृते ।

इति । इतरत्रापि क्वचित्कामभक्षस्यापवादमाह गौतमः—

'ब्रह्मचारी अहुतात् स्यात्'

इति । हुतं हुतशिष्टं चरुपुरोडाशादि । तदत्तीति हुतात् न हुतादहुतात् । यथाऽयमहुतात्स्यात्[1] । तथा चाह यमः—

वैश्वदेवं पुरोडाशमग्निमध्याच्च यद्धुतम् ।
यो ह्यद्यात्[2] च्छिशुराकृष्य मात्रा रक्ष्यः प्रयत्नतः ॥

---

[1] अत्र "तथा पित्रा नियुज्येतेत्यर्थः" एवमधिकपाठो वैद्यनाथीये.

[2] यद्यद्या.—क.

इति । वैश्वदेवं वैश्वदेवाशिष्टम् । तथा कामचारस्याप्यपवादमाह गौतमः—

'ब्रह्मचारी'

इति । यदा तु कथंचिद्गर्भाष्टमकालादुपन[1]यनातिक्रमः तदाऽपि तेन ब्रह्मचारिणा भवितव्यमिति तस्यार्थः । न च ब्रह्मचारीत्येतद्ब्रह्मचारिधर्मप्राप्त्यर्थमिति शङ्कनीयम् । यत आह वसिष्ठः—

न ह्यस्य[2] विद्यते कर्म किंचिदामौञ्जिबन्धनात् ।
वृत्त्या शूद्रसमस्तावद्यावद्वेदेन जायते ॥

इति । गौतमोऽपि—

'यथोपपादमूत्रपुरीषो भवति'

इति । न तस्योदङ्मुखो दिवा रात्रौ दक्षिणामुख इत्यादयो नियमास्सन्तीत्यर्थः । एवं सर्वत्रानियमे प्राप्ते क्वचिन्नियमार्थमाह स एव—

'नास्याचमनकल्पो विद्यते'

इति । कल्पः प्रकार इत्यर्थः । अनेनाचमननिमित्तेष्वाचमनमात्रमस्तीति ज्ञायते; कल्पमात्रस्यैव निषेधात् । अत एवमभिधानेन अनाचान्तस्पर्शेऽपि पित्रादेरशुद्धिर्नास्तीत्याह स एव—

'न तदुपस्पर्शनादाशौचम्'

[1] कालादावुपन—ख; काले उपन—क. [2] नेहास्य—ख.

इति । तावन्मात्रेणैव तस्य प्रयतत्वादित्यभिप्रायः । नन्वेवं तर्हि चण्डालसूतिकादिस्पृष्टस्पर्शेऽप्यशुद्धिर्न स्यात्? मैवं; गौतमवाक्ये चण्डालादेरप्रकृतत्वात्[1] ।

'पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्टुपस्पर्शने सचेलोदकस्पर्शनाच्छुद्ध्येत्'

इत्यत्र वयोविशेषानभिधानाच्च । अतो

'न तदुपस्पर्शनादाशौचम्'

इत्येतत्,

'न तस्याचमनकल्पो विद्यते'

इति प्रकृताचमनविषयमेवेति मन्तव्यम् । अनेनैवाभिप्रायेणापस्तम्बोऽप्याह—

'आऽन्नप्राशनाद्गर्भा नाप्रयता भवन्ति । आ परिसंवत्सरादित्येके । यावता वा दिशो न प्रजानीयुः । ओपनयनादित्यपरम् । अत्र ह्यधिकारश्शास्त्रैर्भवति' ।

इति । अत्र ह्यधिकार इति हेतुबलादन्ये इत्यादिपक्षत्रयं पूर्वपक्षत्वेनोपन्यस्तमित्युक्तं तद्भाष्ये । तथा शुद्ध्यन्तराण्याह गौतमः—

'अन्यत्रापामार्जनप्रधावनावोक्षणेभ्यः । '

इति । अपामार्जनमुच्छिष्टावयवानां सोदकेन पाणिना संमार्ज-

[1] रप्रवृत्तत्वात्.—ख.

नम् । प्रधावनं प्रक्षालनममेध्यालिप्तस्य । अवोक्षणं प्रोक्षणमशुचिसंस्पृष्टस्य । एतेभ्योऽन्यत्राचमनं शुद्धिहेतुरित्यर्थः । एवमाचमनादिभिः कृतशौचमपि नाग्निहोत्रादौ नियुञ्ज्यात् । तदाह गौतमः—

'न त्वे वैनमग्निहवनबलिहरणयोर्नियुञ्ज्यात्'

इति । तस्य मन्त्रहीनत्वादित्यभिप्रायः । मनुरपि—

नैव कन्या न युवतिर्नाल्पविद्यो न बालिशः ।
होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतोऽपि च ॥

इति । न च मन्त्रान्ग्राहयित्वा[1] विनियोग इत्याह गौतमः—

'न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात्'

इति । स्वधानिनयनं प्रेतकर्म । तत्रानुपनीतस्यापि मन्त्राध्ययनमविरुद्धमित्यर्थः । ब्रह्मग्रहणं स्मृत्यङ्गाद्यनिषिद्धार्थम् । मनुरपि—

न ह्यस्मिन्युज्यते कर्म किंचिदा मौञ्जिबन्धनात् ।
नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते ॥

इति । इति स्मृतिचन्द्रिकायामनुपनीतधर्माः.

विद्यारम्भः.

अथ विद्यारम्भः । तत्र मार्कण्डेयः—

प्राप्ते तु पञ्चमे वर्षे अप्रसुप्ते जनार्दने ।
षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाऽष्टमीम् ॥

---

[1] त्वाऽपि—वै.

रिक्तां पञ्चदशीं चैव सौरभौमदिने[1] तथा ।
एवं सुनिश्चिते काले विद्यारम्भं तु कारयेत् ॥
पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीम् ।
स्वविद्यासूत्रकारांश्च स्वां विद्यां च विशेषतः ॥
एतेषामेव देवानां नाम्ना तु जुहुयाद्धृतम् ।
दक्षिणाभिर्द्विजेन्द्राणां कर्तव्यं चात्र पूजनम् ॥
प्राङ्मुखो गुरुरासीनो वारुणाभिमुखं शिशुम् ।
अध्यापयेत्तु प्रथमं द्विजाशीर्भिस्सुपूजितम् ॥
ततः प्रभृत्यनध्यायान्वर्जनीयान्विवर्जयेत् ।
अष्टमीद्वितयं चैव पक्षान्ते च दिनद्वयम्[2] ॥
आशौच इन्द्रयात्रायां भूकम्पे राहुदर्शने ।
व्यतीपाते त्वहोरात्रमुल्कापाते तथैव च ॥

इति । इति स्मृतिचन्द्रिकायां विद्यारम्भः.

उपनयनम्.

अथोपनयनम् । तत्र याज्ञवल्क्यः—

गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम् ।
राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥

इति । उपनयनमेवोपनायनम् । तद्ब्राह्मणस्य गर्भग्रहणादारभ्य जन्मतो वाऽष्टमे वर्षे कार्यम् । एकेन सह वर्तत इति सैकम् ।

---

[1] दिनं—मदनपा. [2] त्रयम्—ख.

तस्मिन्नेकादशे द्वादश इत्यर्थः । राजन्यवैश्ययोरपि गर्भादेव वर्षसङ्ख्या—

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञः गर्भात्तु द्वादशे विशः ॥

इति मनुस्मरणात् । अत्र लोगाक्षिः—

'सप्तमे वर्षे ब्राह्मणस्योपनायनं नवमे राजन्यस्य एकादशे वैश्यस्येति ; गर्भपञ्चमे ब्राह्मणमुपनयेद्गर्भाष्टमे वा गर्भैकादशे राजन्यं गर्भद्वादशे वैश्यं गर्भषोडशे वा'

इति । गौतमस्तु काम्योपनयनमाह—

'नवमे पञ्चमे वा काम्यम्'

इति । तत्रापि गर्भाद्येव वर्षसङ्ख्या । नित्यं काम्यं चोपनयनमुक्त्वा—

'गर्भादिसङ्ख्या वर्षाणाम्'

इति तेनैवोक्तत्वात् । एतच्च ब्राह्मणविषयम् । यदाहाङ्गिराः—

ब्रह्मवर्चसकामस्य पञ्चमेऽब्देऽग्रजन्मनः ।
आयुष्कामस्य नवमे कार्यं मौञ्जीनिबन्धनम् ॥

इति । मनुरपि—

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।

इति । क्षत्रियवैश्ययोस्तु अङ्गिरसोक्तं द्रष्टव्यम्—

षष्ठे तथा द्वादशे च राज्ञो वृद्धिर्बलायुषोः ।
ईहायुषोस्तु वैश्यस्य अष्टमे च चतुर्दशे ॥

इति । ईहा कृष्यादिविषया चेष्टा । अत्र षष्ठाष्टमयोर्बले वेदितव्ये । तथा च मनुः—

राज्ञो बलार्थिनष्षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।

एवमन्यस्मिन्नपि काले फलान्तरोद्देशेन कार्यम् । तदाहापस्तम्बः—

‘अथ काम्यानि—सप्तमे ब्रह्मवर्चसकामम् । अष्टम आयुष्कामम् । नवमे तेजस्कामम् । दशमेऽन्नाद्यकामम् । एकादश इन्द्रियकामम् । द्वादशे पशुकामम्’ ।

इति । एतच्च वर्णत्रयसाधारणम् । तदुपनयनानन्तरमस्य विधानादित्युक्तं तद्भाष्ये । अत्र च ब्राह्मणादीनां द्वितीयं जन्म । तदाह वसिष्ठः—

मातुर्यदग्रे जननं द्वितीयं मौञ्जिबन्धनम् ।

इति । अत्रोपपत्तिमाह मनुः—

तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम् ।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥
वेदप्रदानादाचार्यं पितरं परिचक्षते ।

इति । आपस्तम्बोऽपि—

'स हि विद्यातस्तं जनयति; तच्छ्रेष्ठं जन्म ।
शरीरमेव मातापितरौ जनयतः' ॥

इति । एवं ब्राह्मणादीनां त्रयाणामेव द्विजत्वं न शूद्रस्य । तस्य द्वितीयजन्मनोऽभावात् । तथा च याज्ञवल्क्यः—

मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजास्स्मृताः ॥

इति । अत्र च वर्णव्यवस्थायामृतुनियममाहापस्तम्बः—

'वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यम्'

इति । अथवा माघादयः पञ्च मासा ग्राह्याः । तथा च ज्योतिश्शास्त्रम्—

माघादिषु तु मासेषु मौञ्जी पञ्चसु शस्यते ।

इति । एतच्च वर्णत्रयसाधारणम् । तदुक्तं ज्योतिश्शास्त्र एव—

ऋतुर्वसन्तश्शुभदोऽग्रजानां ग्रीष्मो नृपाणां च शरद्विशां च ।
व्रतस्य बन्धे यदि वाऽखिलानां माघादयः पञ्च भवन्ति मासाः॥

इति । यजुश्शाखिनां तु पुनर्वसन्तग्रहणं नियमार्थमित्युक्तं धर्मभाष्ये[1] । वसन्तादयोऽपि सूर्यस्य राशिद्वययोगाद्भवन्ति । एतदपि तत्रैवोक्तम्—

---

[1] आपस्तम्बधर्म. 1,19.

मृगादिराशिद्वयभानुयोगात् षडर्तवस्स्युश्शिशिरो वसन्तः ।
ग्रीष्मश्च वर्षाश्च शरच्च तद्वत् हेमन्तनामा कथितश्च षष्ठः ॥

इति । मृगो मकरः । अनेन मीनमेषयोर्वसन्त इत्युक्तं भवति । श्रुतिस्तु मधुमाधवावेव वसन्त इत्याह—

‘ मधुश्च माधवश्च वासन्तिकावृतू ’

इति । मधुमाधवौ चैत्रवैशाखौ । एवं तिथ्यादयोऽपि ज्योतिश्शास्त्रेऽ[1]वगन्तव्याः—

नष्टचन्द्रेऽष्टगे[2] शुक्रे निरंशे चैव भास्करे ।
कर्तव्यं नोपनयनं नानध्याये गलग्रहे ॥

इति । राशेः प्रथमभागस्थितस्सूर्यो निरंशः । गलग्रहोऽपि तत्रैवोक्तः—

त्रयोदशीचतुष्कं तु सप्तम्यादित्रयं तथा ।
चतुर्थ्येकाकिनी[3] प्रोक्ता अष्टावेते[4] गलग्रहाः ॥

इति ।

गुरुर्भृगुसुनो धात्रीपुत्रश्शशधरात्मजः ।
स्युरेते ऋग्यजुस्सामाथर्वणामधिपाः क्रमात् ॥

इति । भृगुसुतश्शुक्रः । धात्रीपुत्रोऽङ्गारकः । शशधरात्मजो बुधः । एते ऋगादीनां क्रमेणाधिपा भवन्ति । तस्मिन्वारे तच्छाखीयस्योपनयनं कार्यमित्यभिप्रायः ।

---

[1] श्शास्त्र एवाव.
[2] ष्टमे—ख ; न्द्रेऽस्तगे—क.
[3] कादशी—वैद्य.
[4] नव चैते—वैद्य.

हस्तत्रये पुष्यधनिष्ठयोश्च पौष्णाश्विसौम्यादितिविष्णुभेषु ।
शस्ते तिथौ चन्द्रबलेन युक्ते कार्यौ द्विजानां व्रतबन्धमोक्षौ ॥

इति । इति स्मृतिचन्द्रिकायामुपनयनमुख्यकालाः.

गौणकालाः.

अथ गौणकालाः । तत्र मनुः—

आ षोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते ।
आ द्वाविंशात्क्षत्रबन्धोरा चतुर्विंशतेर्विशः ॥

इति । आकारश्चायमभिविधौ । यत आह व्यासः—

औपनायनिकः कालः परष्षोडशवार्षिकः ।
द्वाविंशतिः परोऽन्यस्य स्याच्चतुर्विंशतिः परः ॥

इति । परोऽन्तिमः । तत ऊर्ध्वं गौणकालोऽपि नास्तीत्यर्थः । अत एव तदातिक्रमे पातित्यमाह यमः—

समतिक्रान्तकालाश्च पतितास्सर्व एव ते ।

इति । व्यासोऽपि—

ब्राह्मणक्षत्रियविशां कालश्चेदत्यगादयम् ।
सावित्रीपतिता व्रात्याः परिहार्याः प्रयत्नतः ॥

इति । परिहार्या इति वदन् एते संसर्गानर्हा इत्याह । अत एव वसिष्ठः—

‘नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्नैभिर्व्यवहरेयुः’ ॥

इति । मनुरपि—

नैतैरपूतैर्विधिवदापद्यपि च कर्हिचित् ।
ब्राह्मान्यौनांश्च सम्बन्धान्नाचरेद्ब्राह्मणस्सह ॥

इति । ब्रह्मसम्बन्धोऽध्यापनादि । अपूतैरकृतप्रायश्चित्तैरित्यर्थः। अत एव सङ्ग्रहकारः—

व्रात्यस्याकृताचित्तस्य न कार्यमुपनायनम् ।
अध्यापनं याजनं च विवाहादि च वर्जयेत् ॥

इति । प्रायश्चित्तमपि याज्ञवल्क्येनोक्तम्—

अत ऊर्ध्वं पतन्त्येते[1] सर्वधर्म[2] वहिष्कृताः[3] ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥

इति । व्रात्यस्तोमो व्रात्यानां प्रायश्चित्तार्थः क्रतुः । तं विहायान्यत्रानधिकार इत्यर्थः । तत्र त्वपत्नीकस्यानधीतवेदस्याकृताधानस्य च वचनादधिकार इत्यविरोधः । वसिष्ठस्तु प्रायश्चित्तान्तरमप्याह—

पतितसावित्रीक उद्दालकव्रतं चरेत् । द्वौ मासौ यावकेन वर्तेत । मासं पयसा । अर्धमासमामिक्षयाऽष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमब्भक्षणं अहोरात्रमुपवासः । अश्वमेधावभृथं वा गच्छेत् व्रात्यस्तोमेन वा यजेत ।

---

[1] त्रयोऽप्येते; भवन्त्येते [2] सर्वकर्म. वे. [3] यथाकालमसंस्कृताः.

इति । अस्यार्थः—उद्दालकेन दृष्टमित्येतदुद्दालकव्रतम् । तत्र द्वौ मासौ यावकेनेत्यादिना तत्स्वरूपमाह—यावको यवकृता यवागूः तयैव मासद्वयं वर्तेत । अयाचितं तु सर्वव्रतसाधारणं हविष्यं भुञ्जीत । विशेषानभिधानात्[1] । तच्च सकृदेव कार्यं प्रायश्चित्तस्य दुःखात्मकत्वात् । उपवासे तूदकस्यापि निवृत्तिः पूर्वमभक्षणेनैव त्रिरात्रविधानादिति । इति गौणकालः ।

अजिनानि.

अथाजिनानि । तत्र गौतमः—

'कृष्णरुरुबस्ताजिनानि'

इति । कृष्णः कृष्णमृगः । रुरुर्गौरमृगः । बस्तः छागः । एतेषामजिनानि ब्राह्मणक्षत्रियविशां क्रमेण भवन्ति । बृहस्पतिः—

कृष्णाजिनं ब्राह्मणस्य रौरवं क्षत्रियस्य तु ।
बस्ताजिनं तु वैश्यस्य सर्वेषां वा गवाजिनम् ॥

इति । पारस्करस्तु—

'सर्वेषां वा गव्यम्'

इति । यमोऽपि—

कृष्णाजिनं ब्राह्मणस्य रौरवं क्षत्रियस्य तु ।
बस्ताजिनं तु वैश्यस्य सर्वेषां रौरवाजिनम् ॥

इति । एतान्युत्तरीयाणि—

[1] भिधाने.—ख.

'कृष्णरुरुवस्ताजिनान्युत्तरीयाणि'

इति शङ्खस्मरणात् । पारस्करोऽपि—

'ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य रौरवं राजन्यस्याजं गव्यं वा वैश्यस्य सर्वेषां वा गव्यम्'

इति । एणः कृष्णमृगः । इति स्मृतिचन्द्रिकायामजिनानि॥

वासांसि.

अथ वासांसि । तत्र गौतमः—

'शाणक्षौमचीरकुतपास्सर्वेषां कार्पासं वाऽविकृतम्'

इति । शाणं शणविकारम् । क्षौममतसीसूत्रनिर्मितम् । चीरं दर्भादिनिष्पन्नम् । कुतपः पार्वतीयाजरोमनिर्मितः कम्बलः । अविकृतमरागसम्बन्धम् । एतानि सर्वेषामविशेषेण वासांसि भवन्तीत्यर्थः । वसिष्ठोऽपि—

'सर्वेषां वा तान्तवमरक्तम्'

इति । मनुस्तु वर्णव्यवस्थया वासोनियममाह—

वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ।

इति । वसिष्ठोऽपि—

'शुक्लमहतं वासो ब्राह्मणस्य कार्पासं माञ्जिष्ठं ।
क्षौमं क्षत्रियस्य पीतं कौशेयं वैशस्य'

इति । अहतस्य लक्षणमाह प्रचेताः—

> ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् ।
> अहतं तद्विजानीयात्सर्वकर्मसु पावनम् ॥

माञ्जिष्ठया विकृतं माञ्जिष्ठम् । केचिद्ब्राह्मणस्य काषायं वस्त्रमिच्छन्ति । तदाहापस्तम्बः—

> 'काषायं चैके वस्त्रमुपदिशन्ति । माञ्जिष्ठं राजन्यस्य हारिद्रं वैश्यस्य ।'

इति । कषायरञ्जितं काषायम् । हरिद्रया विकृतं हारिद्रम् । काषाये तु विशेषमाह गौतमः—

> 'वार्क्षं ब्राह्मणस्य माञ्जिष्ठहारिद्रे इतरयोः'

इति । वृक्षकषायनिर्मितं वार्क्षम् । पैठीनसिस्तु सर्वेषां काषायमाह—

> 'कमण्डलुं यज्ञोपवीतं काषायं वस्त्रमिति समानानि'

इति । एतच्च परिधानार्थम्—

> क्षौमकार्पासकुतपचर्मवल्कल[1]कम्बलाः ।
> सर्वं न धारयेच्छुक्लं वासस्तत्परिधानकम् ॥

इति मनुस्मरणात् । इति स्मृतिचन्द्रिकायां वासांसि.

दण्डाः.

अथ दण्डाः । तत्र मनुः—

---

[1] चर्मवल्वज—वैद्य.

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥

इति । पुराणेऽपि—

ब्राह्मणो बैल्वपालाशौ तृतीयः प्लक्षजस्तथा ।
न्यग्रोधखादिरौ क्षत्रे तथाऽन्यो वेतसोद्भवः ॥
पैलवौदुम्बरौ वैश्ये तृतीयोऽश्वत्थजस्तथा ।

इति । एतच्च न दण्डसमुच्चयार्थं, किं तु विकल्प एव । यदाह यमः—

विप्रस्य दण्डः पालाशो बैल्वो वा धर्मतस्स्मृतः ।
आश्वत्थः क्षत्रियस्याथ खादिरो वाऽपि धर्मतः ।
औदुम्बरोऽथ वैश्यस्य प्लाक्षो वा दण्ड उच्यते ॥

इति । पारस्करस्तु विशेषमाह—

पालाशो ब्राह्मणस्य दण्डः बैल्वो राजन्यस्य औदु-
म्बरो वैश्यस्य सर्वे वा सर्वेषाम्

इति । गौतमोऽपि—

'यज्ञियो वा सर्वेषाम्'

इति । यज्ञियो यज्ञार्ह इत्यर्थः । एतदुक्तदण्डालाभविषयम् । अत एव यमः—

एतेषामप्यलाभे तु सर्वेषां सर्वयज्ञियाः ।

इति । अनेनैवाभिप्रायेणाहापस्तम्बः—

'वार्क्षो दण्ड इत्यवर्णसंयोगेनैक उपदिशन्ति'

इति । दण्डलक्षणमाह यमः—

ऋजवस्ते तु सर्वे स्युरव्रणास्सौम्यदर्शनाः ।
अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः ॥

इति । गौतमोऽपि—

'अपीडिता यूपवक्रास्सशल्काः'

इति । अपीडिता वल्लीवेष्टनादिभिः । यूपवक्रा यूपवन्नताग्रा इत्यर्थः । तथा च व्यासः—

शिरोललाटनासाग्रप्रमाणा यूपवन्नताः ।

इति । मनुरपि दण्डप्रमाणमाह—

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः ।
ललाटसम्मितो राज्ञस्स्यात्तु नासान्तिको विशः ॥

इति । केशान्तिको मूर्धप्रमाण इत्यर्थः । अत एव गौतमः—

'मूर्धललाटनासाग्रप्रमाणाः'

इति । वसिष्ठस्तु विशेषमाह—

'घ्राण[1]सम्मितो ब्राह्मणस्य ललाटसम्मितः क्षत्रियस्य केशसम्मितो वैश्यस्य'

इति । शङ्खोऽपि—

केशावधिललाटांसतुल्याः प्रोक्ताः क्रमेण तु ।

इति । इति स्मृतिचन्द्रिकायां दण्डाः.

---

[1] प्राण. वैद्य.

मेखलाः.

अथ मेखलाः । तत्र गौतमः—

'मौञ्जीज्यामौर्वीसौत्र्यो मेखलाः क्रमेण ।'

इति । मुञ्जनिर्मिता मौञ्जी । सा ब्राह्मणस्य मेखला । मौर्वी मूर्वामयी ज्या धनुर्गुणः क्षत्रियस्य । (शण) सूत्रकृता सौत्री । सा वैश्यस्य । तथा च मनुः—

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ॥

इति । त्रिवृत्त्रिगुणा । तथा च प्रचेताः—

'त्रिगुणाः प्रदक्षिणा मेखलाः'

इति । वसिष्ठस्तु मेखलाविशेषमाह—

'मौञ्जीरशना ब्राह्मणस्य धनुर्ज्या क्षत्रियस्य तान्तवी वैश्यस्य ।'

इति । पैठीनसिरपि—

मौञ्जी मेखलाऽश्मातकी ब्राह्मणस्य वाल्वजी ।
मौर्वी वा राजन्यस्य शाणी क्षौमी वा वैश्यस्य ॥

इति । क्षुमा अतसी । एतदुक्तमुञ्जाद्यभावे वेदितव्यम् । अत एव मनुः—

मुञ्जाऽभावे तु कर्तव्या कुशाश्मातक[1] बल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव च ॥

इति । त्रिवृता त्रिगुणेनेत्यर्थः । मुञ्जग्रहणं मूर्वाद्युपलक्षणार्थम् । अत एव यमः—

विप्रस्य मेखला मौञ्जी ज्या मौर्वी क्षत्रियस्य तु ।
शणसूत्री तु वैश्यस्य मेखला धर्मतस्स्मृताः ॥
एतासामप्यभावे[2] तु कुशाश्मातक[1] बल्वजैः ।
मेखलास्त्रिवृतः कार्याः ग्रन्थिनैकेन वा त्रिभिः ॥

इति । इति स्मृतिचन्द्रिकायां मेखलाः.

यज्ञोपवीतम्.

अथ यज्ञोपवीतम् । तत्र मनुः—

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥

इति । त्रिवृच्च । नवसूत्रम् ‘नव वै त्रिवृत्’ इति श्रुतेः । गृह्यपरिशिष्टेऽपि—

‘उपवीतमयुग्मसरं त्रिवृद्यज्ञोपवीतम्’

इति । अयुग्मसरमयुग्मगुणं त्रिगुणामिति यावत् । एकैकश्च गुणो विषमतन्तुकः त्रितन्तुक एव । अन्यथा नवतन्तुत्वव्याघातात् । उक्तं च देवलेन—

यज्ञोपवीतं कुर्वीत सूत्रेण नवतन्तुकम् ।

---

[1] श्मन्तक—ख. [2] प्यलाभे - वैद्य.

इति । एवं च नवतन्तुकं त्रिवृद्यज्ञोपवीतमित्युक्तं भवति । तदू-र्ध्ववृतं कार्यम् । तदाह दत्तात्रेयः—

अधोवृत्तैस्त्रिभिस्सूत्रैः पुनश्चोर्ध्ववृतैस्त्रिवृत् ।

कात्यायनोऽपि—

त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम् ।

इति । ऊर्ध्ववृतस्य लक्षणमाह सङ्ग्रहकारः—

करेण दक्षिणेनोर्ध्वं गतेन त्रिगुणीकृतम् ।
वलितं मानवे सूत्रं शास्त्र ऊर्ध्ववृतं[1] स्मृतम् ॥

इति । ऊर्ध्वं गतेन ऊर्ध्वं स्थितेन दक्षिणेन करेण यद्वलितं तदू-र्ध्ववृतमित्यर्थः । युक्तं चैतत्, अन्यथा गमनवलनयोर्यौगपद्याद-नेन गतेन वलितमित्यन्वयस्स्यात् । अत्रोपवीतप्रयोगमाह देवलः—

ग्रामान्निष्क्रम्य सङ्ख्याय षण्णवत्यङ्गुलीषु तत् ।
यावत्त्रिगुणितं सूत्रं प्रक्षाल्याब्लिङ्गकैस्त्रिभिः ॥
देवागारेऽथ वा गोष्ठे नद्यां वाऽन्यत्र वा शुचौ ।
सावित्र्या त्रिवृतं कुर्यान्नवसूत्रं तु तद्भवेत् ॥
बिल्वाश्वत्थादियज्ञीयवृक्षस्यान्यतमस्य तु ।
बध्नीयात्तत्सजीवं तु पितृभ्यो नम इत्यथ ॥
ब्रुवन्नावे[2]ष्टितव्यं स्यात्पितृणां तृप्तिदं हि तत् ।
त्रिस्ताडयेत्करतलं देवादीनां हि तृप्तिदम् ॥

---

[1] वलितं वा त्रिकं सूत्रं त्रिवृद् र्ध्ववृतं—वेद्य. [2] अथ त्रिवे—वेद्य.

सव्ये मृदं गृहीत्वाऽस्मिन् स्थापयेद्भूरिति ब्रुवन् ।
पत्रं पुष्पं फलं वाऽपि व्याहृतीभिः प्रतिक्षिपेत् ॥
अभिमन्त्र्याथ भूरग्निं चेति वृत्तत्रयं[1] त्रिभिः ।
हरिब्रह्मेश्वरेभ्यश्च प्रणम्यावदधाति[2] तत् ॥

इति । अथ धारणमन्त्रस्तु गृह्यपरिशिष्टेऽभिहितः—

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

इति । साङ्ख्यायनगृह्येऽपि—

'यज्ञोपवीतमसि यज्ञस्य चोपनह्यामि'

इति । अत्र प्रतितन्तु देवताभेदमाह देवलः—

ओङ्कारः प्रथमस्तन्तुर्द्वितीयोऽग्निस्तथैव च ।
तृतीयो नागदैवत्यश्चतुर्थस्सोमदेवतः ॥
पञ्चमः पितृदैवत्यष्षष्ठश्चैव प्रजापतिः ।
सप्तमो वायुदैवत्यस्सूर्यश्चाष्टम एव च ।
नवमस्सर्वदैवत्य इत्येते नवतन्तवः ॥

इति । अत्र ग्रन्थिनियममाह कात्यायनः—

त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ।

तत्र देवलः—

एकेन ग्रन्थिना तन्तुर्द्विगुणास्त्रिगुणोऽथ[3] वा ।

[1] ग्निश्चेति त्रिवृत्त्रयं—वैद्य. [2] म्याथ ददाति—ख. [3] णोऽपि—वैद्य.

इति । य एतामुपवीतोत्पत्तिं न जानाति तस्य सर्वक्रियानैष्फ-ल्यमाह पितामहः—

य एतं न विजानाति यज्ञसूत्रसमुद्भवम् ।
वेदोक्तं निष्फलं तस्य स्नानदानजपादिकम् ॥
ब्राह्मणो यो न जानाति उपवीतस्य संस्थितिम् ।
मोहात्मा सहते[1] भारं पशुर्गौरिव सर्वदा ॥

इति । कात्यायनस्तु परिमाणान्तरमाह—

पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् ।
तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् ॥

इति । अत्रातिलम्बात्युच्छ्रितप्रतिषेधान्मध्ये कथंचिदलाभे परि-माणान्तरमविरुद्धमिति ज्ञायते । अत एव देवलः—

स्तना[2]दूर्ध्वमधो नाभेर्न कर्तव्यं कथंचन ।

इति । अधोनाभेरित्यतिलम्बाभिप्रायम् । उक्तोपवीतालाभेऽपि स एवाह—

कार्पासक्षौमगोवालशणवल्कतृणोद्भवम् ।
सदा सम्भवता कार्य[3]मुपवीतं द्विजातिभिः ॥

इति । क्षुमा अतसी । वल्कं तरुत्वक् । तृणोद्भवं कुशनिर्मितम् । तथा च गोभिलः—

'यज्ञोपवीतं कुरुते सूत्रं वस्त्रं कुशरज्जुं वा'

[1] वहते—क, ख. [2] स्थाना—ख. [3] धार्य—वैद्य.

इति । बोधायनोऽपि—

'कौशं सूत्रं वा त्रिवृद्यज्ञोपवीतम् ।'

इति । सूत्रमपि वस्त्राभावे वेदितव्यम्—

'अपि वाससा यज्ञोपवीतार्थं कुर्यात्तदभावे त्रिवृता सूत्रेण'

इति ऋष्यशृङ्गस्मरणात् । अनेनोपवीतं नित्यं धार्यमित्युक्तं भवति । अत एव भृगुः—

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखोऽनुपवीतश्च यत्करोति न तत्कृतम् ॥

इति । न चानेन सदोपवीतित्वं कर्मकाल एवेति शङ्कनीयम् । यतस्स एवाह—

मन्त्रपूतं स्थितं काये यस्य यज्ञोपवीतकम् ।
नोत्तारयेत्ततः प्राज्ञो यदीच्छेच्छ्रेय आत्मनः ॥
कायस्थमेव तत्कार्यमुत्थाप्यं[1] न कदा चन ।
सकृदुत्तारणात्तस्य प्रायश्चित्ती भवेत् द्विजः ॥

इति । एतच्चोपवीतं वटोरेकमेव । तदाह देवलः—

ब्रह्मचारिण एकं तु स्नानात्प्रभृति तद्वयम् ।

इति । भृगुरपि—

उपवीतं वटोरेकं द्वे तथेतरयोस्स्मृतम् ।
एकमेव यतीनां स्यादिति शास्त्रस्य निर्णयः ॥

---

[1] मद्यास्यं—क.

इति । इतरयोर्गृहस्थवनस्थयोरित्यर्थः । एतच्च नित्याभिप्रायम् । बहुषु कामश्रवणात् । तदाह देवलः--

बहूनि चायुष्कामस्येत्यादि काम्यं प्रचक्षते ।

इति । केशसंसर्गेऽपि स एवाह--

सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम् ।
सावित्र्या दशकृत्वोऽद्भिर्मन्त्रिताभिस्तदुक्षयेत् ॥
विच्छिन्नं वाऽप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत् ।

इति । मनुस्तु धृतयज्ञोपवीतादिनाशे प्रतिपत्तिंनियममाह--

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृहीत्वाऽन्यानि मन्त्रवत्[1] ॥

इति । इति स्मृतिचन्द्रिकायां यज्ञोपवीतम्.

अग्निकार्यम्.

अथाग्निकार्यम् । तत्र संवर्तः--

अग्निकार्यं च कुर्वीत मेधावी तदनन्तरम् ।

इति । सन्ध्योपासनानन्तरमित्यर्थः । एतच्च कालद्वयेऽपि कार्यम् । तदाह याज्ञवल्क्यः--

अग्निकार्यं ततः कुर्यात्सन्ध्ययोरुभयोरपि ।

इति । सुमन्तुरपि--

ब्रह्मचर्यं ततो भैक्षं सन्ध्ययोराग्निकर्म च ।

---

[1] मन्त्रतः--ग.

इति । केचित्सायमेवाग्निकार्यमिच्छन्ति । तदाहापस्तम्बः—

‘ सायमेवाग्निपूजेत्येके ’

इति । अग्नीन्धनमग्निपूजा । अत एव लोगाक्षिः—

‘ सायमेवाग्निमिन्धीतेत्येके ’

इति । एतच्च होमात्मकमेव न समिदाधानमात्रम् । अत एव शङ्खः—

प्रयतः काल उत्थाय स्नातो हुतहुताशनः ।
कुर्वीत प्रयतो भक्त्या गुरूणामभिवादनम् ॥

इति । हुतशब्दप्रयोगाद्धोम एवायमित्यभिप्रायः । देवता चात्र मान्त्रवर्णिकी । मनुरपि—

दूरादाहृत्य समिधस्सन्निदध्याद्विहायसि ।
सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ॥

इति । विहायसि मण्टपादौ । दूरादपरिगृहीतदेशादित्यर्थः । अत एवापस्तम्बः—

‘ यथा कथा च परपरिग्रहमभिमन्यते स्तेनो ह भवति ’

इति । बैजावापस्तु समिदाहरणे दिङ्नियममाह—

‘ पुराऽस्तमयात्प्रागुदीचीं दिशं गत्वाऽहिंसन्नरण्यात्समिधमाहरेत् । शुष्काः ब्रह्मवर्चसकाम आर्द्रास्तेजस्काम उभयीरुभयकामः ’

इति । पुराऽस्तमयादिति वदन्नस्तमिते निषेधमाह । अत एवाहापस्तम्बः—

'नास्तमिते समिद्धारो गच्छेत्'

इति । समिन्नियमोऽपि वायुपुराणे दर्शितः—

पालाश्यस्समिधः कार्याः खादिर्यस्तदलाभतः ।
शमीरौहितकाश्वत्थास्तदभावेऽर्कवेतसौ ॥

इति । कात्यायनस्तु सार्वत्रिकं समित्प्रमाण[1]माह—

नाङ्गुष्ठादधिका कार्या समित् स्थूलतया क्वचित् ।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥
प्रादेशान्नाधिका न्यूना तथा न स्याद्विशाखिका ।
न सपर्णा[2] न निर्वीर्या होमेषु च विजानता ॥
विशीर्णा विदला ह्रस्वा वक्रा ससुषिरा कृशा ।
दीर्घा स्थूला घुणैर्दष्टा कर्मसिद्धिविनाशिका ॥

इति । आपस्तम्बोऽपि सार्वत्रिकं नियमविशेषमाह—

'नाप्रोक्षितमिन्धनमग्नावादध्यात्'

इति । अग्निकार्याकरणे दृष्टदोषमप्याह हारीतः—

पुरा जग्राह वै मृत्युः हिंसयन्ब्रह्मचारिणम् ।
अग्निस्तं मोक्षयामास तस्मात्परिचरेद्धि तम् ॥
ब्रह्मचारी यदा त्वग्नावादध्यात्समिधो न हि ।
गृह्णीयात्तं तदा मृत्युरादध्यात्समिधस्ततः ॥

इति । इति स्मृतिचन्द्रिकायामग्निकार्यम्.

---

[1] समिल्लक्षण—ख. [2] नासपर्वा—वैद्य.

गुर्वादिस्वरूपनिरूपणम्

इदानीमभिवादनाद्युपयोगित्वेन गुर्वादिस्वरूपनिरूपणं क्रियते । तत्र मनुः—

निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥

निषेको गर्भाधानम् । अन्नसंभावनं वेदप्रदानस्यापि प्रदर्शनार्थम् । अत एव याज्ञवल्क्यः—

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ।

क्रियाः निषेकाद्याः । एवं च यो निषेकादीन्युपनयनान्तानि कृत्वा वेदं प्रदाय चान्नेन सम्भावयति स गुरुरित्युक्तं भवति । एतच्च गुरुत्वं पितुरेव नान्यस्य । तस्यैव निषेकाद्यधिकारात् । ततश्च पितुरेवोपनयनादावधिकार इत्युक्तं भवति । अत एव बृहस्पतिः—

एवं दण्डादिभिर्युक्तं संस्कृत्य तनयं पिता ।
वेदमध्यापयेद्यत्नाच्छास्त्रं मन्वादिकं तथा ॥

इति । एवं च—

उपनीय ददद्वेदमाचार्यस्स उदाहृतः ।

इति यदाचार्यस्योपनयनादिकर्तृत्वं तत्पितुरभावे योग्यताविरहे वा द्रष्टव्यम् । सन्निहितयोग्यपितृपरित्यागे कारणाभावात् । योग्यताविरहे च परित्यागोऽस्त्येव । तथा च यमः—

नाध्यापयति नाधीते पतनीयेषु वर्तते ।
इत्येतैर्लक्षणैर्युक्तस्त्यक्तव्यो व्रतिना गुरुः ॥

इति । गुरुरत्रोपनेता । अत एवापस्तम्बः—

तमसो वा एष तमः प्रविशति यमविद्वानुपनयते यश्चाविद्वानिति हि ब्राह्मणम् । तस्मिन्नभिजनविद्यासमुदेतं समाहितं संस्कर्तारमीप्सेत् ।

इति । यश्चाविद्वानुपनयते सोऽपि तमः प्रविशतीत्यर्थः । एतच्च लक्षणाभिधानं पितृव्यतिरिक्तानां गुरुत्वमौपचारिकमिति दर्शयितुम् । अत एव मनुः श्रुतो[1]पकारिणः पूज्यत्वमात्राभिप्रायेण गुरुशब्दमाह—

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विन्द्याच्छ्रुतोपक्रियया तया ॥

इति । अपिशब्दप्रयोगादित्यभिप्रायः । यत्तु देवलेनोक्तम्—

उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलश्श्वशुरस्त्राता मातामहपितामहौ ॥
वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवस्स्मृताः ।
माता मातामही गुर्वी पितुर्मातुश्च सोदराः ॥
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवस्स्त्रियाम् ।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विधा ॥

[1] कृतो—क. ख.

इति । तदपि पित्रादिवन्मान्यत्वाभिप्रायम् । तथा च व्यासः—

मातामहो मातुलश्च पितृव्यश्श्वशुरो गुरुः ।
पूर्वजस्स्नातकश्चर्त्विक् मान्यास्ते गुरवस्सदा ॥
मातृष्वसा मातुलानी श्वश्रू[1]र्धात्री पितृष्वसा ।
पितामही पितृव्यस्त्री गुरुस्त्री मातृवच्चरेत् ॥

इति । मनुरपि—

पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥

इति । आचार्यस्यापि लक्षणमाह याज्ञवल्क्यः—

उपनीय ददद्वेदमाचार्यस्स उदाहृतः ।

इति । यो यस्योपनयनमात्रं कृत्वा वेदं प्रयच्छति स तस्याचार्य इत्यर्थः । वेदग्रहणं कल्पसूत्रादेरपि प्रदर्शनार्थम् । अत एव मनुः—

उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥

इति । रहस्यमुपनिषत् । एतच्चोपनयनादिकर्तृत्वं पितुरभावे ज्येष्ठभ्रातुरेव वेदितव्यम्—

पितृवत्पालयेत्पुत्रान् ज्येष्ठो भ्राता यवीयसः ।
पितृवच्चापि वर्तेरन् ज्येष्ठभ्रातरि धर्मतः ॥

---

[1] स्वसा—वैद्य.

इति मनुना तयोः पितृपुत्रधर्मातिदेशात् । यस्तु वेदभागमङ्गानि वा वृत्त्यर्थमध्यापयति स उपाध्यायः । तदाह मनुः—

एकदेशं तु वेदस्य वेदाङ्गान्यथ वा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायस्स उच्यते ॥

इति । वृत्तिर्जीविका । अत एव शङ्खः—

भृतकाध्यापको यस्तु उपाध्यायस्स उच्यते ।

इति । मूल्येनाध्यपनं भृतकाध्यापनम् । तथा च विष्णुः—

'यस्त्वेनं मूल्येनाध्यापयेत्तमुपाध्यायम्'

इति । विद्यादिति शेषः । ऋत्विग्लक्षणमपि मनुनैवोक्तम्—

अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान् ।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ॥

इति । एते च पूर्वोक्ताचार्योपाध्यायर्त्विजो यथापूर्वं मान्या वेदितव्याः । तथा च याज्ञवल्क्यः—

एते मान्या यथापूर्वं येभ्यो माता गरीयसी ।

मान्याः पूज्या इत्यर्थः । गरीयसी गुरुतरा पूज्यतमेति यावत् । देवलोऽपि—

गुरूणामपि सर्वेषां पूज्याः पञ्च विशेषतः ।
यो भावयति या सूते येन विद्योपदिश्यते ॥
ज्येष्ठभ्राता च भर्ता च पञ्चैते गुरवस्स्मृताः ।
तेषामाद्यास्त्रयश्श्रेष्ठास्तेषां माता सुपूजिता ॥

इति । अत्रोपपत्तिमाह व्यासः—

मासान्दशोदरस्थं या धृत्वा शूलैस्समाकुला ।
वेदनाविविधैर्दुःखैः प्रसूयेत विमूर्च्छिता ॥
प्राणैरपि प्रियान्पुत्रान्मन्यते सुतवत्सला ।
कस्तस्या निष्कृतिं कर्तुं शक्तो वर्षशतैरपि ॥

इति । अत इयं पूज्यतमेत्यभिप्रायः । तस्या निष्कृतिरानृण्यम् । अत्र शङ्खः—

'न पुत्रः पितुर्मुच्येतान्यत्र सौत्रामणीयागाज्जीवन्नृ-
णान्मातुः'

इति । मनुरपि मातैव गरीयसीत्याह—

उपाध्यायान् दशाचार्य आचार्याणां शतं पिता ।
सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते ॥

इति । एतच्च संस्कारादिकरणरहितोत्पादकमात्रविषयम् । अन्यथा तु पितैव श्रेयान् । तथा च पुराणम्—

द्वौ गुरू पुरुषस्येह पिता माता च धर्मतः ।
धरा गुरुतरा तद्वन्माता गुरुतरा ततः ॥
तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे तु पूर्वजः ॥

इति । आचार्योऽपि जनकमात्रापेक्षया गरीयानेव । तदाह मनुः—

उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता ।

ब्रह्मद आचार्यः न तूपाध्यायः । यतोऽनन्तरमाह—

ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ।

यद्ब्रह्मग्रहणार्थं जन्मोपनयनाख्यं तद्यतः करोतीत्यर्थः । यस्तु बालो वृद्धमध्यापयति सोऽपि गरीयानित्याह विष्णुः—

'बाले समानवयसि वाऽध्यापके गुरुवद्वर्तेत'

इति । अत्र पुरावृत्तमाह मनुः—

अध्यापयामास पितॄन्शिशुराङ्गिरसः कविः ।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥
ते तमर्थमपृच्छन्त देवानागतमन्यवः ।
देवाश्चैतान् समेत्योचुर्न्याय्यं वश्शिशुरुक्तवान् ॥
अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बाल इत्याहुः पितेत्येव च मन्त्रदम् ॥
न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानस्स नो महान् ॥

हायनादिभिर्महत्त्वमिति न धर्मं व्यवस्थापितवन्तः । किं तु योऽनूचानः प्रवक्ता स एव महानिति । अत एव चास्मै न द्रुह्यात् । तदाह मनुः—

य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ ।
स माता स पिता ज्ञेयस्तं न द्रुह्येत्कदाचन ॥

आवृणोत्यापूरयति । अवितथं विस्वरादिरहितं कृत्वेत्यर्थः । व्यासोऽपि—

उपाध्यायं पितरं मातरं च
ये द्रुह्यन्ति मनसा कर्मणा वा ।
तेषां पापं भ्रूणहत्याविशिष्टं
तस्मादेभ्यः पापकृन्नास्ति[1] लोके ॥

मनुरपि—

आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ॥

इति । यस्तु पित्रोर्नित्यं प्रियमेवाचरति स धर्मजातमवाप्नोतीत्याह देवलः—

यावत्पिता च माता च द्वावेतौ निर्विकारिणौ ।
तावत्सर्वं परित्यज्य पुत्रस्स्यात्तत्परायणः ॥
माता पिता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रस्सकलं धर्मं प्राप्नुयात्तेन कर्मणा ॥

विकारो मरणम् । मनुरपि—

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिश्शक्या कर्तुं वर्षशतैरपि ॥
तयोर्नित्यं प्रियं ब्रूयादाचार्यस्य च सर्वदा ।
तेषु हि त्रिषु तुष्टेषु तपस्सर्वं समाप्यते ॥

---

[1] नान्यस्तेभ्यः पापकृत्त्वस्ति—क.

तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ।
न तैरभ्यननुज्ञातो धर्ममन्यं समाचरेत् ॥
त एव हि त्रयो लोकास्त एव त्रय आश्रमाः ।
त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः ॥
पिता वै गार्हपत्याग्निः माताऽग्निर्दक्षिणस्स्मृतः ।
गुरुराहवनीयोऽग्निस्साऽग्नित्रेता गरीयसी ॥
इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् ।
गुरुशुश्रूषया चैव ब्रह्मलोकं समश्नुते ॥
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥
यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् ।
तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ॥
तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् ।
तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ॥
एष धर्मः परस्साक्षादुपधर्मोऽन्य उच्यते ।

पारत्र्यं पारलौकिकम् । देवलोऽपि—

नास्ति मातृसमं दैवं नास्ति पित्रा समो गुरुः ।
तयोः प्रत्युपकारो हि न कथंचन विद्यते ॥

इति । इति स्मृतिचन्द्रिकायां गुर्वादिनिरूपणम्.

अभिवादनम्.

अथाभिवादनम् । तत्र याज्ञवल्क्यः—

ततोऽभिवादयेद्विद्वानसावहमिति ब्रुवन् ।

ततोऽग्निकार्यादनन्तरमित्यर्थः । असा[1]वित्यस्य स्थाने स्वं नाम[2] कीर्तयेत् । तथा च मनुः—

अभिवादात्परं विप्रो ज्यायांसमभिवादयन्[3] ।
असौ नामाऽहमस्मीति स्वं नाम परिकीर्तयेत् ॥

अभिवादात् 'अभिवादये' इत्यस्य शब्दस्योपरि देवदत्तनामाऽहमस्मीति स्वनाम ब्रूयात् । अस्योपरि भोश्शब्दोऽपि कीर्तनीयः । तदाह स एव—

भोश्शब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।

इति । एवं सत्येवं प्रयोगोभवति–'अभिवादये देवदत्तनामाऽहमस्मि भो' इति । अत्रापस्तम्बः—

'दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयीतोरस्समं राजन्यो मध्यसमं वैश्यो नीचैश्शूद्रः प्राञ्जलिः'

इति । एतच्च हस्तद्वयेन कार्यमन्यथा दोषश्रवणात् । तथा च विष्णुः—

जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत् ।
सर्वं तन्निष्फलं याति एकहस्ताभिवादनात् ॥

एतदपि विद्वद्विषयम् । यदाह स एव—

---

[1] अत्रासावि—क. [2] स्वनाम—क. [3] वादयेत्—वैद्य.

शिष्याणामाशिषं दद्यात् पद्माकारौ गुरोस्थ[1] ।
अजाकर्णेन विदुषां मूर्खाणामेकपाणिना ॥

पद्माकारौ व्यत्यस्तावित्यर्थः । अत्रिरपि—

दक्षिणं पाणिमुद्धृत्य प्राकारमभिवादयेत् ।
श्रोत्रिये त्वञ्जलिः कार्यः पादोपग्रहणं गुरोः ॥

इति । ब्राह्मणसमवाये त्वभिवादनक्रममाह मनुः—

लौकिकं वैदिकं वाऽपि तथाऽऽध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ॥

इति । एतच्च प्रत्युत्थाय कार्यम् ।

'सर्वत्र प्रत्युत्थायाभिवादनम्'

इत्यापस्तम्बस्मरणात् । मनुरपि—

ऊर्ध्वं प्राणा ह्युत्क्रमन्ति यूनः स्थविर आगते ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥

एतच्छीलस्यायुरादयोऽपि विवर्धन्त इति स एवाह—

अभिवादनशीलस्य नित्यवृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥

---

[1] (*a*) पद्माकारकरो गुरुः—ग.

(*b*) पादोपग्रहणं गुरोः । स्पृष्ट्वा कर्णौ तु विदुषां—वैद्य.

(*c*) पादसङ्ग्रहणं गुरोः । स्पृष्ट्वा कर्णौ तु विदुषां—स्मृतिर.

इति । अभिवादितेन यद्वदितव्यं तदपि मनुरेवाह—

आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥

अकार इत्येतन्नाम्नोऽन्तस्वरोपलक्षणार्थं, नाम्नस्सर्वत्राकारान्तत्वनियमाभावात् । अतश्चाभिवादकनाम्नोऽन्ते योऽयमकराद्यस्स्वरः पूर्वाक्षरस्स एव प्लुतः कार्यः । न पुनरपूर्वोऽकारो नाम्नोऽन्ते विधीयते । पूर्वाक्षरत्वं च पूर्वमक्षरं यस्य स पूर्वाक्षर इति । वसिष्ठोऽपि—

'आमन्त्रिते स्वरोऽन्त्योऽस्य प्लुतः'

इति । आमन्त्रिते कर्तव्येऽभिवादकनाम्नोऽन्ते यस्स्वरस्स प्लुतो भवति त्रिमात्रो भवतीत्यर्थः । एवं चैवं प्रयोगो भवति—'आयुष्मान् भव सौम्य देवदत्ता' इति । ये तु नामसम्बन्धं प्रत्यभिवादनं न जानते तानभिवादयन् 'अहं भो' इति ब्रूयात् । सर्वास्स्त्रियश्च । तथा च मनुः—

नामधेयस्य ये केचिदभिवादं न जानते ।
तान्प्राज्ञोऽहमिति ब्रूयात्स्त्रियस्सर्वास्तथैव च ॥

इति । यस्तु प्रत्याभिवादनस्वरूपमेव न जानाति नासावभिवाद्य इत्याह स एव—

यो नवेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यस्स विदुषा यथा शूद्रस्तथैव सः ॥

इति । यः पुनर्जानन्नपि प्रत्यभिवादनादि न करोति तस्य दोषो भविष्यत्पुराणे दर्शितः—

अभिवादे कृते यस्तु न करोत्यभिवादनम् ।
आशिषं वा न कुरुते[1] स याति नरकं ध्रुवम् ॥
अभिवादे कृते यस्तु तं विप्रं नाभिवादयेत् ।
श्मशाने जायते वृक्षो गृध्रकाकोपसेवितः ॥

इति । यमोऽपि—

अभिवादे तु यः पूर्वमाशिषं न प्रयच्छति ।
यद्दुष्कृतं भवेत्तस्य तस्माद्भागं प्रपद्यते ॥
तस्मात्पूर्वाभिभाषी स्याच्चण्डलस्यापि धर्मवित् ।
सुरां पिबेति वक्तव्यमेवं धर्मो न हीयते ॥

इति । आशिषमपि स एवाह—

स्वस्तीति ब्राह्मणो ब्रूयादायुष्मानिति भूमिपः ।
वर्धतामिति वैश्यस्तु शूद्रस्तु स्वागतं वदेत् ॥

एतच्च सर्ववर्णसाधारणम् । तथा च भविष्यत्पुराणे—

ब्राह्मणस्सर्ववर्णानां स्वस्ति कुर्यादिति स्थितिः ।

स्वस्तिशब्दार्थमपि यम एवाह—

यत्सुखं त्रिषु लोकेषु व्याधिव्यसनवर्जितम् ।
यस्मिन्सर्वे स्थिताः कामास्सा स्वस्तीत्यभिसंज्ञिता[2] ॥

---

[1] कुरुश्रेष्ठ—२वैद्य.

[2] तत्स्वस्तीत्यभिसंज्ञितम्—वैद्य.

एतच्चाभिवादनमधिकवयसामेव कार्यं,

'ज्यायांसमभिवादयेत्'

इति मनुस्मरणात् । अत एव चर्त्विगादीनां मान्यत्वेऽपि कनीयसामनभिवाद्यत्वमाह गौतमः—

'ऋत्विक्छ्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थानमनभिवाद्याः'

इति । यत्तु वसिष्ठेनोक्तम्—

'ऋत्विक्छ्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवदेत्'

इति । तदप्यभिवदेदाभिमुख्येन वदेदित्यभिभाषणमात्राभिप्रायम् । अत एव बोधायनः—

'ऋत्विक्छ्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थायाभिभाषणम्'

इति । अभिभाषणेऽपि नियममाह मनुः—

ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥

इति । आपस्तम्बोऽपि—

'कुशलमवरवयसं वयस्यं वा पृच्छेत्'

इति । वयस्यस्समानवयाः । एतदपि श्रोत्रियविषयम् । यदाह स एव—

'नासम्भाष्य श्रोत्रियं व्यतिक्रमेदरण्ये च स्त्रियम्'

इति। स्त्रीसम्भाषणेऽपि नियममाह मनुः--

परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः।
तां ब्रूयाद्भवतीत्येव सुभगे भगिनीति वा॥

एवं च कनीयसि वयस्ये वाऽभिभाषणमात्रं, ज्यायस्यभिवादनमिति मन्तव्यम्। तत्र ज्यायस्त्वं कियता कालेन भवतीत्यपेक्षिते मनुराह—

दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम्।
त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु॥

समानपुरनिवासिनां दशभिर्वर्षैः पूर्वस्सखा भवति। ततोऽधिको ज्यायान्। कलाभृतां गीतनृत्यादिविद्यावतां पञ्चाब्दपूर्वस्सखा। श्रोत्रियाणां वेदाध्यायिनां त्र्यब्दपूर्वस्सखा भवति। ततोऽधिको ज्यायान्। स्वयोनिषु भ्रात्रादिषु स्वल्पेनापि वयसा पूर्वस्सखा भवति। ततोऽधिकोऽप्यभिवाद्य इत्यर्थः। एतच्च ब्राह्मणविषयम्। यदाह मनुः—

ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम्।
पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता॥

अतो ब्राह्मण एवाभिवाद्य इत्यभिप्रायः। अत एव शातातपः—

अभिवाद्यो नमस्कार्यश्शिरसा वन्द्य एव च।
ब्राह्मणः क्षत्रियाद्यैस्तु श्रीकामैस्सादरं सदा॥

नाभिवाद्यास्तु विप्रेण क्षत्रियाद्याः कदा चन ।
ज्ञानकर्मगुणोपेता यद्यप्येते बहुश्रुताः ॥

इति । अत एव क्षत्रियाद्यभिवादने प्रायश्चित्तमप्याह स एव—

क्षत्रं वैश्यं वाऽभिवाद्य प्रायश्चित्तं कथं भवेत् ।
ब्राह्मणानां दशाष्टौ च अभिवाद्य विशुध्यति ॥

अभिवाद्य द्विजश्शूद्रं सचेलं स्नानमाचरेत् ।
ब्राह्मणानां शतं सम्यगभिवाद्य विशुध्यति ॥

अर्चयेत्पुण्डरीकाक्षं देवं वाऽपि त्रिलोचनम् ।
ब्राह्मणं वा महाभागमभिवाद्य विशुध्यति ॥

ब्राह्मणेष्वपि क्वचित्क्वचिदभिवादस्याप[1]वादमाह विष्णुः—

सभासु चैव सर्वासु यज्ञे राजगृहेषु च ।
नमस्कारं प्रकुर्वीत ब्राह्मणान्नाभिवादयेत् ॥

गुर्वादिविषये त्वभिवादन एव विशेषमाह गौतमः—

'गुरोः पादोपसङ्ग्रहणं प्रातः'

इति । गुरुरत्राचार्यः । यतस्स एवाह—

'मातृपितृतद्बन्धूनां पूर्वजानां विद्यागुरूणां तद्गुरूणां च'

इति । पूर्वजा ज्येष्ठभ्रातरः । विद्यागुरव उपाध्यायाः । तद्गुरवो

[1] वादनाप—क. ख.

मात्रादिगुरवः । एतेषामपि पादोपसङ्ग्रहणं कार्यमित्यर्थः । पादोपसङ्ग्रहणं पादस्पर्शनम् । तत्प्रकारमाह मनुः—

व्यत्यस्तपाणिना कार्यमुपसङ्ग्रहणं गुरोः ।
सव्येन सव्यस्स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥

सव्यदक्षिणाभ्यां पाणिभ्यां गुरोस्सव्यदक्षिणपादौ स्पृशेदित्यर्थः । अत्र विशेषमाह पैठीनसिः—

'उत्तानाभ्यां हस्ताभ्यां दक्षिणेन दक्षिणं सव्येन सव्यं पादावभिवादयेत्'

इति । बोधायनोऽपि—

'श्रोत्रे संस्पृश्य'

इति । उपसङ्ग्रहणमिति शेषः । एतच्च गुरुपत्नीनामपि कार्यम् । तदाह मनुः—

गुरुवत्प्रतिपूज्यास्स्युस्सवर्णगुरुयोषितः ।
असवर्णास्तु सम्पूज्याः प्रत्युत्थानाभिवादनैः ॥

एवं भ्रातृभार्या अप्युपसङ्ग्राह्याः । तदाह स एव—

भ्रातृभार्योपसङ्ग्राह्या सवर्णाऽहन्यहन्यपि ।
विप्रोष्य[1] तूपसङ्ग्राह्या ज्ञातिसम्बन्धयोषितः ॥

इति । एवमविशेषेणोपसङ्ग्रहणे प्राप्ते क्वचिदपवादमाह स एव—

---

[1] विप्रस्य—क.

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः ।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥

अत्र हेतुमाह स एव—

अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥

विद्वांसमविद्वांसं वा स्त्रियः कामादिवशगमुत्पथं नेतुं यतोऽलं समर्था इत्यर्थः । अतः—

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि ।
विधिवद्वन्दनं कुर्यादसावहमिमिति ब्रुवन् ॥
विप्रस्तु[1] पादग्रहणमन्वहं चाभिवादनम् ।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् ॥

अत्राभिवादनविधानमाहापस्तम्बः—

'न सोपानद्वेष्टितशिरा अवहितपाणिर्वाऽभिवादयीत'

इति । अवहितपाणिरप्रसारितपाणिः । प्रचेतसाऽप्युक्तं—

'सोपानत्कस्त्वाचमनशयनयानारोहणाभिवादनन-
मस्कारादीन्वर्जयेत्'

इति । शङ्खोऽपि—

'नोदकुम्भहस्तोऽभिवादयेन्न भैक्षं चरन्नपुष्पान्न[2]-
हस्तो नाशुचिर्न देवपितृकार्यं कुर्वन्न शयानः'

इति । आपस्तम्बोऽपि—

---

[1] विप्रस्य ; — ख. विप्रोष्य - वैद्य. [2] पुष्पाज्य - वैद्य.

'अप्रयतेन नाभिवाद्यम् । तथाऽप्रयताय । अप्रयतश्च न प्रत्यभिवदेत् । प्रतिवयसः स्त्रियः'

इति । बोधायनोऽपि—

'समिद्धार्युदकुम्भपुष्पान्नहस्तो नाभिवादयेत्'

इति । एवमभिवाद्येऽपि द्रष्टव्यम् । तथा चापस्तम्बः—

समित्पुष्पकुशाज्याम्बुमृदन्नाक्षतपाणिकम्[1] ।
जपं होमं च कुर्वाणं[2] नाभिवाद्येत वै द्विजम्[3] ॥

कात्यायनोऽपि—

स्रुक्पाणिकमनाज्ञात[4]मशक्तं रिपुमातुरम् ।
योगिनं च तपस्सक्तं कनिष्ठं नाभिवादयेत् ॥

शातातपोऽपि—

उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीम् ।
अभिवाद्य द्विजो मोहादहोरात्रेण शुध्यति ॥
पाषण्डं पतितं व्रात्यं महापातकिनं शठम् ।
नास्तिकं च कृतघ्नं च नाभिवन्देत्कथं चन ॥
धावन्तं च प्रमत्तं च मूत्रोत्सर्जनतत्परम्[5] ।
भुञ्जानमाचमानार्हं नाभिवादेत् द्विजोत्तमः ॥
वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम् ।
अभ्यक्तशिरसं चैव स्नास्यन्तं नाभिवादयेत् ॥

---

[1] पाणितः. [2] कुर्वाणः. [3] नाभिवाद्यो द्विजो भवेत्—ख.
[4] कुशपाणिमविज्ञात—ख. [5] मूत्रोच्चारकृतं तथा—वेद्य.

तथा च जमदग्निः—

देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदण्डिनम् ।
नमस्कारं न कुर्याच्चेदहोरात्रेण शुद्ध्यति ॥

इति स्मृतिचन्द्रिकायामभिवादनम्.

मान्यत्वनिमित्तानि.

अथ मान्यत्वनिमित्तानि । तत्र याज्ञवल्क्यः—

विद्याकर्मवयोबन्धुवित्तैर्मान्या यथाक्रमम् ।

विद्या श्रुतिस्मृती । कर्म विहितक्रिया । वय आत्मनोऽतिरिक्तम् । बन्धुस्स्वजनसम्पत्तिः । वित्तं धनम् । एतैर्युक्ताः क्रमेण मान्या वेदितव्याः । पूर्वं पूर्वं गरीय इत्यर्थः । तथा च मनुः—

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥

मान्यस्थानानि मान्यत्वनिमित्तानीत्यर्थः । एतेभ्यो वित्तादिभ्यः श्रुतं गरीयः तस्य दृष्टादृष्टमूलत्वात् । तदाह गौतमः—

‘श्रुतं तु सर्वेभ्यो गरीयस्तन्मूलत्वाद्धर्मस्य’

इति । एतैर्वित्तादिभिर्युक्तो हीनजातिरप्युत्कृष्टजातिवन्मान्य इत्याह मनुः—

पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युस्सोऽत्र मानार्हश्शूद्रोपि दशमीं गतः ॥

वर्षशतस्यान्तिमो भागो दशमी । नवतिहायनातीत इत्यर्थः ।

एतच्च वार्धकं वित्तादियोगोपलक्षणार्थम् । अत एव याज्ञवल्क्यः—

एतैः प्रभूतैश्शूद्रोऽपि वार्धके मानमर्हति ।

इति । वित्तादिराहित्येऽपि केषांचित्पथो दानेन मानमाह मनुः—

चक्रिणो दशमीस्थस्य रोगिणो भारिणस्स्त्रियाः ।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च ॥

चक्री शाकटिकः । स्नातकः कृतसमावर्तनः । वरो विवाहोद्यतः । एतेषां पथि मिळितानां पन्था देयः मार्गादपसर्तव्यमित्यर्थः । यदा तु तेषामेव मेलनं मार्गे पथो दानेन स्नातकराजानौ मान्यौ । तदाह स एव—

तेषां तु समवेतानां मान्यौ स्नातकपार्थिवौ ।

तयोश्च मेलने स्नातक एव राज्ञा माननीय इत्याह स एव—

राजस्नातकयोरेवं स्नातको नृपमानभाक् ।

याज्ञवल्क्योपि—

वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम् ।
पन्था देयो नृपस्तेषां मान्यस्स्नातस्तु भूपतेः ॥

वृद्धग्रहणं बालादेरपि प्रदर्शनार्थम् । अत एव पन्था देय इत्यनुवृत्तौ शङ्खः—

'बालवृद्धमृतोपहतदेहभाराक्रान्तस्त्रीस्नातकप्रव्रजितेभ्यः'

इति । स्त्री चात्र गर्भिणी वेदितव्या । तथा च बोधायनः—

वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च ।
पन्था देयो ब्राह्मणाय गवे राज्ञे ह्यचक्षुषे ॥

इति । इति स्मृतिचन्द्रिकायां मान्यत्वनिमित्तानि.

भिक्षाऽटनम्.

अथ भिक्षाऽटनम् । तत्र मनुः—

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् ।
प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥

यथाशास्त्रमित्यर्थः । तत्कथमित्यपेक्षिते गौतमः—

'आदिमध्यान्तेषु भवच्छब्दः प्रयोज्यो वर्णानुपूर्व्येण'

इति । भिक्षाप्रार्थनावाक्ये वर्णक्रमेणादिमध्यावसानेषु भवच्छब्दः प्रयोक्तव्य इत्यर्थः । तथा च मनुः—

भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ।
भवन्मध्यं तु राजन्यः वैश्यस्तु भवदुत्तरम् ॥

अत्रैवं प्रयोगः—भवति भिक्षां देहीति ब्राह्मणः; भिक्षां भवति देहीति क्षत्रियः; भिक्षां देहि भवतीति वैश्यः । अत्र याज्ञवल्क्यः—

ब्राह्मणेषु चरेद्भैक्षमनिन्द्येष्वात्मवृत्तये ।

भिक्षाणां समूहो भैक्षम् । तत्प्राप्तं[1] चरेदित्यर्थः । तच्च ब्राह्मणविषयम् । तदाह व्यासः—

---

[1] तत्प्राप्त्यर्थं ?

ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहम् ।
सजातीयगृहेष्वेव सार्ववर्णिकमेव वा ॥

अत्र विशेषमाह मनुः—

वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥

उक्तेष्वपि केषुचिदपवादमाह स एव—

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।

गुरोः कुले गुरुगृह इत्यर्थः । यत्तु तेनैवोक्तम्—

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ।
भिक्षेत भिक्षां प्रथमां या चैनं नावमानयेत् ॥

इति, तदुपनयनाङ्गभिक्षाविषयमिति.

'गुरोः कुले न भिक्षेत'

इत्यनेनाविरुद्धम् । अन्यत्र भिक्षाऽलाभे गुरोः कुले[1] भिक्षाऽटनं अविरुद्धमित्याह गौतमः—

'आचार्यज्ञातिगुरुस्वेष्वलाभेऽन्यत्र'

स्वेषु स्वकीयेषु बन्धुष्वित्यर्थः । अत्रापि पूर्वं पूर्वं परित्यजेद्यद्युत्तरोत्तरगृहेषु भिक्षा लभ्येत । तदपि तेनैवोक्तम्—

'तेषां पूर्वं पूर्वं परिहरेत्'

इति । व्यासस्तु त्रैवर्णिकं भिक्षाचरणमाह—

---

[1] गुर्वादिगृहेष्वपि—क ख.

ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहम् ।
सजातीयगृहेष्वेव सार्ववर्णिकमेव वा ॥

सर्वशब्दस्य प्रकृतवर्णत्रयपरत्वादित्यभिप्रायः । एतत्पूर्वोक्त-सजातीयालाभविषयम् । तथा च भविष्यत्पुराणम्—

सर्वं वा विचरेद्ग्रामं पूर्वोक्तानामसम्भवे ।
अन्त्यवर्ज्यं महाबाहो इत्याह भगवान्विभुः ॥

अन्त्यश्शूद्रः । यत्तु मनुनोक्तम्—

सर्वं वा विचरेद्ग्रामं पूर्वोक्तानामसम्भवे ।
नियम्य प्रयतो वाचमभिशस्तांश्च वर्जयेत् ॥

इति, तदपि पुराणेन समानार्थं न पुनश्शूद्रादपि प्राप्त्यर्थम्.

'वेदयज्ञैरहीनानानां'

इति तेनैवोक्तत्वात् । यदपि भविष्यत्पुराणे—

चातुर्वर्ण्यं चरेद्भैक्षमलाभे कुरुनन्दन ।

इति, तदप्यापदि पूर्वपूर्वालाभे वेदितव्यम् । अत एव विष्णुः—

क्षत्रवैश्यगृहेष्वेव क्रियावर्तिषु साधुषु ।
चातुर्वर्ण्यं चरेद्भैक्षमापत्काल उपस्थिते ॥

इति । एतच्च सायं प्रातः कार्यम् ।

'सायं प्रातरमत्रेण भिक्षाचर्यं चरेत्'

इत्यापस्तम्बस्मरणात् । अमत्रं शरावादि । अत एवैकान्नाशित्व-निषेधमाह मनुः—

भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती ।

एतदनापद्विषयम् । तदाह याज्ञवल्क्यः—

ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि ।

इति । भैक्षाशिनः फलमाह मनुः—

भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ।

अत्रिरपि—

शाकभक्षाः पयोभक्षाः ये चान्ये यावकाशिनः ।
सर्वे ते भैक्षभक्षस्य कलां नार्हन्ति षोडशीम् ॥
तप्तकाञ्चनवर्णेन गवां मूत्रेण यावकम् ।
पिबेद्द्वादश वर्षाणि न तद्भैक्षसमं भवेत् ॥

यावको यवकृतो यवागूः । न चात्र फलश्रवणादनियतं भिक्षाचरणमिति वाच्यं, अकरणे मनुना प्रायश्चित्तविधानात्—

अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।
अनातुरस्सप्तरात्रमवकीर्णिव्रतं चरेत् ॥

इति । आपस्तम्बस्तु भिक्षमाणं ब्रह्मचारिणं न प्रत्याचक्षेतेत्याह—

'स्त्रीणां प्रत्याचक्षाणानां समाहितो ब्रह्मचारीष्टं दत्तं हुतं प्रजां पशून्ब्रह्मवर्चसमन्नाद्यं वृङ्क्ते । तस्मादु ह वै ब्रह्मचारिसङ्घं चरन्तं न प्रत्याचक्षीत'

इति । एतच्च व्रताध्ययनादियोगिब्रह्मचारिविषयम् । अत एव मनुः—

भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ।

इति । विधिवदित्यनेन तद्विहीनस्य निषेध[1]माह । अत एव वसिष्ठः—

अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः ।
तं ग्रामं दण्डयेद्राजा चोरभक्तप्रदो हि सः ॥

इति । भिक्षादानं प्रकृत्याह मनुः—

हस्ते दत्ता तु या भिक्षा लवणं व्यञ्जनानि च ।
भुक्त्वा ह्यशुचितां याति दाता स्वर्गं न गच्छति ॥

इति । एतच्च भैक्षं यावदर्थमेवाहर्तव्यमन्यथा दोषश्रवणात् । तदाह स एव—

आहारमात्रादधिकं न क्वचिद्भैक्षमाहरेत् ।
युज्यते स्तेयदोषेण कामतोऽधिकमाहरन् ॥
माधूकरीं य आदाय ब्राह्मणेभ्यः प्रयच्छति ।
स याति नरकं घोरं भोक्ता भुङ्क्ते च किल्बिषम् ॥
तस्मान्नोपहरेद्भैक्षमतिरिक्तं कदा चन ।

माधूकरी भिक्षा । कामत इति वदन् अकामतोऽधिकाहरणे न दोष इत्याह । अत एवाधिकस्य प्रतिपत्तिनियममाहापस्तम्बः—

'न चोच्छिष्टं कुर्यादशक्तौ भूमौ निखनेदप्सु वा प्रवेशयेदाचार्याय वा पर्यवदध्यादन्तर्धिने वा शूद्राय'

[1] तन्निषेध—ख.

इति। अन्तर्धिने आचार्यदासायेत्यर्थः। न चात्रोच्छिष्टशब्देनाशुचिद्रव्याभिधानमाशङ्कनीयम्—

'नोच्छिष्टं कस्य चिद्दद्यात्'

इति मनुना तस्य दाननिषेधात्। एवमाहृत्य तद्भैक्षं गुरवे निवेद्याश्नीयात्। तथा च मनुः—

समाहृत्य तु तद्भैक्षं यावदर्थममायया।
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखश्शुचिः॥

इति। गुर्वसन्निधाने तु तद्भार्यादिभ्यो निवेदयेत्। तदाह गौतमः—

'असन्निधौ तु तद्भार्यापुत्रसब्रह्मचारिसद्भ्यः'

इति। सब्रह्मचारी सहाध्यायी सन्तश्श्रोत्रियाः। तथा चापस्तम्बः—

'विप्रवासे गुरोराचार्यकुलाय तैर्विप्रवासेऽन्येभ्योऽपि श्रोत्रियेभ्यः'

इति। ततो गुर्वाद्यनुज्ञया भुञ्जीत। तथा च हारीतः—

'भैक्षमत्रोक्षितं[1] पर्यग्निकृतमादित्यदर्शितमनुज्ञातममृतसम्मितं प्राहुस्तदश्नन्ब्रह्मचारी ब्रह्मसिद्धिमवाप्नोति'

इति। याज्ञवल्क्योऽपि—

कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया।
आपोशनक्रियापूर्वं सत्कृत्यान्नमकुत्सयन्॥

---

[1] मपेक्षितं—वैद्य.

आपोशनक्रिया अमृतोपस्तरणमसीत्येवमादिका । तां पूर्वं कृत्वा भुञ्जीत । सत्कृत्य पूजयित्वेत्यर्थः । तथा च मनुः—

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ।
पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति ॥
अपूजितं तु यद्भुक्तमुभयं तु हिनस्ति तत् ।

अकुत्सयन्ननिन्दयन्नित्यर्थः । गौतमोऽपि—

'सायं प्रातस्त्वन्नमभिपूजितमनिन्दन्भुञ्जीत'

इति । सायं प्रातरिति वदन् मध्ये भोजननिषेधमाह मनुः—

सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥

अग्निहोत्रसम इत्यनेन कालद्वयेऽपि भोजनमावश्यकमित्याह । तथा च श्रुतिः—

'तस्मात्सायं प्रातराश्येव स्यात्'

इति । अत्र वसिष्ठः—

अष्टौ ग्रासा मुनेर्भक्ष्या वानप्रस्थस्य षोडश ।
द्वात्रिंशतं गृहस्थस्य ह्यमितं[1] ब्रह्मचारिणः ॥

इति । आपस्तम्बोऽपि—

आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् ॥

---

[1] यथेष्टं—ग.

इति । न चात्रामितमित्यनेनात्यशनमाशङ्कनीयम् । यत आह पैठीनसिः—

कालेऽन्नाद्यं लघुक्षिप्रमल्पमद्याद्रसोत्तरम् ।

मनुरपि—

न चैवात्यशनं कुर्यान्न चोच्छिष्टः क चिद्व्रजेत् ।
अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ॥
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ।

तथा भोक्तुर्दिङ्नियममाह स एव—

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्त उदङ्मुखः ॥

आयुषे हितमायुष्यम् । तत्प्राङ्मुखो भुङ्क्ते भुञ्जीतेत्यर्थः । एवं चायुष्कामः प्राङ्मुखो भुञ्जितेत्युक्तं भवति । एवं यशसे हितं यशस्यम् । तद्दक्षिणामुखो भुञ्जीत । श्रियमिच्छन्प्रत्यङ्मुखः । ऋतं सत्यम् । तदिच्छन्नुदङ्मुख इति ।हारीतोऽपि—

‘प्राङ्मुख आयुष्कामोऽश्नीयाद्यशोऽर्थी दक्षिणामुखश्श्रीकामः प्रत्यङ्मुखः’

इति । यत्तु मनुनोक्तं—

यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः ।
सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि गच्छति ॥

इति, तच्छ्राद्धविषयम् । तस्य तत्प्रकरणे पाठात् । अत्र पात्रनियममाह हारीतः—

'लोहमये[1] मृन्मये वा पात्रे भुञ्जीत'

तच्च भुक्त्वा स्वयं प्रक्षालयेत् । तदाहापस्तम्बः—

'भुक्त्वा स्वयममत्रं प्रक्षालयीत'

इति । 'भैक्षेण वर्तयेन्नित्यम्' इत्युक्तम् । तस्य क्वचिदपवादमाह याज्ञवल्क्यः—

ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ।

अपीडयन्मधुमांसादि वर्जयन्नित्यर्थः । तस्य ब्रह्मचारिणः प्रतिषिद्धत्वात् । अत एव मनुः—

प्रतिषिद्धं न भोक्तव्यं मधुमांसादि नियशः ।

इति । मधुनः पुनरकामेनोपपन्नस्य नैव दोषोऽस्तीत्याह वसिष्ठः—

'अकामोपपन्नं मधु वाजसनेयके न दुष्यति'

इति । यत्तु विष्णुनोक्तं—

'श्राद्धकृतलवणशुक्तपर्युषितवर्जनम्'

इति, तदनभ्यार्थिताभिप्रायम् । अत एव मनुः—

काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते ।

इति । इति स्मृतिचन्द्रिकायां भिक्षाटनम्.

---

[1] लौहपात्रे—क.

उपनीतधर्माः

अथोपनीतधर्माः । तत्र संवर्तः—

सन्ध्यां प्रातस्सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यामर्धास्तमितभास्कराम् ॥
तिष्ठन्पूर्वां जपं कुर्याद्ब्रह्मचरी समाहितः ।
आसीनः पश्चिमां सन्ध्यां जपं कुर्यादतन्द्रितः ॥
अग्निकार्यं च कुर्वीत मेधावी तदनन्तरम् ।
ततोऽधीयीत वेदं तु वीक्षमाणो गुरोर्मुखम् ॥
सायं प्रातश्च भिक्षेत ब्रह्मचारी समाहितः ।
निवेद्य गुरवेऽश्नीयात्प्राङ्मुखो वाग्यतश्शुचिः ॥

मनुरपि—

नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् ।
देवताऽभ्यर्चनं कुर्यात्सन्ध्योपासनमेव[1] च ॥

इति । अत्र दक्षः—

प्रातर्मध्याह्नयोस्स्नानं वानप्रस्थगृहस्थयोः ।
यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः ॥

इति । अत्र विशेषमाह विष्णुः—

'दण्डवन्मज्जनम्'

इति । दण्डवदित्यनेनाङ्गनैर्मल्यं न कार्यमित्याह । अत एवापस्तम्बः—

---

[1] चैव समिदाधानमेव च—इति पाठान्तरम्.

'नाप्सु श्लाघमानस्स्नायात्'

इति । अत्र ये त्वसाधारणधर्मा अग्नीन्धनादयस्ते यावत्समावर्तनं तावदेव कार्या इत्याह मनुः—

अग्नीन्धनं भैक्षचर्यमधश्शय्यां गुरोर्हितम् ।
आसमावर्तनं कुर्यात्कृतोपनयनो द्विजः ॥

एतच्चान्येषामप्येवंजातीयाना[1]मुपलक्षणार्थम् । अत एव पुराणं—

मेखलामजिनं दण्डमुपवीतं च नित्यशः ।
कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत् ॥

यमोऽपि—

दण्डं कमण्डलुं वेदं मौञ्जीं च रशनां तथा ।
धारयेद्ब्रह्मचर्यं च भिक्षान्नाशी गुरौ वसन् ॥

वेदो दर्भमुष्टिः । गुरौ गुरुगृह इत्यर्थः । अत्र वसतो ये धर्मास्ता-नाह व्यासः—

जघन्यशायी पूर्वं स्यादुत्थाय गुरुवेश्मनि ।
यच्च शिष्येण कर्तव्यं कार्यं दासेन वा पुनः ॥
कृतमित्येव तत्सर्वं कृत्वा तिष्ठेत्तु पार्श्वतः ।
किङ्करस्सर्वकार्येषु सर्वकर्मसु कोविदः ॥
नाभुक्तवति नाश्नीयादपीतवति नो पिबेत् ।
न तिष्ठति तथाऽसीत नासुप्ते प्रस्वपेत्तथा ॥

---

[1] तीयकाना—क.

याज्ञवल्क्योऽपि—

गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः ।
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् ॥

हारीतोऽपि—

'अथोदकुम्भकुशपुष्पसमिन्मूलाहरणसम्मार्जनोपलेपाङ्गशुश्रूषाप्रभृतिभिर्गच्छन्तं तिष्ठन्तं शयानमासीनं भक्त्याऽनुवर्तेत । नास्य निर्माल्यशयनासनच्छायापादुके वा कामयेत्'

इति । आपस्तम्बोऽपि—

'आचार्याधीनस्स्यादन्यत्र पतनीयेभ्यः'

इति । बोधायनोऽपि—

'सर्वत्राप्रतिहतगुरुवाक्योऽन्यत्र पातकात्'

इति । यमोऽपि—

गुर्वधीनोऽस्वतन्त्रस्स्यात्पूर्वोत्थायी गुरोर्गृहे ।
सदा जघन्यसंवेशी जितशिश्नो जितोदरः ॥
जितनिद्रो जितालस्यो जितक्रोधो जितात्मवान् ।
शुश्रूषुरनहंवादी गुरुदेवार्चने रतः ॥

गुर्वर्चनं गुरुपूजा । तस्याः फलमाह शङ्खः—

न स्नानेन न होमेन नैवाग्निपरिचर्यया ।
ब्रह्मचारी दिवं याति स याति गुरुपूजनात् ॥

मनुरपि नियमान्तराण्याह—

नीचशय्यासनं चास्य नित्यं स्याद्गुरुसन्निधौ ।
गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत् ॥

एतच्च गवादिव्यतिरिक्तविषयं, तत्र सहासनविधानात् । तदाह स एव—

गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्धं शिलाफलकनौषु च ॥

विष्णुरपि—

'नास्यैकासनो भवेदृते शिलाफलकयानेभ्यः'

इति । तथा न गुरोः परीवादाद्याकर्णनीयम् । तथा च मनुः—

गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥

इति । सद्दोषख्यापनं परीवादः । असद्दोषाभिधानं निन्दा । न च स्वेनापि परीवादादि कार्यम् । यदाह स एव—

परीवादात्खरो भवति श्वा वै भवति निन्दकः ।
परिभोक्ता क्रिमिर्भवति कीटो भवति मत्सरी ॥

अननुज्ञातगुरुधनोपजीवी परिभोक्ता । हारीतोऽपि—

अमृतस्य प्रदातारं गुरुं यस्त्ववमन्यते ।
तच्चैनं दहति ब्रह्म तिर्यग्योनौ च जायते ॥
ऋचं वा यदि वा पादमर्धं वा[1] यदि वाऽक्षरम् ।
सकाशाद्यस्य गृह्णीयान्नियतं तस्य गौरवम् ॥

---

[1] यदि वार्धं वा पादं वा—क. ख.

तथा च गुर्वादेर्नामापि न कीर्तनीयम् । तथा च स्मृतिः—

आचार्यं चैव तत्पुत्रं तद्भार्यां दीक्षितं गुरुम् ।
पितरं च पितृव्यांश्च मातरं मातुलं तथा ॥
हितैषिणं च विद्वांसं श्वशुरं यतिमेव च ।
न ब्रूयान्नामतो विद्वान्मातुश्च भगिनीं तथा ॥

इति । यत्र पुनर्गुर्वादिनामग्रहणमावश्यकं तत्रोपाध्यायादिशब्देन स ब्रूयात् । तथा च गौतमः—

'नामगोत्रे गुरोस्समानतो निर्दिशेत्'

इति । समानतो मानेन सहेत्यर्थः । अत एव मनुः—

नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ॥

तथा गुरुभार्यादेरपि शुश्रूषा कार्येत्याह विश्वामित्रः—

तद्भार्यापुत्रयोश्चैव वृद्धानां धर्मशालिनाम् ।
शुश्रूषा सर्वथा कार्या प्रणामो भक्तिरेव च ॥

इति । नारदोऽपि—

आ विद्याग्रहणाच्छिष्यश्शुश्रूषाप्रयतो गुरुम् ।
तद्वृत्तिर्गुरुदारेषु गुरुपुत्रे तथैव च ॥

इति । सुमन्तुरपि ब्रह्मचारिनियममाह—

ब्रह्मचर्यं तपो भैक्षं सन्ध्ययोरग्निकर्म च ।
स्वाध्यायो गुरुवृत्तिश्च चर्येयं ब्रह्मचारिणः ॥

इति । तपश्शब्देनात्र ब्रह्मचारिनियमा उच्यन्ते । तथा चापस्तम्बः—

'नियमेषु तपश्शब्दः । तदतिक्रमे विद्याकर्म निस्स्रवति'

इति । अतो नियमानुष्ठानमावश्यकमित्यभिप्रायः । अत एव मनुः—

सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन् ।
संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः ॥
इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥

ते च याज्ञवल्क्येनोक्ताः—

मधुमांसाञ्जनोच्छिष्टशुक्तं स्त्रीप्राणिहिंसनम् ।
भास्करालोकनाश्लीलपरीवादादि वर्जयेत् ॥

मधु क्षौद्रं । मांसं छागादेरपि वर्ज्यम् । एतच्च व्याधिराहित्ये वेदितव्यं, अन्यथा तु वैद्योपदिष्टं मधुमांसादिकं गुरोरुच्छिष्टं कृत्वा प्राश्नीयात् । तथा च वसिष्ठः—

'स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भैषज्यार्थं
सर्वं प्राश्नीयात्'

इति । व्याधीयीत व्याधिमत्तामनुभवतीत्यर्थः । अञ्जनं तैलादिना गात्रस्य, कज्जलादिना चाक्ष्णोः । एतदप्यन्यत्र वैद्योपदेशात् । औषधस्याव्रतघ्नत्वात् । तथा च स्मृतिः—

अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पयः ।
हविर्ब्राह्मणकाम्या[1] च गुरोर्वचनमौषधम् ॥

इति । उच्छिष्टं गुरुव्यतिरिक्तस्य वर्जयेत् । तदाह वसिष्ठः—

'उच्छिष्टमगुरोरभोज्यम्'

इति । अगुरोरभोज्यमित्यनेन[2] गुरोरुच्छिष्टं भोज्यमित्याह । अत एवापस्तम्बः—

'पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम्'

इति । न च—

'आचार्यश्श्रेष्ठो गुरूणां मातेत्येके'

इति मातुरपि गुरुत्वश्रवणात्तस्या उच्छिष्टं भोक्तव्यमिति शङ्कनीयम्—

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ।

इति गुरुलक्षणवैलक्षण्यात् । अतस्तत्रौपचारिको गुरुशब्द इति मन्तव्यम् । अत एव मनुः—

गुरुवत्सम्प्रपूज्यास्स्युस्सवर्णा गुरुयोषितः ।

इति । अत एव गौतमोऽपि—

'तद्भार्यापुत्रेषु चैवम्'

इति गुरुधर्मातिदेशं कृत्वा तदुच्छिष्टभोजनापवादमाह—

'नोच्छिष्टाशनस्नापनप्रसाधनपादप्रक्षालनोन्मर्दनोपसङ्ग्रहणानि'

---

[1] ब्राह्मणकामाय— क. ख.　　[2] अनेन. ग.

इति । प्रसाधनमलङ्करणम् । उन्मर्दनमङ्गमर्दनम् । एवमविशेषेण गुरोरुच्छिष्टभोजने प्राप्ते क्वचिदपवादमाहापस्तम्बः—

'धर्मविप्रतिपत्तावभोज्यम्'

इति । अधर्मोपेतस्य पितुरुच्छिष्टमभोज्यमित्यर्थः । शुक्तं निष्ठुरं वाक्यम् । तदपि वर्जयेत् । अत एव वर्जयेदित्यनुवृत्तौ गौतमः—

'शुक्ता वाचः'

इति । भास्करालोकमादित्यावेक्षणम् । तदपि न कार्यमित्याह मनुः—

नेक्षेतोद्यन्तमादित्यमस्तंयन्तं कदा चन ।
नोपसृष्टं न वारिस्थं न मध्यनभसो गतम् ॥

उपसृष्टं राहुग्रस्तम् । अश्लीलमसत्यभाषणम् । परीवादः परनिन्दा । आदिग्रहणमन्येषामपि नियमानामुपलक्षणार्थम् । अत एव गौतमः—

'वर्जयेन्मधुमांसगन्धमाल्यदिवास्वप्नाञ्जनाभ्यञ्जनयानोपानच्छत्रकामक्रोधलोभमोहवादनस्नानदन्तधावनहर्षनृत्तगीतपरिवादभयानि'

इति । गन्धश्चन्दनादि । तस्य भोगार्थस्य प्रतिषेधो न देवताशिष्टस्य । तथा च स्मृतिः—

'देवताशिष्टमेव गृह्णीयाद्ब्रह्मचारी'

इति । एवं मालायामपि द्रष्टव्यम् । यानं शिबिकादि । वादो

बहुप्रलापः । वादनं भेरीताडनादि । स्नानमुपभोगार्थम् । नित्यस्य विहितत्वात् । भयं परस्य । मनुरपि—

वर्जयेन्मधु मांसं च गन्धमाल्यरसान् स्त्रियः ।
शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनम् ॥
अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधं च लोभं च नर्तनं गीतवादनम् ॥
द्यूतं च जनवादं च परिवादं तथाऽनृतम् ।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च ॥

इति । रसा इक्षुरसादयः । मधुनो रसत्वेऽपि पृथग्ग्रहणं प्रायश्चित्तगुरुत्वख्यापनार्थम् । स्त्रीप्रेक्षणालम्भने तु यत्र मैथुनशङ्का तत्रैव वर्जयेत् । इतरत्राशक्यपरिहारत्वात् । अत एव वर्जयेदित्यनुवृत्तौ गौतमः—

'स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायाम्'

इति । तथा नियमान्तराण्यपि स एवाह—

'गुरुदर्शनेकण्ठप्रावृतावसक्थिकापाश्रयणपादप्रसारणानि निष्ठीवितहसितविजृम्भितावस्फोटनानि'

अत्रापि वर्जयेदित्यनुवर्तते । कण्ठप्रावृतं वस्त्रादिना कण्ठप्रावरणम् । अवसक्थिका जान्वोर्मध्यस्य च वस्त्रादिना बन्धनम् । अपाश्रयणं कुड्यादिसंश्रयणम् । विजृम्भितं जृम्भणम् । अवस्फोटनं भुजास्फालनादि । हसितं प्रसिद्धम् । तच्च यद्यशक्यपरिहारं तदा मुखं पिधाय कार्यम् । तदाहापस्तम्बः—

'यदि स्मयेतापिगृह्य स्मयेतेति हि ब्राह्मणम् । नोपजिघ्रेत् स्त्रियं मुखेन न हृदयेन प्रार्थयेन्नाकारणादुपस्पृशेत्'

इति । पुनरापस्तम्बः—

'दत्वा च नानुकथयेत्कृत्वा च नानुस्मरेदात्मप्रशंसां परगर्हामिति च वर्जयेत्'

इति । हारीतोऽपि—

'हयगजरथचैत्यवृक्षविषमारोहणप्रचयनसंसिद्धिसर्पणमहानद्यर्णवप्रतरणमहासाहसविरुद्धानि [1] वर्जयेत्'

इति । आपस्तम्बोऽपि—

'स्त्रीभिर्यावदर्थसम्भाषी मृदुश्शान्तो दान्तो ह्रीमान्दृढधृतिः'

इति । विष्णुरपि—

'कृतलवणं ब्रह्मचारी वर्जयेत्'

इति । कृतलवणमूषरलवणम् । मनुरपि—

नैनं ग्रामेऽभिनिम्लोचेत्सूर्यो नाभ्युदयात्क्वचित् ।
सूर्येण ह्यभिनिर्मुक्तश्शयानोऽभ्युदितश्च यः ॥
प्रायश्चित्तमकुर्वाणो युक्तस्स्यान्महतैनसा ।
मुण्डो वा जटिलो वा स्यादथ वा स्याच्छिखाजटः ॥

---

[1] वृषभारोहमहानदीप्रतरणमहासाहसविरुद्धानि—वैद्य.

इति । मुण्डश्शिखाविहीनः,

'मुण्डश्शिखी वा'

इति गौतमस्मरणात् । कात्यायनोऽपि—

सशिखं वपनं कार्यमा स्नानाद्ब्रह्मचारिणः ।
आ शरीरविमोक्षात्तु ब्रह्मचर्यं न चेद्भवेत् ॥

इति । एतच्छन्दोगाभिप्रायम् । तथा च श्रीविष्णुपुराणे भरतवाक्यम्—

एते लूनशिखास्तस्य दशनैरचिरोद्गतैः ।
कुशकाशा विराजन्ते वटवस्सामगा इव ॥

'अधश्शयीत' इत्युक्तं गौतमेन । तत्र विशेषमाह यमः—

खट्वासनं च शयनं वर्जयेद्दन्तधावनम् ।
स्वपेदेकः[1] कुशेष्वेव न रेतस्स्कन्दयेत्क्वचित् ॥

मनुरपि—

एकश्शयीत सर्वत्र न रेतस्स्कन्दयेत्क्वचित् ।
कामाद्धि स्कन्दयेद्रेतो हिनस्ति व्रतमात्मनः ॥

व्रतं ब्रह्मचर्यम् । अकामत उत्सर्गे प्रायश्चित्तमात्रं न व्रतलोप इत्याह स एव—

स्वप्ने सिक्त्वा ब्रह्मचारी द्विजश्शुक्रमकामतः ।
स्नात्वाऽर्कमर्चयित्वाऽपि पुनर्मामित्यृचं जपेत् ॥

इति । इति स्मृतिचन्द्रिकायामुपनीतधर्माः.

---

[1] स्वपेदधः—क.

वेदप्रशंसा.

अथ वेदप्रशंसा । तत्र मनुः—

चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् ।
भूतं भव्यं भविष्यच्च सर्वं वेदात्प्रसिद्ध्यपि ॥

याज्ञवल्क्योऽपि—

यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् ।
वेद एव द्विजातीनां निश्श्रेयसकरः परः ॥

यज्ञादीनां कर्मणां मध्ये वेदाभ्यास एव द्विजातीनां पर उत्कृष्टो निश्श्रेयसकरः, तस्य तपोरूपत्वात् । तथा च मनुः—

वेदमेव सदाऽभ्यस्येत्तपस्तपस्यन्द्विजोत्तमः ।
वेदाभ्यासोऽपि विप्रस्य तपः परमिहोच्यते ॥
आ हैव स नखाग्रेभ्यः परमं तप्यते तपः ।
यस्स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥

यः प्रत्यहं यथाशक्ति स्वाध्यायमधीते स आनखाग्रेभ्यः परमुत्कृष्टं तपः करोतीत्यर्थः । हेति प्रसिद्धौ । स्रग्वी धृतमाल्यो नियमविहीनोऽपीति यावत् । व्यासोऽपि—

नान्यतो[1] ज्ञायते धर्मः वेदादेवैष निर्बभौ ।
तस्मात्सर्वप्रयत्नेन धर्मार्थी वेदमभ्यसेत्[2] ॥

धर्मार्थी धर्मज्ञानार्थम् । अत एव मनुः—

---

[1] नान्यथा—ख. [2] माश्रयेत्—ख.

पितृदेवमनुष्याणां वेदश्चक्षुस्सनातनः[1] ।

इति । वेदविदः फलमपि स एवाह—

यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् ।
तथा दहति वेदज्ञः कर्मजं दोषमात्मनः ॥

तथा वेदविहीनस्य सर्वक्रियानैष्फल्यमपि स एवाह—

यथा षण्डोऽफलः स्त्रीषु यथा गौर्गवि चाफला ।
यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥

वसिष्ठोऽपि—

यश्च काष्ठमयो हस्ती यश्च चर्ममयो मृगः ।
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ॥

यथा दार्वादिनिर्मितो हस्ती युद्धादिकर्मयोग्यो न भवति तथाऽनधीयानोऽपि स्वकर्मयोग्यो न भवतीत्यर्थः । अत एवायं ब्राह्मणो न भवतीत्याह स एव—

नानृचो ब्राह्मणो भवति न वणिङ्ग कृषीवलः ।
न शूद्रप्रेषणं कुर्वन्न स्तेनो न चिकित्सकः ॥

मनुरपि—

योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

अतः पूर्वं वेदाध्ययनेन भवितव्यमित्यर्थः । अत एव शङ्खः—

---

[1] ऋषि—ग.

'न वेदमनधीत्यान्यां विद्यामधीयीतान्यत्र वेदाङ्ग-
स्मृतिभ्यः'

इति । अङ्गादेरपि तदर्थपरिज्ञानार्थत्वादित्यभिप्रायः । तथा च हारीतः—

'वेदो वै विद्या ब्राह्मणस्य । तत्परिज्ञानार्थमङ्गानि'

इति । इति स्मृतिचन्द्रिकायां वेदप्रशंसा.

श्रुतप्रशंसा.

अथ श्रुतप्रशंसा । तत्र लघुव्यासः—

न वेदपाठमात्रेण संतोषं कारयेद्बुधः ।
पाठमात्रावसायी तु पङ्के गौरिव सीदति ॥

इति । निरुक्तेऽपि—

'स्थाणुरयं भारहरः किलाभूदधीत्य वेदं न विजा-
नाति योऽर्थम्'

इति । लघुव्यासोऽपि—

वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चापि यत् ।
अजानतोऽर्थं तत्सर्वं तुषाणां खण्डनं यथा ॥
यथा पशुर्भारवाही न तस्य भजते फलम् ।
द्विजस्तदर्थानभिज्ञो न वेदफलमश्नुते ॥

वैदिककर्मफलभाङ्न भवतीत्यर्थः । अत एवास्य शूद्रसमानत्व-
माह स एव—

योऽधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत् ।
स सान्वयश्शूद्रसमः पात्रतां न प्रपद्यते ॥

अत एव चैनेषां वाङ्मात्रेणापि पूजा न कार्येत्याह स एव—

पाठमात्रपरान्नित्यं द्विजातींश्चार्थवर्जितान् ।
पशूनिव स तान्प्राज्ञो वाङ्मात्रेणापि नार्चयेत् ॥

अतोऽधीतवेदस्य तदर्थविचार आवश्यक इत्यभिप्रायः । अत एव दक्षः—

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥

विचारो वेदार्थविचारः । लघुव्यासोऽपि—

श्रुतहीनमधीतं यत्[1] नेह नामुत्र तद्भवेत् ।
श्रुतं तु केवलमपि समुद्धाराय कल्पते ॥

किं पुनस्समुच्चितमित्यभिप्रायः । तदाह स एव—

ज्ञानं कर्म च संयुक्तं मुक्त्यर्थं कथितं[2] यथा ।
अधीतं श्रुतसंयुक्तं तथा श्रेष्ठं न केवलम् ॥
समुच्चितं स्तोकमपि श्रुताधीतं विशिष्यते ।
चतुर्णामपि वर्णानां केवलाध्ययनाद्द्विजात् ॥

इति । वेदार्थविदः फलमाह मनुः—

---

[1] श्रुतं वा समधीतं च—ख.   [2] कल्पितं—स्मृतिर.

वेदशास्त्रार्थतत्त्वज्ञो यत्र यत्राश्रमे वसेत् ।
इहैव तिष्ठन्लोके स ब्रह्मभूयाय कल्पते ॥

हारीतोऽपि—

मन्त्रार्थज्ञो जपन् जुह्वंस्तथैवाध्यापयन् द्विजः ।
स्वर्गलोकमवाप्नोति नरकं तु विपर्यये ॥

निरुक्तेऽपि—

योऽर्थवित्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा ।

इति । मनुस्त्वभ्यसनीयानि शास्त्राण्याह—

बुद्धिवृद्धिकराण्याशु धान्यानि च हितानि च ।
नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् ॥

पुराणेऽपि—

धर्मशास्त्रं तु विज्ञेयं शब्दशास्त्रं तथैव च ।
पुराणानीतिहासाश्च तदाख्यानानि यानि च ॥
महात्मनां च चरितं श्रोतव्यं नित्यमेव च ।

इति । इति स्मृतिचन्द्रिकायां श्रुतप्रशंसा.

अध्ययनविधिः.

अथाध्ययनविधिः । तत्र मनुः—

तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यस्सरहस्यो द्विजन्मना ॥

रहस्यमुपनिषत् । अधिगन्तव्योऽध्येतव्य इत्यर्थः । तथा च श्रुतिः—

‘ स्वाध्यायोऽध्येतव्यः ’

इति । स्वकुलपरम्परागता शाखाऽध्येतव्येति यावत् । अत एव वसिष्ठः—

पारम्पर्यागतो येषां वेदस्सपरिबृंहणः ।
तच्छाखं कर्म कुर्वीत तच्छाखाऽध्ययनं तथा ॥

इति । शाखान्तराध्ययने शाखारण्डो भवतीत्यभिप्रायः । यदाह स एव—

एकदेशे[1]ऽपि शाखानां मध्ये योऽन्यतमं[2] व्रजेत् ।
स्वशाखां सम्परित्यज्य शाखारण्डस्स उच्यते ॥

तस्य दोषमपि स एवाह—

स्वशाखां यः परित्यज्य पारक्यमधिगच्छति ।
स शूद्रवद्बहिष्कार्यस्सर्वकर्मसु साधुभिः[3] ॥
आत्मशाखां परित्यज्य परशाखासु वर्तते ।
उच्छेत्ता तस्य वंशस्य रौरवं नरकं व्रजेत् ॥
स्वीयशाखोज्झिता येन ब्रह्म तेनोज्झितं परम् ।
ब्रह्महेव स विज्ञेयस्सद्भिर्नित्यं विगर्हितः ॥

इति । लोगाक्षिरपि—

यस्स्वशाखां परित्यज्य पारक्यमधिगच्छति[4] ।
स शूद्रवद्बहिष्कार्यो हव्यकव्येषु दातृभिः[5] ॥

---

[1] एकवेदे—ग. [2] न्यतमां—ग. [3] बन्धुभिः.

[4] मनुगच्छति—स्मृतिर. [5] शाखारण्डस्स विज्ञेयस्सर्वकर्मबहिष्कृतः—स्मृतिर.

अनेन स्वशाखाया अपरित्यागेन शाखान्तराध्ययनमविरुद्धमि त्याह । अत एव वसिष्ठः—

अधीत्य शाखामात्मीयां परशाखां ततः पठेत् ।

तथा नियमान्तरमपि स एवाह—

यच्छाखीयैस्तु संस्कारैस्संस्कृतो ब्राह्मणो भवेत् ।
तच्छाखाऽध्ययनं कुर्यात्त्यागेन[1] पतितो भवेत् ॥

यस्तु स्वशाखीयं कर्म परित्यज्य शाखान्तरोक्तमाचरति, सोऽपि शाखारण्ड इत्याह वसिष्ठः—

न जातु परशाखोक्तं बुधः कर्म समाचरेत् ।
आचरन्परशाखोक्तं शाखारण्डः[2] प्रकीर्तितः ॥

सङ्ग्रहकारस्त्वस्यापि दोषमाह—

यस्स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत् ।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति ॥

कात्यायनोऽपि—

स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः ।
कर्तुमिच्छति दुर्मेधा मोघं तस्य विचेष्टितम् ॥

अनेनापि स्वशाखीयकर्मापरित्यागेन शाखान्तराश्रयणमविरुद्ध- मिति ज्ञायते । तदपि तेनैवोक्तम्—

यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥

---

[1] यान्न तेन—ग.   [2] कर्मारण्डः— स्मृतिर.

इति । अथाऽध्ययनारम्भं प्रकृत्याह मनुः—

ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री[1] विज्ञेया ब्रह्मणो मुखम् ॥

ओं भूर्भुवस्सुवरिति महाव्याहृतयस्तिस्रः । तत्सवितुरिति सावित्री ब्रह्मणो मुखं वेदस्य मुखमारम्भ इत्यर्थः । गौतमस्तु पञ्च व्याहृतयः प्रयोज्या इत्याह—

'ओम्पूर्वा व्याहृतयः पञ्च सत्यान्ताः'

इति । एतच्चान्वहं वेदितव्यम् । तथा च संवर्तः—

प्रणवं प्राक्प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्र्याश्चानुवचनं ततो वृत्तान्तमारभेत् ॥

वृत्तान्तं यत्प्रस्तुतमित्यर्थः । प्रणवोच्चारणमपि प्राणायामत्रयादुपरि वेदितव्यम् । तदाह मनुः—

प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावितः ।
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ॥

प्राक्कूलान्प्रागग्रानित्यर्थः । पवित्रं पावनमिति । गौतमेनोक्तं—

'प्राणोपस्पर्शनं दर्भैः'

इति । प्राणा इति चक्षुरादीन्द्रियाणि शीर्षण्यान्युच्यन्ते । तानि दर्भैरुपस्पृशेदित्यर्थः । प्राणायामा अपि तेनैवोक्ताः—

'प्राणायामास्त्रयः पञ्चदशमात्राः'

---

[1] गायत्री—ख

इति । प्राणायामः प्राणनिरोधः निरुच्छ्वासेनावस्थानमिति यावत् । लघ्वक्षरोच्चारणकालो मात्रा । पञ्चदशमात्रा इत्यनेन 'सव्याहृतिकां सप्रणवाम्' इत्यस्य प्रतिषेधमाह । एतच्च प्रणवोच्चारणमधीत्यापि कार्यम् । तदाह मनुः—

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यति ॥

इति । नियमान्तरमपि स एवाह—

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोस्सदा ।

पादग्रहणमुपसङ्ग्रहणम् । यदाहाङ्गिराः—

प्राप्ते वेदानुवचने विसर्गे चान्वहं गुरोः ।
उपसङ्ग्रहणं कार्यं विप्रोष्य त्वागतेन च ॥

इति । गौतमस्त्वध्येतुर्दिङ्नियममाह—

'प्राङ्मुखो दक्षिणतश्शिष्य उदङ्मुखो वा'

इति । मनुरपि—

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥

अध्येष्यमाण इति वचनादेतदाचमनमध्ययनाङ्गम् । ब्रह्माञ्जलिमपि स एवाह—

संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिस्स्मृतः ।

इति । अत्र विशेषमाह संवर्तः—

ततोऽधीयीत वेदं तु वीक्षमाणो गुरोर्मुखम् ।
हस्तौ तु संहतौ कार्यौ जानुभ्यामुपरि स्थितौ ॥

गुरोर्मुखं वीक्षमाण इत्यनेन गुरुमुखादेव वेदोऽध्येतव्य इत्याह । अत एव नारदः—

पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ ।
भ्राजते न सभामध्ये जारगर्भ इव स्त्रियाः ॥

गुरुसन्निधानेऽपि तदनुज्ञयाऽध्येतव्यम् । अन्यथा दोषश्रवणात् । तदाह लघुव्यासः—

ऋचमर्धर्चमथवा पादं वा यदि वाऽक्षरम् ।
गृह्णाति योऽननुज्ञातो परस्मात्परतो द्विजः ॥
स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ।

तथा शूद्रसन्निधानेऽपि नाध्येतव्यम् । तदाह स एव—

अनध्यायेष्वधीतं यद्यच्च शूद्रस्य सन्निधौ ।
प्रतिग्रहनिमित्तं च नरकाय तदुच्यते ॥

मनुरपि—

नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ ।
न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनस्स्वपेत् ॥

अविस्पष्टं वर्णस्वरादिरहितम् । निशान्ते रात्रेरपरभागे । ब्रह्माधीत्य श्रान्तोऽपि पुनर्न स्वपेदित्यर्थः । तथा च गौतमः—

'नापररात्रमधीत्य पुनः प्रतिसंविशेत्'

इति । हारीतोऽपि—

'ब्राह्मे मुहूर्ते प्रतिबुध्य स्वाध्यायमावर्त्य न प्रतिसंविशेत्'

नारदस्तु वर्णस्वरादिरहिताध्ययने दोषमाह—

हस्त[1]हीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुस्सामभिर्दग्धो वियोनिमधिगच्छति ॥
हस्तेना[2]धीयमानस्तु स्वरवर्णान्प्रयोजयन् ।
ऋग्यजुस्सामभिः पूतो ब्रह्मलोकं स गच्छति ॥

एतच्चाध्ययनादिफलं गर्भाधानादिसंस्कार वत एव नान्यस्येत्याह लघुव्यासः—

संस्कारवद्भिः कर्तव्यं वेदस्याध्ययनं द्विजैः ।
शुद्धस्य फलवत्तत्स्यादन्यथा निष्फलं स्मृतम् ॥

नियमान्तराण्यपि स एवाह—

मेखलाजिनदण्डानां धारिभि[3]र्ब्रह्मचारिभिः ।
वेदः कृत्स्नोऽधिगन्तव्यस्सत्पथाचारवार्तिभिः[4] ॥
भिक्षाशिभिर्गुरोर्नित्यं शुश्रूषायां रतैस्तथा ।
आ समाप्तेर्व्रतं कुर्याद्वेदस्य विधिवद्द्विजैः ॥

शुश्रूषा परिचर्या । तस्याः फलमाह मनुः—

---

[1] अर्थ—ग. [2] अर्थेना—ग. [3] धारणै—ग.

[4] सर्वज्ञानैर्द्विजातिभिः—क. सर्वज्ञानो द्विजातिभिः—ख.

यथा खनन्खनित्रेण नरो वार्यधिगच्छति ।
एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥

नारदो विद्याऽधिगमोपायमाह—

योऽहेरिव ऋणाद्भीतस्सौहित्यान्नरकादिव ।
राक्षसीभ्य इव स्त्रीभ्यस्स विद्यामधिगच्छति ॥
यत्कीटैः पांसुभिः श्लक्ष्णैर्वल्मीकः क्रियते महान् ।
न तत्र बलसामर्थ्यमुद्योगस्तत्र कारणम् ॥
शनैर्विद्यां शनैरर्थानारोहेत्पर्वतं शनैः ।

तृप्तिस्सौहित्यम् । तथा विघ्नहेतूनपि स एवाह—

द्यूतं पुस्तकशुश्रूषा नाटकासक्तिरेव च ।
स्त्रियस्तन्द्री च निद्रा च विद्याविघ्नकराणि षट् ॥

शुश्रूषा श्रोतुमिच्छा । तन्द्री आलस्यम् । एवमुक्तनियमविहीना-दध्ययनाभावो वरमित्याह लघुव्यासः—

ऋक्पादमप्यधीयीत मार्गेणोक्तेन धर्मवित् ।
न त्वेव चतुरो वेदानन्यायेन कदा चन ॥
वेदविप्लावनात्तेन वरं मौनं समाश्रितम् ।
वेदविप्लावनाद्विप्रो नरकं यात्यधोमुखः ॥

वेदविप्लावकस्य लक्षणमाह[1] यमः—

योऽर्थार्थीमान्द्विजे दद्यात्पठेद्वेदाविधानतः ।
अनध्याये च तं प्राहुर्वेदविप्लावकं बुधाः ॥

---

[1] लक्षणं विद्योक्तमाह — क. ग.

अत्र याज्ञवल्क्यः—

कृतज्ञोऽद्रोही मेधावी शुचिः कल्योऽनसूयकः ।
अध्याप्यास्साधुशक्ताप्तस्वार्थदा धर्मतस्त्विमे ॥

कृतज्ञ उपकारस्मर्ता । अद्रोह्यनपराधी । मेधावी धारणावान् । शुचिः प्रयतः । कल्यो विरोगः । अनसूयकः परपुरुषदोषानाविष्करणशीलः । साधुः वृत्तवान् । शक्तश्शुश्रूषायाम् । आप्तोऽप्रतारकः । स्वः ज्ञातिः । अर्थदो गुर्वर्थप्रदाता । इमे धर्मतः धर्मानतिरेकेणाध्याप्याः । नन्वर्थदोऽध्याप्य इति न घटते—

भृतादध्ययनादानं भृतकाध्यापनं तथा ।

इत्युपपातकमध्ये पठितत्वात् । नैवं भृतिसम्प्रतिपत्तिपूर्वकमेवाध्यापनं प्रतिषिद्धमितरस्य प्रीतिहेतुत्वेनाविरोधात् ।

अत एव मनुः—

धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा ।
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ॥

यमोऽपि—

यतो धर्मागमो न स्यान्न शुश्रूषाधनागमौ ।
विद्यया सह मर्तव्यं न विद्यामूषरे वपेत् ॥

मनुस्तु ज्ञानदोऽप्यध्याप्य इत्याह—

आचार्यपुत्रश्शुश्रूषुर्ज्ञानदो धार्मिकश्शुचिः ।
आप्तश्शक्तोऽर्थदस्साधुस्स्वोऽध्याप्या दश धर्मतः ॥

[1] उप्तं—क. ख.

शक्तो विद्याग्रहणसमर्थः। ज्ञानदो विद्याप्रदः। नारदोऽपि—

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।
अथवा विद्यया विद्या चतुर्थं नोपलभ्यते॥

इमेऽध्याप्या इति वदन्नसूयकादयो नाध्याप्या इत्याह।

अत एव वसिष्ठः—

विद्या ह वै ब्राह्मणमाजगाम
गोपाय मा शेवधिस्तेऽहमस्मि।
असूयकायानृजवेऽयताय[1]
न मां ब्रूया वीर्यवती तथा स्याम्॥
यमेव विद्याऽशुचिमप्रमत्तं
मेधाविनं ब्रह्मचर्योपपन्नम्।
यस्ते न द्रुह्येत्कतमच्च नाह
तस्मै मां ब्रूया निधिपाय ब्रह्मन्॥

इति। शेवधिः निधिः। विष्णुरपि—

'नापरीक्षितं याजयेन्नाध्यापयेन्नोपनयेत्'

इति। अध्यापने नियमविशेषानाह यमः—

सततं प्रातरुत्थाय दन्तधावनपूर्वकम्।
स्नात्वा हुत्वाऽथ शिष्येभ्यः कुर्यादध्यापनं नरः॥

आपस्तम्बोऽपि—

---

[1] शठाय—ख.

'शयानश्चाध्यापनं वर्जयेन्न च तस्यां शय्यायामध्यापयेद्यस्यां शयीत'

इति । मनुरपि—

अध्येष्यमाणस्तु गुरुर्नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ॥

आरमेदध्यापनान्निवर्तेतेत्यर्थः । यः पुनरनन्यमना नाधीते तं निर्भर्त्सनादिना शिक्षयेत् । तदाह गौतमः—

'शिष्यशिष्टिरवधेन'

इति । शिष्टिश्शासनम् । अवधेन ताडनमकृत्वेत्यर्थः । शिष्यग्रहणमन्यस्यापि भार्यादेश्शासनीयस्यान्यस्योपलक्षणार्थम् । अत एव मनुः—

भार्या पुत्रश्च दासश्च प्रेष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्यास्स्यू रज्वा वेणुदलेन वा ॥

एतच्च निर्भर्त्सनादिना शासितुमशक्तौ वेदितव्यम् । अत एव गौतमः—

'अशक्तौ रज्जुवेणुदलाभ्यां तनुभ्याम्'

इति । ताडनमिति शेषः । तच्च शिरासि न कार्यम् । तदाह मनुः—

पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथं चन ।
अतोऽन्यथा तु प्रहरन्प्राप्तस्स्याच्चोरकिल्बिषम् ॥

यस्तु हस्तादिना ताडयति स राज्ञा शासनीय इत्याह गौतमः—

'अन्येन निघ्नन् राज्ञा शास्यः'

इति । यः पुनरर्थिने विद्यां न प्रयच्छति तस्य दोषमाह वसिष्ठः

'यो हि विद्यामधीत्यार्थिने न सम्प्रदद्यात्स कर्मानर्हस्स्यात्'

इति । यमोऽपि—

संवत्सरोषिते शिष्ये गुरुर्ज्ञानं न निर्दिशेत् ।

हरते दुष्कृतं तस्य शिष्यस्य वसतो गुरुः ॥

एतच्च शूद्रशिष्यव्यतिरिक्तविषयम् । तस्याध्ययननिषेधात् तथा-चापस्तम्बः —

'अशूद्राणामदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फल-वन्ति च कर्माणि'

इति । एतच्चाध्ययनं ब्राह्मणादेव कार्यम् । तस्यैव प्रवचनेऽधि-कारात् । तथा च मनुः—

अधीयीरंस्त्रयो वर्णास्स्वकर्मस्था द्विजातयः ।

प्रब्रूयाद्ब्राह्मणस्तेषां नेतराविति निश्चयः ॥

एतदनापद्विषयम् । आपदि क्षत्रियादेरप्यध्ययनविधाना[1]त् । तदाह स एव—

अब्राह्मणादध्ययनमापत्काले विधीयते ।

अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥

तत्रानुगमनमात्रमेव शुश्रूषा । साऽपि यावदध्ययनं तावदेव कार्य-मित्यर्थः । गौतमोऽपि—

---

[1] यनाभिधानात् - ग.

'आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा
समाप्ते ब्राह्मणो गुरुः'

इति। विद्याग्रहणमन्येषां रत्नप्रभृतीनामुपलक्षणार्थम्। अत एव देवलः—

रत्नान्यापः स्त्रियो विद्या धर्मश्शौचं सुभाषितम्।
विविधानि च शिल्पानि समादेयानि सर्वतः॥

मनुरपि—

श्रद्दधानश्शुभां विद्यामादधीतावरादपि।
अत्यापदि परं धर्मं स्त्रीरत्नं दुष्कुलादपि॥
विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम्॥

तथा विद्याफलमपि स एवाह—

तपो विद्याऽपि विप्रस्य निश्श्रेयसकरं परम्।
तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते॥

देवलोऽपि—

विद्या वित्तं तपश्चेति त्रीणि तेजांसि देहिनः।
इह चामुत्र च श्रेयस्तदेतैस्साध्यते त्रिभिः॥
विद्यया निर्मलं ज्योतिर्वित्तत्यागात्सुखोदयम्।
तपसा विमलां भूतिं प्राप्नुयान्मानवस्त्रिभिः॥

इति। विद्यादानस्य फलमाह यमः—

दशानां तु सहस्राणां युक्तानां धुर्यवाहिना[1]म् ।
सुपात्रे विनियुक्तानां कन्या विद्या च तत्समम् ॥

इति । बृहस्पतिरपि—

सहस्रसम्मिता धेनुरनड्वान्दश धेनवः ।
दशानडुत्समं यानं दशयानसमो हयः ॥
दशवाजिसमा कन्या भूमिदानं च तत्समम् ।
भूमिदानात्परं नास्ति विद्यादानं ततोऽधिकम् ॥

मनुरपि—

सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ।
वार्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम् ॥

संवर्तोऽपि—

विद्यादानेन सुमनाश्शिव[2]लोके महीयते ।

इति । इति स्मृतिचन्द्रिकायामध्ययनविधिः.

उपाकरणम्.

अथोपाकरणम् । तत्र याज्ञवल्क्यः—

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥

अधीयन्त इत्यध्याया वेदाः । तेषामुपाकर्माख्यं कर्म श्रावण्यां पौर्णमास्यां श्रवणेन वा नक्षत्रेण हस्तेन वा युक्तायां पञ्चम्यामोषधिप्रादुर्भावे सति कार्यम् । तथा चाश्वलायनः—

---

[1] वाजिनाम्—क. [2] सुमतिर्ब्रह्म—क.

'अथातोऽध्यायानामुपाकरणमोषधीनां प्रादुर्भावे
श्रवणेन श्रावण्यां पञ्चम्यां हस्तेन वा'

इति। यदा तु श्रावणे मासि न प्रादुर्भवन्त्योषधयस्तदा प्रौष्ठपद्यां कार्यम्। अत एव शौनकः—

'तद्वार्षिकमित्येतदा[1] चक्षते'

इति। वर्षाकाले भवं वार्षिकम्। वसिष्ठोऽपि—

'अथातस्स्वाध्यायोपाकर्म श्रावण्यां पौर्णमास्यां
प्रौष्ठपद्यां वा'

इति। प्रौष्ठपदी भाद्रपदस्य पौर्णमासी। तत्र श्रवणे नक्षत्रे विशेषमाह व्यासः—

श्रवणेन तु यत्कर्म उत्तराषाढसंयुतम्।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति॥
धनिष्ठासंयुतं कुर्याच्छ्रावणे[2] कर्म यद्भवेत्।
तत्कर्म सफलं विद्यादुपाकरणसंज्ञितम्॥

इति। बोधायनस्त्वाषाढ्यामेवोपाकरणमाह—

'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य तैष्यां
माघ्यां वोत्सृजेत्'

इति। तैषी तिष्यस्य[3] पौर्णमासी। एवं छन्दांस्युपाकृत्यानन्तरं पक्षद्वयेऽपि सार्धांश्चतुरो मासानधीयीत। तथा च मनुः—

---

[1] वार्षिकमथये तदा — ख. [2] श्रावणे ख. [3] पुष्यस्य — ख.

श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान् ॥

युक्तो यत्नवान् वसिष्ठस्त्वर्धपष्ठान्मासानधीयीतेत्याह--
'अर्धपञ्चमान्मासानर्धपष्ठान्वा'

इति । एतच्चाध्ययनं [1] गृहस्थस्याप्यविरुद्धम् । अत एवाधीयीतेत्यनुवृत्तौ शौनकः—
'समावृत्तो ब्रह्मचारिकल्पेन यथान्यायमितरे जायोपेयी [2] त्येके'

इतरे ब्रह्मचारिण इत्यर्थः । इति स्मृतिचन्द्रिकायामुपाकरणम् ॥

उत्सर्जनम्.

अथोत्सर्जनम् । तत्र मनुः—

पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥

शुक्लप्रतिपदि पूर्वाह्णे इत्युभयत्रापि सम्बध्यते । अत्र यश्श्रावण्यामुपाकुर्यादसौ पुष्यमासस्य शुक्लप्रतिपत्पूर्वाह्णे उत्सृजेत् । इतरस्तु माघे । अर्धपञ्चमान्मासानधीयीतेति तेनैवोक्तत्वात् । आपस्तम्बस्तु तैष्यां पौर्णमास्यामुत्सर्जनमाह—
'तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत्'

इति । रोहिण्यपि तिष्यस्यैव ग्राह्या । तथा च याज्ञवल्क्यः—

---

[1] एतच्च ग्रहणाधययनं क. ख. [2] जायोपेयी गृहस्थः—मदन.

पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः ॥

इति । अत्र पुराणम्—

उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च ।
ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः ॥

इति । एवमुत्सृज्यानन्तरं छन्दांसि शुक्लपक्षेष्वधीयीत । वेदाङ्गानि कृष्णपक्षेष्वधीयीत । तथा च मनुः—

अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् ।
वेदाङ्गानि तु सर्वाणि कृष्णपक्षेषु संपठेत् ॥

वसिष्ठोऽपि—

'अत ऊर्ध्वं शुक्लपक्षेष्वधीयीत कामं तु वेदाङ्गानि'

इति । काममितिवदन्नङ्गाध्ययनमनध्यायेऽप्यविरुद्धमित्याह । अत एव मनुः—

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥

वेदोपकरणान्यङ्गानि । नित्यस्वाध्यायो ब्रह्मयज्ञः । एतत्कर्मद्वयं छन्दसामयातयामत्वायेत्याह कात्यायनः—

प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद् द्विजैः ।
क्रियते छन्दसां तेन पुनराप्यायनं भवेत् ॥

---

[1] तस्यैव—ख.

अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः।
क्रीडमानैरपि सदा तत्तेषां सिद्धिकारणम् ॥

इति। इति स्मृतिचन्द्रिकायामुत्सर्जनम्.

अनध्यायाः.

अथानध्यायाः। तत्र मनुः—

विद्युत्स्तनितवर्षेषु महोल्कानां च सम्प्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥

स्तनितं मेघगर्जनम्। एतेषु विद्युदादिषु प्रत्येकमाकालिको निमित्तकालादारभ्य परेद्युर्यावत्स एव कालस्तावदनध्याय इत्यर्थः। एतच्च विद्युदादित्रयं वर्षाभ्योऽन्यत्र सन्ध्याकाले वेदितव्यम्। यदाह स एव—

एतानभ्यु[1]दितान्विद्याद्यदा प्रादुष्कृताग्निषु।
तदा विद्यादनध्यायमनृतौ[2] चाभ्रदर्शने ॥

प्रादुष्करणं विहरणम्। तेनात्र सन्ध्याकालो लक्ष्यते। अनृतौ वर्षाभ्योऽन्यत्र। अथाकालिका इत्यनुवृत्तौ गौतमः—

'स्तनयित्नुवर्षविद्युतश्च प्रादुष्कृताग्निषु'

इति। उल्कायां तु सर्वदाऽऽकालिकमेव। तथा चापस्तम्बः—

'उल्कायामग्न्युत्पाते च सर्वासां विद्यानां सार्वकालिकमाकालिकम्'

---

[1] एतांस्त्वभ्यु इति मुद्रितपुस्तकपाठः. [2] मपतौ—क. [3] अपतौ–क.

इति । अग्न्युत्पाते तु मनुरपि—

चोरैरुपप्लुते ग्रामे संभ्रमे चाग्निकारिते ।
आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च ॥

अद्भुतेषु रुधिरादिवर्षेषु । तथा च वसिष्ठः—

'उपलरुधिरपांसुवर्षेष्वाकालिकम्'

इति । यदा तु विद्युदादित्रयं युगपदुत्पद्यते तदा त्र्यहमनध्यायः । अत एव त्रिरात्रमित्यनुवृत्तौ गौतमः—

'वर्षविद्युत्स्तनयित्नुसन्निपाते'

इति । एतदपि वर्षाकालादन्यत्र वेदितव्यम् । यदाहापस्तम्बः—

'विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र सन्निपतेयुस्त्र्यहमनध्यायो यावद्भूमिर्व्युदकेत्येके । एकेन द्वाभ्यां वैतेषामाकालम्'

इति । भारद्वाजोऽपि—

अग्न्युत्पातेऽपर्तुवर्षे ग्रामेऽनध्ययनं भवेत् ।
आकालिकं त्रिरात्रं तु सविद्युत्स्तनयित्नुके ॥

यदा तु वर्षास्वेव सन्ध्यायां विद्युत्स्तनितः तदा सज्योतिरनध्यायः । तथा च मनुः—

प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्स्वने ।
सज्योतिस्स्यादनध्यायश्शेषे रात्रौ यथा दिवा ॥

प्रातस्सन्ध्यायां निमित्तोत्पाते सज्योतिर्यावत्सूर्यस्तावदेवानध्य-

यनं दिवेत्यर्थः। अपरस्यां तु यावन्नक्षत्राणि तावदेव। शेषे ऋतौ यथा दिवाऽनध्यायस्तथा रात्रावपीत्यर्थः। हारीतस्तु स्तनिते विशेषमाह—

'सायं संध्यायां स्तनिते रात्रौ नाधीयेरन्। प्रातस्सन्ध्यायां स्तनिते त्वहोरात्रम्'

इति। आपस्तम्बोऽपि—

'सप्रदोषमहरनध्यायो दह्रेऽपररात्रे स्तनयित्नुनोर्ध्वमर्धरात्रादिसेके गवां चावरोधे'

इति। दह्रे अल्पे अपररात्रे स्तनयित्नुना गर्जितेन निमित्तेन सप्रदोषमहरनध्याय इत्यर्थः। निर्घातादयस्तु वर्षास्वप्याकालिका इत्याह मनुः—

निर्घाते भूमिचलने ज्योतिषां चोपसर्जने।
एतानाकालिकान्विद्यादनध्यायानृतावपि॥

निर्घात आन्तरिक्षो ध्वानिविशेषः। ज्योतिषामुपसर्जनं चन्द्रसूर्ययोः परिवेषः। आपस्तम्बस्तु परिवेषादौ तात्कालिकमनध्यायमाह—

सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च॥

द्युनिशमहोरात्रम्। यत्तु यमेनोक्तम्—

शक्रध्वजनिपाते च उल्कापाते तथैव च।
अनध्यायस्त्रिरात्रं तु भूमिकम्पे तथैव च॥

इति, तदुल्काया विद्युत्सहभावे द्रष्टव्यम्।

अत एव वसिष्ठः—

'उल्काविद्युत्समासे त्रिरात्रम्'

इति । अत्र मनुः—

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ।
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ॥

इति । अत्र चानध्ययनमहोरात्रं वेदितव्यम् । अत एव द्युनिश मित्यनुवृत्तौ याज्ञवल्क्यः—

पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा च श्राद्धिकं प्रतिगृह्य च ॥

राहुसूतके चन्द्रसूर्योपरागे । ऋतुसन्धिषु वसन्तादीनां सन्धिषु प्रतिपत्स्वित्यर्थः । तथा रामायणे हनुमद्वाक्यम्—

सा स्वभावेन तन्वङ्गी त्वद्वियोगाच्च कर्शिता ।
प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥

इति । हारीतोऽपि—

प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः ।
श्वोऽनध्यायेऽद्य शर्वर्यां नाधीयीत कदाचन ॥

स्मृत्यन्तरेऽपि—

प्रदोषे तु त्रयोदश्यां नाध्येयं प्रतिपत्सु च ।

इति । श्राद्धसम्बन्धि श्राद्धिकम् । तद्भुक्त्वा प्रतिगृह्य वा द्युनिश-मनध्याय इत्यर्थः । तथा च वसिष्ठः—

फलान्यपस्तिलान्भक्षयान्यच्चान्यच्छ्राद्धिकं भवेत् ।
प्रतिगृह्याप्यनध्यायाः पाल्यास्स्युर्ब्राह्मणैस्स्मृताः ॥

एतच्च एकोद्दिष्टव्यतिरिक्तविषयं, तत्र त्रिरात्रविधानात् । तथा च मनुः—

प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥

केतनं निमन्त्रणम् । राहुदर्शने शङ्खोऽपि—

'राहुदर्शने शक्रध्वजप्रपतने आचार्ये च प्रमृते त्रिरात्रम्'

इति । गौतमस्त्वाकालिकमाह—

'आकालिका निर्घातभूकम्पराहुदर्शनोल्काः'

इति । एवं च राहुदर्शने त्रिरात्राकालिकाहोरात्राणां विकल्पो वेदितव्यः । याज्ञवल्क्योऽप्याचार्यमरणे त्रिरात्रमाह—

त्र्यहं प्रेतेष्वनध्यायश्शिष्यर्त्विग्गुरुबन्धुषु ।

गुरुरत्राचार्यः, न मुख्यः तत्र दशाहविधानात् । अत एव बान्धवा अप्यसपिण्डा एव ग्राह्याः । वसिष्ठस्तु शिष्यर्त्विगादिष्वप्यहोरात्रमाह—

'आचार्यपुत्रशिष्यभार्यास्वहोरात्रं, ऋत्विक्षु योनिसम्बन्धेषु च'

इति । योनिसम्बन्धा मातुलादयः । एवं सब्रह्मचारिण्यपि द्रष्टव्यम् । अत एवाहोरात्रमित्यनुवृत्तौ गोभिलः—

सब्रह्मचारिणि प्रेते स्वे च भूमिपतावपि ।

इति । उपाकर्मोत्सर्जनयोस्तु त्रिरात्रं वेदितव्यम् । अत एव त्र्यहमनुवृत्तौ याज्ञवल्क्यः—

उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा ।

इति । मनुस्तूत्सर्जने पक्षिणीमेकाहं त्रिरात्रं च विकल्पेनाह—

यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।

विरमेत्पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥

उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् ।

इति । उभयतः पक्षौ दिवाऽहनी यस्या रात्रेस्सा पक्षिणी । एतेषां पक्षिण्यादीनां तत्तद्गृह्यानुसारेण व्यवस्था । आपस्तम्बस्तु उपाकरणमारभ्य मासं प्रदोषेऽनध्यायमाह—

'श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीत'

इति । तत्र त्रयोदश्यादीनां तु मासादुपर्यपि नाधीयीत । तथा च पुराणम्—

मेधाकामस्त्रयोदश्यां सप्तम्यां च विशेषतः ।

चतुर्थ्यां च प्रदोषेषु न स्मरेन्न च कीर्तयेत् ॥

अत्र प्रजापतिः—

षष्ठी च द्वादशी चैव अर्धरात्रोननाडिका ।

प्रदोषे न त्वधीयीत तृतीया[1] नवनाडिका ॥

[1] चतुर्थी —ग.

अर्धरात्रोननाडिका अर्धरात्राद्धटिकयैकया हीनेत्यर्थः । नवनाडिका रात्राविति शेषः । प्रदोषे निशायाः प्रथमे प्रहरे। यथाहोशना—

'त्रयोदश्यां प्रथमांश्चतुरो मुहूर्तान्नाधीयीत'

इति । दक्षो रजन्या मध्यमयामद्वयेऽनध्ययनमाह—

प्रदोषपश्चिमौ[1] यामौ वेदाभ्यासेन तौ [2]नयेत् ।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते ॥

इति । अत्र शातातपः—

पञ्चदश्यां चतुर्दश्यामष्टकासु महोत्सवे ।
प्रदोषे च त्रयोदश्यामष्टम्यां प्रतिपद्यपि ॥

महोत्सवे प्रतिष्ठादौ । अष्टका अपि पैठीनसिनोक्ताः—

'पौषप्रभृतयः कृष्णे भवास्तिस्रोऽष्टका मार्गशीर्षप्रभृतय इत्येके'

इति । पुष्येण युक्ता पौर्णमासी पौषी । सा यस्मिन्मासि स पौषः । शौनकस्तु हेमन्तशिशिरयोः कृष्णे भवास्तिस्रोऽष्टका इत्याह—

'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः'

इति । अत्र चानध्ययनमहोरात्रं वेदितव्यम् । तथा च मनुः—

अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ।

इति । गौतमोपि—

---

[1] प्रदोषः पश्चिमौ—क. [2] वेदाभ्यासरतो—हेमाद्रिः

'कार्तिकी फाल्गुन्याषाढी पौर्णमासी । तिस्रोऽष्टका-
स्त्रिरात्रम्'

इति । उक्तपौर्णमासीरारभ्य त्रिरात्रम् । तथैव तिस्रोऽष्टकास्सप्तम्यादयस्तास्वपि त्रिरात्रमनध्ययनमित्यर्थः । एवं महानवम्यादिष्वपि द्रष्टव्यम् । तथा च पुराणम्—

महानवम्यां द्वादश्यां भरण्यां च महातिथौ ।
तथाऽक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः ॥
माघमासस्य सप्तम्यां रथाख्यायां च वर्जयेत् ।
अध्यापनमथाभ्यक्तस्नानकाले च वर्जयेत् ॥
नीयमानं शवं दृष्ट्वा महीस्थं वा द्विजोत्तमः ।
अकालगर्जितादौ च परस्वा[1] शौचकादिषु ॥
अनध्यायं बुधः कुर्यादुपरागादिकेऽपि च[2] ।

महानवम्याश्वयुजशुक्लनवमी । महाद्वादशी कार्तिकशुक्लद्वादशी । महाभरणी प्रोष्ठपद्यनन्तरा[3] । अक्षयतृतीया वैशाखशुक्लतृतीया । रथाख्या माघशुक्लसप्तमी । नारदीयेऽपि—

अयने विषुवे चैव शयने बोधने हरेः ।
अनध्यायस्तु कर्तव्यो मन्वादिषु युगादिषु ॥

पुराणान्तरेऽपि—

युगादिषु च सर्वेषु तथा मन्वन्तरादिषु ।
अनध्यायं प्रकुर्वीत या च सोपपदा तिथिः ॥

[1] सरस्वा—क. [2] परागदिने तथा—ख. [3] पितृपक्षान्तर्वर्तिनी—ग.

मन्वन्तरादयस्तु मत्स्यपुराणे दर्शिताः—

आश्वयुक्छुक्लनवमी कार्तिके द्वादशी तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्य त्वमावास्या पुष्यस्यैकादशी तथा ।
आषाढस्यापि दशमी माघमासस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा आषाढस्यापि पूर्णिमा ।
कार्तीकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ।
मन्वन्तरादयश्चैते दत्तस्याक्षयकारकाः ॥

इति । युगादयोऽपि विष्णुपुराणोक्ता वेदितव्याः—

वैशाखमासस्य सिता तृतीया
नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य च कृष्णपक्षे
त्रयोदशी पञ्चदशी च माघे ॥ ‡

इति । गौतमस्तु श्वादीनां मध्यगमनेऽनध्यायमाह—

'श्वनकुलसर्पमण्डूकमार्जाराणां त्र्यहमुपवासो वि-
प्रवासश्च'

इति । अत्रोपवासः प्रायश्चित्तम् । विप्रवासस्सहवासाभावः ।

‡ कल्यादिस्स्यात्कृष्णपक्षे नभस्ये च त्रयोदशी ।
कार्तिके शुक्लनवमी त्वाषाढी कृतयुगस्य च ॥
त्रेतादीर्माधवे शुक्ले तृतीया पुण्यसंज्ञिता ।
इति ग. पुस्तकेऽधिकः पाठः.

सोऽपि त्रिरात्रमेव । श्वगोमायुमार्जारसर्पनकुलमूषिकानुवृत्तौ–

'एतेषामेवाधीयानानामन्तरागमने त्रिरात्रमुपवास-
स्त्र्यहं च विवसेत्'

इति हारीतस्मरणात् । एतेनार्थात्त्र्यहमनध्याय इत्युक्तं भवति । वसिष्ठस्त्वहोरात्रोपवासमाह—

'श्वमार्जारनकुलशीघ्रगानां त्वहोरात्रम्'

इति । अभोजनमिति शेषः, तस्यैवाधिकारात् । एतच्च त्रिरात्राशक्तौ वेदितव्यम् । मार्जारगमने तु प्रायश्चित्तविशेषमाहोशना–

'मार्जारान्तरागमने तु घृतं प्राश्य त्र्यहमुपवसेत्'

इति । आपस्तम्बस्तु चण्डालादिव्यवाये षण्मासानध्ययनमाह—

'चण्डालश्वपाकशशकस्य षण्मासान्'

इति । हस्तिव्याघ्रयोस्तु संवत्सरं वेदितव्यम् । तदाह स एव—

'यदि हस्ती संवत्सरम् । व्याघ्रस्तथैव च'

इति । मनुस्तु पश्वादिगमने द्युनिशमनध्यायमाह—

पशुमण्डूकमार्जारश्वसर्पनकुलादिभिः ।
अन्तरागमने विद्यादनध्यायमहर्निशम् ॥

याज्ञवल्क्योऽपि—

पशुमण्डूकनकुलश्वाहिमार्जारमूषिकैः[1] ।
कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥

---

[1] सूकरैः—खे.

शक्रपातोच्छ्रयोपलक्षितकाल इत्यर्थः । अत्र शक्रोच्छ्रयस्य काल-
माह गर्गः—

द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा ।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे ॥

इति । विश्वशब्देन वैश्वदेवमुत्तराषाढानक्षत्रमुच्यते । वासवश-
ब्देन वसुदैवत्यं धनिष्ठानक्षत्रमुच्यते । शक्रपातोऽपि तस्मिन्नेव
मासे । तथा च पुराणम्—

मासि भाद्रपदे राजन् शक्रयष्टिप्रपातनम् ।

इति । अत्र याज्ञवल्क्यः—

श्वक्रोष्टृगर्दभोलूकसामवाणार्तनिस्वने[1] ।

क्रोष्टा सृगालः । उलूको घूकः । वाणो वीणा,

'वाणश्शततन्तुर्भवति'

इति महाव्रते दर्शनात् । आर्तो दुःखितः । एतेषां निस्स्वने शब्दे
श्रूयमाणे तावत्कालं नाधीयीत,

'एतांस्तात्कालिकान्विदुः'

इति तेनैवोक्तत्वात् । मनुरपि—

नीहारे वाणशब्दे च सन्ध्ययोरुभयोरपि ।

एवं भेर्यादिनिस्स्वनेऽपि द्रष्टव्यम्,

'वाणभेरीमृदङ्गगर्दार्तशब्देषु'

[1] वाणाशनिस्वने—ख.

इति गौतमस्मरणात् । गर्दभशकटः । सामशब्दे तु ऋग्यजुषोरेवा-
नध्यायो नान्यस्य । तदाह मनुः—

सामध्वनौ ऋग्यजूंषि नाधीयीत कदा चन ।

यमोऽपि—

सामशब्दे नर्ग्यजुषी मारुते चातिवायति ।

इति । तत्र हेतुमाह मनुः—

ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः ।
सामवेदस्स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥

इति । एवं मृदङ्गादिस्वनेऽपि साम्नामनध्यायः,

'शाखान्तरे च साम्नामनध्यायः'

इत्यापस्तम्बस्मरणात् । एवममेध्यादिसन्निधानेऽपि द्रष्टव्यम् ।
तथा च याज्ञवल्क्यः—

अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ।

अन्तिके समीपे । विष्णुरपि—

'न शूद्रपतितयोस्समीपे न देवायतनश्मशानचतु-
ष्पथरथ्यासु नोदकान्ते न पीठोपनिहितपादो न
वान्तो न विरिक्तो नाजीर्णः'

इति । मनुरपि—

नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ।
वसित्वा मैथुनं वासश्श्राद्धिकं प्रतिगृह्य च ॥

इति । अन्ते समीपे । मैथुनं वासः येन सह मैथुनमाचरितं तद्वासः परिधायेत्यर्थः । एतदनिर्णिक्तवासोविषयम् । अत एव यमः—

वासस्यपि ह्यनिर्णिक्ते मैथुनाचरिते सदा ।

वसिष्ठोऽपि—

'मैथुनव्यपेतायां शय्यायां वाससा च मिथुनव्यपेतेनानिर्णिक्तेन ग्रामान्तरे[1] छर्दितस्य'

इति । छर्दिते त्वहोरात्रमनध्यायः,

'छर्दितश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रम्'

इति गौतमस्मरणात् । अथ वा घृतं प्राश्याधीयीत । तदाहापस्तम्बः—

'छर्दयित्वा स्वप्नान्तं सर्पिर्वा प्राश्य'

इति । स्वप्नान्तमोदयादित्यर्थः । मनुस्तु ग्रामेऽपि नाधीयीतेत्याह—

नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।
धर्मनैपुणकामानां पूतिगन्धे च सर्वतः ॥

ये गृहीतवेदास्ते धर्मनैपुणकामाः । इतरे विद्यानैपुणकामाः । अनेन विद्यानैपुणकामानां ग्रामेष्वध्ययनमविरुद्धमित्याह । अत एव वसिष्ठः—

'नगरेषु कामं गोमयपर्युक्षिते परिलिखिते वा'

इति । अत एव मनुरपि—

[1] ग्रामान्ते—क. ख.

अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥

वसिष्ठोऽपि—

'सन्ध्यास्वन्तश्शवदिवाकीर्त्ये'

इति । दिवाकीर्त्यश्चण्डालः । अन्तश्चण्डाले ग्रामे नाधीयीतेत्यर्थः । एतच्चतुष्पथादिष्वपि द्रष्टव्यम् । तथा च प्रचेताः—

'चतु[1]ष्पथमहापथरथ्यासूद्यानेषु न देवसमीपे'

अधीयीतेति शेषः । गौतमोऽपि—

'श्मशानग्रामान्तमहापथाशौचेषु'

इति । श्मशाने तु विशेषमाहापस्तम्बः—

'श्मशाने सर्वतश्शम्याप्रासात् ग्रामेणाध्यवसिते क्षेत्रेण वा नानध्यायः । श्मशानवच्छूद्रपतितौ । समानागार इत्येके । शूद्रायां तु प्रेक्षणप्रतिप्रेक्षणयो-रेवानध्यायः'

इति । तथाऽश्वारूढोऽपि नाधीयीत । तथा च मनुः—

नाधीयीताश्वमारूढो नवृक्षं च न हस्तिनम् ।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥

---

1 एवं चतु—क.

न विवादे न कलहे न सेनायां न सङ्गरे ।

न भुक्तमात्रे नाजीर्णे न वमित्वा न सूतके ॥

इति । इरिणमूषरम् । प्रौढपाद आसनाद्यारूढपादः । अवसक्थिका जान्वोर्मध्यस्य[1] च वस्त्रादिना बन्धनम् । भुक्तमात्रे यावदार्द्रपाणिरित्यर्थः । तथा च याज्ञवल्क्यः—

देशेऽशुचावात्मनि च विद्युत्स्तनितसम्प्लवे ।

भुक्त्वाऽऽर्द्रपाणिरम्भोऽन्तरर्धरात्रेऽतिमारुते ॥

सम्प्लवः पुनःपुनरुद्भवः । मनुरपि—

उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने ।

उच्छिष्टश्राद्धभुक्चैव मनसाऽपि न चिन्तयेत् ॥

बोधायनोऽपि—

'मनसाऽपि जननमरणयोरनध्यायः'

इति । मनुस्तु पांसुवर्षादावपि नाध्येतव्यमित्याह—

पांसुवर्षे दिशां दाहे गोमायुविरुते तथा ।

श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥

सर्वत्र ज्योतिषो दर्शनं दिग्दाहः । याज्ञवल्क्योपि—

पांसुवर्षे दिशां दाहे सन्ध्यानीहारभीतिषु ।

धावतः पूतिगन्धे च शिष्टे च गृहमागते ॥

धावतस्त्वरितं गच्छतः । शिष्टे चोक्तलक्षणे गृहमागते तदनुज्ञावधिरनध्याय इत्यर्थः । तथा च यमः—

---

[1] र्मध्ये— .

आगतं चातिथिं दृष्ट्वा नाधीयीतैव बुद्धिमान् ।
अभ्यनुज्ञापिते तस्मिन्नध्येतव्यं प्रयत्नतः ॥

मनुरपि—

अतिथिं चाननुज्ञाप्य मारुते वाति वा भृशम् ।
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ॥

तथाऽनृतावभ्रदर्शनेऽप्यनध्यायमाह गौतमः—

'अभ्रदर्शने चापर्तौ'

अभ्रं जलधरो मेघः । एवं वृक्षविशेषच्छायायामपि द्रष्टव्यम् ।
तथा च यमः—

श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च ।
कदा चिदपि नाध्येयं कोविदारकपित्थयोः ॥

इति । यत्पुनर्मनुनोक्तं—

द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः ।
स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥

इति, तद्ब्रह्मयज्ञाध्ययनविषयम् । तथा च श्रुतिः—

'तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः'

इति । अत एव मनुः—

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥

इति। वेदोपकरणान्यङ्गानि। नित्यस्वाध्यायो ब्रह्मयज्ञसम्बन्धी।
शौनकोऽपि—

नित्ये जपे च काम्ये च क्रतौ पारायणेऽपि च।
नानध्यायोऽस्ति वेदानां ग्रहणे[1] ग्रहणे स्मृतः[2]॥

इति। एवमुक्तानध्यायाध्ययने दोषमाह लिखितः—

छिद्राण्येतानि विप्राणां येऽनध्यायाः प्रकीर्तिताः।
छिद्रेभ्यस्स्रवति ब्रह्म ब्राह्मणेन यदार्जितम्॥
तत्काले तस्य रक्षांसि श्रियं ब्रह्म यशो बलम्।
सर्वमादाय गच्छन्ति वर्जयन्तीप्सितं फलम्॥

यमोऽपि—

आयुः प्रज्ञां पशून्मेधां कृन्तामि सुकृतं च यत्॥
अनध्यायेष्वभ्यसतो ब्रह्म व्याहरतस्तथा॥

इन्द्रनारदसंवादेऽपि—

अनध्यायेष्वधीयानान्किं शक्र न गतोऽसि तान्।
असुरास्ते दुरात्मानो ब्रह्मघ्ना ब्रह्मदूषकाः॥
अनध्यायेष्वधीतं हि नाधीतं यदि वैदिकम्[3]।
मृतास्स्वर्गं न गच्छन्ति किं नारद न ते हताः॥

इति स्मृतिचन्द्रिकायामनध्यायः.

ब्रह्मचर्यकालावधिः

अथ ब्रह्मचर्यकालावधिः। तत्रापस्तम्बः—

---

[1] ग्राहणे— ग. [2] ग्रहणे चाह योऽस्मृतः—हेमाद्रिः
[3] अनध्यायेष्वधीयन्ते न ते यानि स्यवैदिकम्—हेमाद्रिः.

‘ उपेतस्याचार्यकुले ब्रह्मचारिवासः । अष्टाचत्वा
रिंशद्वर्षाणि । पादूनमर्धेन त्रिभिर्वा ’

इति । त्रिभिः पादैरूनं द्वादश वर्षाणीत्यर्थः । एतच्चाशक्तौ वेदि तव्यम् । तथा च देवलः—

‘ अतः परमष्टाचत्वारिंशद्वार्षिकीं वेदव्रतचर्यामाति
ष्ठेदशक्तश्चेच्चतुर्विंशतिवार्षिकीं[1] द्वादशवार्षिकीं वा ’

इति । एतदपि प्रतिवेदाभिप्रायम् । यदाह बोधायनः—

‘ अष्टाचत्वारिंशद्वर्षाणि पौराणं वेदब्रह्मचर्यं चतु
र्विंशतिं द्वादश वा प्रतिवेदम् ’

इति । यमोऽपि—

वसेद्द्वादश वर्षाणि चतुर्विंशतिमेव वा ।
षट्त्रिंशतं वा वर्षाणि प्रतिवेदं व्रतं चरेत् ॥

मनुस्तु वेदग्रहणान्तं ब्रह्मचर्यमित्याह—

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥

अस्यार्थः—त्रैवेदिकमृग्यजुस्सामाख्यात्मकवेदत्रयविषयम् । तत् षट्त्रिंशदाब्दिकं कार्यम् । एवं च प्रतिवेदं द्वादश वर्षाणि ब्रह्मचर्यव्रतं चरेदित्युक्तं भवति । अधिकपक्षे प्रतिवेदं षड्वर्षाणि । पादिके तु त्रीण्येव । याज्ञवल्क्योऽपि—

प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा ।
ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे ॥

---

[1] अशक्तश्चेत् षट्त्रिंशद्वार्षिकीं चतुर्विंशतिवार्षिकीं प्र

केशान्तो गोदानाख्यं कर्म । तत्तु षोडशे वर्षे कार्यमित्यर्थः । एतच्च ब्राह्मणविषयम् । यदाह मनुः—

केशान्तष्षोडशे वर्षे ब्राह्मणस्य विधीयते ।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥

इति । इति स्मृतिचन्द्रिकायां ब्रह्मचर्यकालावधिः.

ब्रह्मचारिद्वैविध्यम्.

ब्रह्मचारिद्वैविध्यं—द्विविधो ब्रह्मचारी उपकुर्वाणो नैष्ठिकश्च । तत्रोपकुर्वाणस्योक्ता धर्माः । अधुना नैष्ठिकब्रह्मचारिणो धर्मा उच्यन्ते । तत्र याज्ञवल्क्यः—

नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥

उपकुर्वाणोक्तविधिनाऽऽत्मानं निष्ठामुत्क्रान्तिकालं गमयतीति नैष्ठिकः । स पुनराचार्यादिसन्निधौ वसेत्, न समावर्तेतेत्यर्थः । अत्र च तदभाव इति सर्वत्रानुवर्तते । एवं च पत्न्यभावेऽग्निं परिचरेदित्युक्तं भवति । एतच्च सपिण्डाभावविषयम् । यदाह मनुः—

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥
एतेष्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥

स्थानासनविहारवान् कालविशेषाश्रयणेन उत्थानोपवेशगमनवा-

नित्यर्थः । एतदप्यनूचानब्राह्मणगुर्वादिविषयमन्यथा दोषश्रवणात् । तदाह स एव—

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् ।
ब्राह्मणे वाऽननूचाने काङ्क्षन्गतिमनुत्तमाम् ॥

इति । तत्र वसतो ये धर्मास्तानाह बृहस्पतिः—

उपकुर्वाणकस्यैतत्समादिष्टं मया व्रतम् ।
अधुना संप्रवक्ष्यामि नैष्ठिकस्य समासतः ॥
सन्ध्याऽग्निकार्यं स्वाध्यायो भिक्षाऽधश्शयनं दया ।
आमृत्योर्नैष्ठिकं कुर्वन्ब्रह्मलोकमवाप्नुयात् ॥

इति । वासिष्ठोऽपि—

'संयतवाक्चतुर्थषष्ठाष्टमकालभोजी भैक्षमाचरेत्[1] गुर्वधीनो जटिलश्शिखाजटो वा गुरुं गच्छन्तमनुगच्छन्[2] आसीनं चेत्तिष्ठन्[3] शयानं चेदासीन उपासीत । आहूताध्यायी[4] सर्वं लब्धं निवेद्य[5] तदनुज्ञया भुञ्जीत । खट्वाशयनदन्तप्रक्षालनाञ्जनाभ्यञ्जनोपानच्छत्रवर्जी तिष्ठदहनि रात्रावासीत । त्रिरह्नोऽ[6] भ्युपेयादपः'

इति । अहनि त्रिरपोऽभ्युपेयात्त्रिषवणस्नायी स्यादित्यर्थः । देवलोऽपि—

---

[1] ष्टमकाले भैक्षभोजी ; [2] गच्छेत् ; [3] तिष्ठेत्.
[4] दासीनोऽध्यायी ; [5] सर्वलब्धनिवेदितं ;
[6] वर्जस्स्थानासनशीलस्त्रिरह्नो—वद्य.

‘ब्रह्मसूत्राक्षमालादण्डकाष्ठकुण्डिकामौञ्जीमेखला-
धारणं सकृद्भोजनमसकृदव[1]गाहनमुभयकालम-
ग्निहोत्रं सन्ध्योपासनमलुप्तलोमकेशनखत्वग्गन्ध-
माल्यस्नेहाञ्जनाभ्यञ्जनवेषालङ्कारच्छत्रोपानद्वाहन-
लङ्घनप्लवनधावनचिकित्साज्यौतिपलक्षणवास्तु--
विद्यामङ्गलपौष्टिकशान्तिकर्मगान्धर्वसङ्गसमयबन्ध-
नाशिल्पलेखन[2] कारुकर्मवेश्मक्षेत्रद्रव्यधनधान्यपरि-
च्छदशस्त्रद्यूतव्यवहारज्ञभावलीलापरिहासप्रणयकु-
हकाविस्मापनाविडम्बनाविवादोत्सेकपरिदेवनरोदन-
पादो[3] द्वर्तनवर्जनम्’

इति। हारीतस्त्वग्निपरिचर्याविधिमाह—

‘यज्ञियास्समिध आहृत्य संमार्जनोपलेपनो-
द्बोधनसमूहनसमिन्धनपर्यग्निकरणपरिक्रमोपस्था--
नहोमस्तोत्रनमस्कारादिभिरग्निं परिचरेन्नाग्निमधि-
तिष्ठेन्न पद्भ्यां कर्षेन्न मुखेनोपधमेत्। नापश्चाग्निं
च युगपद्धारयेत्। नाजीर्णभुङ्ङर्थिभ्यो दद्यान्ने-
न्धनेभ्यो दधदातिक्रामेन्न[1] निष्ठीवेद्विविधचरुहवि-

---

[1] दप्स्वव ; [2] लेख्यलेखन ; [3] वास्तिनस्यपादो--अपरार्कपाठः.

[4] नाजीर्णभुक्त उच्छिष्टो वाऽभ्यादध्यान्नेन्धनेभ्योऽभ्यादधद्वाऽतिक्रामेत्—अपरार्कपाठः.

र्धानविशेषैराग्नेयैरहरहराग्निमिन्धेतामन्त्रय गच्छेदा-
हृत्य निवेदयेत्'

इति । एवं कुर्वतः फलमाह मनुः—

आ समाप्तेश्शरीरस्य यस्तु शुश्रूषते गुरुम् ।
स गच्छत्यञ्जसा विप्रो ब्रह्मणस्सद्म शाश्वतम् ॥

याज्ञवल्क्योऽपि—

अनेन विधिना देहं साधयन्विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेहाजायते पुनः ॥

यमोऽपि—

आ निपाताच्छरीरस्य ये चरन्त्यूर्ध्वरेतसः ।
ते यान्ति ब्रह्मणस्स्थानं जायन्ते न पुनर्भुवि ॥

यत्तु हारीतेनोक्तम्—

मृत्योः परस्ता[1] दमृता भवन्ति
ये ब्राह्मणा ब्रह्मचर्यं चरन्ति ।

इति, तद्ब्रह्मविन्नैष्ठिकविषयं,

'सर्वे ते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति'

इति श्रुतेः । सर्व एते चत्वार आश्रमिणः कर्म कुर्वाणाः पुण्यलोका भवन्ति । यः पुनरेषां मध्ये ब्रह्मसंस्थो ब्रह्मनिष्ठस्सोऽमृतत्वमपुनरावृत्तिलक्षणं फलमेति । एतच्च नैष्ठिकत्वं कुब्जादीनां नित्यमित्याह विष्णुः—

---

[1] पुरस्ता—ख.

कुब्जवामनजात्यन्धक्लीबपङ्ग्वार्तरोगिणाम् ।
व्रतचर्या भवेत्तेषां यावज्जीवमनंशतः ॥

अनंशतः अंशाभावादित्यर्थः । सङ्ग्रहकारोऽपि—

पङ्ग्वादीनामनंशत्वा[1]दसामर्थ्याच्च शास्त्रतः ।
नियतं नैष्ठिकत्वं स्यात्कर्मस्वनधिकारतः ॥

इति । नन्वेवं तर्हि कुब्जादीनामेव नैष्ठिकत्वमस्तु नेतरेषाम् । मैवं,

यदि त्वात्यन्तिकं वासं रोचयेत गुरोःकुले[2] ।
युक्तः परिचरेदेनमा शरीरविमोक्षणात् ॥

इति पाक्षिकत्वप्रतिपादकमनुवचनविरोधात् । न हि कुब्जादीनां पाक्षिकं नैष्ठिकत्वमस्ति । ननु च यदीतरेषामपि नैष्ठिकत्वमस्ति, तर्हि

'यावज्जीवमग्निहोत्रं जुहुयात्'

इति गृहस्थधर्मविधायिका श्रुतिर्बाध्येत । मैवं, नैष्ठिकत्वस्य पाक्षिकत्वेन विषयान्तरसम्भवात्; ये हि स्त्रीरागवशाद्गार्हस्थ्यमेव कामयन्ते तद्विषयेयं यावज्जीविका श्रुतिरित्यविरोधः । तथा च जाबालिः—

'गृही वनं प्रविशेत् । यदि गृहमेव कामयेत तदा
यावज्जीवमग्निहोत्रं जुहुयात्'

इति । युक्तं चैतत्, अन्यथा—

---

[1] मनङ्गत्वा—वैद्य. [2] यदि त्वात्यन्तिको वासो रोचेतास्मै गुरोः कुले—क.

'यमिच्छेत्तमाविशेद्यदि वेतरथा ब्रह्मचर्यादेव
प्रव्रजेत्'

इत्यादयो बाध्येरन् । ननु च स्मार्तनैष्ठिकत्वस्य श्रौताग्नि-
होत्रादिना बाध एवास्तु । मैवं, तस्यापि

'ब्रह्मचार्याचार्यकुलवासी द्वितीयोऽत्यन्तमात्मानमा-
चार्यकुलेऽवसादयेत्'

इत्येतच्छ्रुतिमूलत्वेनाविशेषात् । अतो न ब्रह्मचारिद्वैविध्यमपहातुं
शक्यम् । उक्तं च हारीतेन—

'द्विविधो ब्रह्मचारी उपकुर्वाणो नैष्ठिकश्च'

इति । ननु ब्रह्मचारिद्वैविध्ये चत्वार आश्रमा इत्यापस्तम्बादि-
वचनं बाध्येत । मैवं, सङ्कल्पभेदमात्रेण नित्यकाम्याग्निहोत्रवदन-
योरभेदोपपत्तेः । अत एव दक्षः—

द्वितीयो नैष्ठिकश्चैव तस्मिन्नेवाश्रमे स्थितः ।

इति । 'तस्मिन्नेवाश्रमे' इति वदन् तद्धर्मातिदेशमाह । अत एव
गौतमः—

'तत्रोक्तं ब्रह्मचारिणः'

इति । तत्रोपकुर्वाणप्रकरणे यदुक्तमग्नीन्धनभैक्षचर्यादिकं तन्नै-
ष्ठिकस्यापि भवतीत्यर्थः ।

इति स्मृतिचन्द्रिकायां ब्रह्मचारिप्रकरणम्.

आश्रमसमुच्चयविकल्पौ.

अथाश्रमसमुच्चयविकल्पौ । तत्र समुच्चयं प्रकृत्याह मनुः—

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ॥

गृहस्थप्रभवास्तदुपजीविन इत्यर्थः । क्रमश इत्यनेनाश्रमप्रातिलोम्यं प्रतिषिद्धमित्याह । अत एव दक्षः—

त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते ।
प्रातिलोम्येन यो याति न तस्मात्पापकृत्तमः ॥

इति । अत एव मृतभार्येण पुनर्विवाहासामर्थ्ये न ब्रह्मचारिणा भवितव्यमित्याह स एव—

यो गृहाश्रममास्थाय ब्रह्मचारी भवेत्पुनः ।
न यतिर्न वनस्थश्च स सर्वाश्रमवर्जितः ॥

इति । आपस्तम्बोऽपि समुच्चयमेवाह—

'चत्वार आश्रमाः गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थ्यमिति । तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति'

इति । पुराणेऽपि—

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
अप्रमत्तो भवान्येन[1] मागाः पुत्र कुवर्त्मना ॥

जाबालिश्रुतिस्तु चतुर्णां त्रयाणां द्वयोर्वा समुच्चयमाह—

---

[1] मत्तोऽप्रतानेन—ग.

'ब्रह्मचर्यं परिसमाप्य गृही भवेत् । गृही भूत्वा
वनी भवेत् । वनी भूत्वा प्रव्रजेत् । यदि वेतरथा
ब्रह्मचर्यादेव प्रव्रजेत् । गृहाद्वा वनाद्वा । '

मनुस्तु सकलसमुच्चये[1] कालव्यवस्थामाह—

चतुर्थमायुषो भागमुषित्वाऽऽद्यं गुरौ द्विजः ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥
वनेषु तु विहृत्यैवं तृतीयं भागमायुषः ।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत् ॥

' शतायुर्वै पुरुषः '

इति श्रुत्यभिहितायुषश्चतुर्थो भागः पञ्चविंशतिवर्षाणीत्यर्थः ॥ एवं कुर्वतः फलमाह हारीतः—

अनेन विधिना यो हि आश्रमानुपसेवते ।
स सर्वलोकान्निर्जित्य ब्रह्मलोकाय कल्पते ॥

इति । यत्तु गौतमेनोक्तं—

' ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्य'

इति, तद्गार्हस्थ्यस्य श्रैष्ठ्यप्रतिपादनपरम् । इतरेषामपि—

'ब्रह्मचर्यं परिसमाप्य गृही भवेत् । गृही भूत्वा
वनी भवेत् । वनी भूत्वा प्रव्रजेत् । '

'अष्टमे वर्षे ब्राह्मणमुपनयीत'

---

[1] कालसमुच्चये.— क ख.

इत्यादिप्रत्यक्षश्रुतिविहितत्वेनाविशेषात् । अत एव वसिष्ठः—

गृहस्थ एव यजते गृहस्थस्तप्यते तपः ।
चतुर्णामाश्रमाणां च गृहस्थश्च विशिष्यते ॥

मनुरपि—

सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठस्स त्रीनेतान्बिभर्ति हि ॥
यथा नदीनदास्सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणस्सर्वे गृहस्थे यान्ति संस्थितिम् ॥

वसिष्ठस्तु चतुर्णामाश्रमाणां विकल्पमाह—

'चत्वार आश्रमा ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकाः । तेषां वेदमधीत्य वेदौ वा वेदान्वाऽविशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेत् ।'

इति । वेदं वेदौ वेदान्वेति फलभूयस्त्वाभिप्रायम् । वेदमधीत्याविप्लुतब्रह्मचर्यस्तेषामाश्रमाणां मध्ये यमिच्छेत्तमावसेत् आश्रयेत् तत्रैव निष्ठां यायादित्यर्थः । भविष्यत्पुराणेऽपि—

गार्हस्थ्यमिच्छन्भूपाल कुर्याद्दारपरिग्रहम् ।
ब्रह्मचर्येण वा कालं नयेत्सङ्कल्पपूर्वकम् ॥
वैखानसो वाऽपि भवेत्परिव्राडथ वेच्छया ।

गौतमोऽपि—

'तस्याश्रमविकल्पमेके ब्रुवते'

इति । उशनसाऽप्युक्तम्—

आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम् ।
आ विमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधि ॥

इति । एवं च यस्य समुच्चयानुष्ठानसामर्थ्यं नास्ति तस्यायं विकल्प इति मन्तव्यम् । आ विमोक्षादनुतिष्ठेदित्यनेन आश्रमिणा स्थातव्यमित्याह । अत एव दक्षः—

अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ।
आश्रमेण विना तिष्ठन्प्रायश्चित्ती यतो[1] हि सः ॥
जपे होमे तथा दाने स्वाध्याये वा रतस्सदा ।
नासौ फल[2]मवाप्नोति कुर्वाणोऽप्याश्रमाच्च्युतः ॥

हारीतोऽपि—

अनाश्रमी व्यपेतश्च आश्रमी च निरर्थकः ।
मिथ्या[3]श्रमी च सर्वे वै निरयं यान्ति मानवाः ॥

इति । एतच्चाश्रमचतुष्टयं ब्राह्मणादिवर्णत्रयस्य वेदितव्यम् । अत एव कल्पानां सूत्रकारः—

'त्रयाणां वर्णानां चत्वार आश्रमाः'

इति । एवं च यदुक्तं मनुना—

एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः ।

इति, तद्द्विजात्युपलक्षणार्थमिति मन्तव्यम् ।

इति स्मृतिचन्द्रिकायामाश्रमनिर्णयः.

---

[1] न्प्रायश्चित्तीयते—क. [2] न तत्फल—क. [3] वृथा—ख.

समावर्तनम्

अथ समावर्तनम् । तत्र दक्षः—

स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च ।
ब्रह्मचारी भवेत्तावदूर्ध्वं स्नातो गृही भवेत् ॥

व्रतानि ब्रह्मचर्यम् । वेदस्वीकरणं वेदार्थविचारस्यापि प्रदर्शनार्थम् । अत एव स्मृत्यन्तरं—

'वेदमधीत्य छन्दोविषयानर्थान्बुध्वा स्नायात्'

इति । लघुव्यासोऽपि—

ऋक्पादमप्यधीयानो न्यायतस्तु तदर्थवित् ।
सम्यग्व्रतानि संसेव्य समावर्तनमर्हति ॥

इति । न्यायतो गुरुमुखावेक्षणाद्युक्तन्यायेनेत्यर्थः । एतच्च समुच्चयसम्पादनसमर्थविषयम् । अथ वा[1] व्रतमात्रसमाप्तावपि स्नानं भवत्येव । तदाह याज्ञवल्क्योऽपि—

गुरवे तु वरं दत्वा स्नायाद्वा तदनुज्ञया ।
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥

पूर्वोक्तन्यायेन वेदं व्रतान्युभयं वा पारं नीत्वा समाप्य गुरवे वरमभिलषितं दत्वा समावर्तेतेत्यर्थः । एतेन स्नातकत्रैविध्यं प्रतिपादितं भवति । यदाह हारीतः—

'त्रयस्स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्च'

[1] अन्यथा तु. क.

इति। यस्समाप्य वेदमसमाप्य व्रतानि समावर्तते स विद्यास्नातकः। यस्तु समाप्य व्रतान्यसमाप्य वेदं स व्रतस्नातकः। यः पुनरुभयं समाप्य स्नाति स विद्याव्रतस्नातक इति। एवं च व्रतस्नातकस्य परिणयनोत्तरकालमध्ययनसमापनं तदर्थज्ञानं चेति मन्तव्यम्। यत्तु,

गुरुशुश्रूषया विद्यां सम्प्राप्य विधिवद्द्विजः।
स्नायीत गुर्वनुज्ञातो दत्वाऽस्मै दक्षिणां हि गाम्॥

इति व्यासेन गोदानमुक्तं, तदपि प्रीतिसाधनद्रव्योपलक्षणार्थम्। अत एव मनुः—

क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमन्ततः।
धान्यं वासांसि शाकं वा गुरवे प्रीतिमाहरेत्॥

अनेन सति सम्भवे प्रकृष्टमेव देयमित्युक्तं भवति। अत एव लघुहारीतः—

एकमप्यक्षरं यस्तु गुरुश्शिष्ये[1] निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा त्वनृणी भवेत्॥

एतच्च दक्षिणादानमाश्रमान्तरप्रवेशेऽपि वेदितव्यम्। तथाच नृसिंहपुराणं—

गुरवे दक्षिणां दत्वा स यमिच्छेत्तमावसेत्

इति। यस्य पुनर्दक्षिणादानसामर्थ्यं नास्ति तस्य तदनुज्ञायां[2] स्नानम्। तथा च गौतमः—

[1] शिष्यं क. [2] ज्ञया—ख

'विद्यान्ते गुरुरर्थेन निमन्त्र्यः । कृत्वाऽनुज्ञातस्य
वा स्नाम्'

इति । विद्यान्ते गुरुमर्थेन हेतुना निमन्त्र्य प्रष्टव्यं 'कोऽर्थस्तुभ्यं मया दातव्यः' इति । तमर्थमाचार्याय दत्वा स्नायात् । अशक्तस्तदनुज्ञया वेत्यर्थः । 'विद्यान्ते दद्यात्' इत्यनेन पूर्वं निषेधमाह । अत एव मनुः—

न पूर्वं गुरवे किं चिदुपकुर्वीत धर्मवित् ।
स्नास्यंस्तु गुरुणाऽऽज्ञप्तश्शक्त्या गुर्वर्थमाहरेत् ॥

एतदपि भृतिप्रदानाभिप्रायम् । इतरस्यानिषेधात् । अत एव यमः-

यतो धर्मागमो न स्यान्न शुश्रूषाधनागमौ ।
विद्यया सह मर्तव्यं न विद्यामूषरे वपेत् ॥

इति । इति स्मृतिचन्द्रिकायां समावर्तनम्.

विवाहः

उक्ता गुरुकुलान्निवृत्तिरुपकुर्वाणस्य । तस्येदानीं विवाह उच्यते । तत्र मनुः—

गुरुणा समनुज्ञातस्समावृत्तो यथाविधि ।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥

याज्ञवल्क्योऽपि—

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।

विप्लुतिस्स्खलनम् । लक्षण्या लक्षणयुक्ता । सा च किंलक्षणा भवतीत्युक्ते स एवाह—

अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ॥

अनन्यपूर्विका या दानेनोपभोगेन वा पुरुषान्तरपूर्विका न भवति सा । कान्ता कमनीया परिणेतुर्मनसः आनन्दकारिणी त्यर्थः । आपस्तम्बोऽपि—

'यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिः'

इति । समान एकः पिण्डो यस्यास्सा सपिण्डा । न सपिण्डा असपिण्डा । एकपिण्डता चैकस्यां पिण्डदानक्रियायां दातृत्वेन देवतात्वेन लेपभाक्त्वेन वाऽनुप्रवेशाद्भवति । तथा च मत्स्यपुराणम्—

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदस्सप्तमस्तेषां सापिण्ड्यं साप्तपूरुषम् ॥

चतुर्थाद्याः प्रपितामहस्य पितृप्रभृतयः उत्तरे त्रयो लेपभाजो भवन्ति पित्राद्यास्तु त्रयः पिण्डभागिनः पिण्डदाने देवताभूताः तेषां सप्तमः पिण्डदाता । एवमेते सप्त सपिण्डा भवन्ति । एकपिण्डदानक्रियानुप्रवेशिनस्सपिण्डा इत्यर्थः । ननु यद्येकपिण्डक्रियानुप्रवेशात्सापिण्डयं तर्हि भ्रातॄणां भिन्नक्रियानुप्रवेशिनां तदभावेनान्योन्यं सापिण्ड्यं न स्यात् । मैवं, एकोदेश्या[1]वच्छेदेनैकक्रियान्वयित्वसम्भवात् । ये हि पुत्रनिष्पाद्यक्रियानुप्रवेशिनः पित्रादयस्त एव पुत्रान्तरोत्पाद्यक्रियायामपीति व्यक्तमेकोद्देशान्वयित्वम् । अत एव पितामहादेस्स

[1] द्देशा—क,

न्ततिजातानां पुत्रेण सह सापिण्ड्यसिद्धिः । पुत्रक्रियान्व-
यिनः पितामहादेस्तत्क्रियासम्बन्धात् । यदा त्वेकस्यापि
पितामहादेस्तत्क्रियासम्बन्धो नास्ति तदोद्देश्यभेदेन क्रियाभेदा
त्सापिण्ड्यनिवृत्तिः । तदाह मनुः—

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।

इति । गौतमोऽपि—

'पिण्डनिवृत्तिस्सप्तमे पञ्चमे वा'

इति । भार्यायाश्च सहकर्तृत्वात्सापिण्ड्यसिद्धिः । एवं सर्वत्र सा-
पिण्ड्यनिवृत्त्यनुवृत्ती द्रष्टव्ये । नन्वेवं तर्हि पुत्रदौहित्रयोरेकपि
ण्डक्रियानुप्रवेशिनोस्सापिण्ड्यं प्रसज्येत । सत्यं, यद्यसौ दौहित्रः
पुत्रेण सह समानगोत्रस्स्यात् अत्रैकगोत्रत्वमुपाधिरिति भावः ।
अत एव पुत्रीकरणादावस्ति दौहित्रस्यापि पुत्रेण सह सापिड्यमिति
वक्ष्यामः । तेन नातिप्रसक्तिः । यवीयसी जन्मतः प्रमाणतश्च ।
अरोगिणी अदीर्घरोगा, इतरस्य शक्यपरिहारत्वात् । भ्रातृमती
पुत्रिकाकरणभयात् । यदाह मनुः—

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥

यस्याः पिता पुत्रिकाकरणाभिप्रायवान्न वेति न विज्ञायेतेत्यर्थः ।
अनेन विना[1] पुत्रेण सह सम्प्रतिपत्तिं पितुस्सङ्कल्पमात्रात्पुत्रि
का भवतीति गम्यते । अत एव गौतमः—

---

[1] विधिना—ख.

‘ अभिसन्धिमात्रपुत्रिकेत्येकेषाम् ’

इति । सा च कथं पुत्रिका भवतीत्यपेक्षिते मनुराह—

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम् ॥

इति । वसिष्ठोऽपि—

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्रस्स मे पुत्रो भवेदिति ॥

इयमेव पुत्र इति वा पुत्रिकाकरणं,

‘ शासद्वह्निर्दुहितुर्नप्त्यं गात् ’

इति श्रुतेः । एतच्च निरुक्ते व्याख्यातं—

‘प्रशास्ति वोढा सन्तानकर्मणे दुहितुः पुत्रभावम्’

इति । असमानार्षगोत्रजां, समानमार्षं प्रवरो यस्य स समानार्षः । तस्माज्जातां समानार्षजातां नोद्वहेदित्यर्थः । अत एव गौतमः—

‘ असमानप्रवरैर्विवाहः ’

इति । समानता च नामतो वेदितव्या । यदाह बोधायनः—

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमन्यत्र भृग्वङ्गिरोगणात् ॥

इति । समानगोत्रत्वं समानप्रवर इत्यर्थः । कथं तर्हि भृग्वङ्गिरोगणेष्वित्यपेक्षिते सङ्ग्रहकार आह—

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।
भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकं निवारयेत्[1] ॥

पञ्चार्षेयाणामृषित्रयानुवृत्तौ मिथो न विवाह इत्यर्थः । बोधायनोऽपि—

'द्व्यार्षेयसन्निपातेऽविवाहस्त्र्यार्षेयाणां त्र्यार्षेयसन्निपातेऽविवाहः पञ्चार्षेयाणाम्'

इति । सन्निपाते साम्य इत्यर्थः । गोत्रं च वंशपरम्पराप्रसिद्धम् । गोत्रप्रवरौ च पृथक्पृथक्पर्युदासे निमित्तम् । तत्र यास्कवाधौलमौनमौकानां गोत्रभेदेन विवाहे प्राप्ते तन्मा भूदित्यसमानार्षग्रहणम् । तेषां भार्गववैतहव्यसावेदसेति प्रवरैक्यात् । यत्र तु प्रवरविकल्पः तत्रापि प्रवरभेदेन विवाहप्राप्तौ तत्प्रतिषेधार्थमसमानगोत्रग्रहणम् । एवं चासमानार्षजामसमानगोत्रजामुद्वहेदित्युक्तं भवति । न च समानार्षग्रहणं गोत्रविशेषणमिति शङ्कनीयं—

परिणीय सगोत्रां तु समानप्रवरां तथा ।
त्यागं कृत्वा ततस्तस्या द्विजश्चान्द्रायणं चरेत् ॥

इति भेदेन स्मरणात् । त्यागश्चात्रोपभोगस्यैव न पुनस्तस्याः । यदाह शातातपः—

समानप्रवरां कन्यामेकगोत्रामथापि वा ।

[1] ष्वेकोऽपि वारयेत् – क. ख. ग.

विवाहयति यो मूढस्तस्य वक्ष्यामि निष्कृतिम् ॥
उत्सृज्य तां तथा भार्यां मातृवत्परिपालयेत् ।

यस्तु तत्र प्रजामुत्पादयति स स्वजात्यादिना हीयत इत्याहापस्तम्बः—

समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च ।
तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते ॥

इति । ननु चासमानार्षगोत्रजामित्यनेनैव परिणेतुस्सपिण्डायाः पर्युदासे सिद्धे किमिति पुनरसपिण्डामित्युक्तम्? उच्यते; सत्यमेवम्; तथाऽपि या मातुरसपिण्डा भवति सैवोद्वाहकर्मणि प्रशस्तेति वक्तुम् । तथा च मनुः—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

या परिणेतुर्मातुश्च सपिण्डा न भवति या परिणेतुः पितुश्च न सगोत्रा सा च विवाहकर्मणि प्रशस्तेत्यर्थः । ननु च माता दानसमकालमेव पितृसापिण्ड्यं तद्गोत्रं च हित्वा पतिसापिण्ड्यं तद्गोत्रं च प्रतिपद्यते । तत्कथम् 'असपिण्डा च या मातुः' इति । तदुक्तं—

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ।

इति । पतिसापिण्डैरेव पत्न्यास्सापिण्ड्यं न स्वपित्रादिभिरित्यभिप्रायः । सत्यम्; नास्ति मातुस्स्वपित्रादिभिस्सह सापि-

ण्ड्यं यदि तस्यास्त्यागपूर्वको विवाहस्स्यात् । त्यागे हि स्वत्वनिवृत्तिवत्सापिण्ड्यसगोत्रत्वयोरपि निवृत्तिः । अनेनै वाभिप्रायेणोक्तम्—

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ।

इति । अत एव दत्तपुत्रादेस्त्यागेनैव पितृगोत्रादिनिवृत्तिस्सिद्धा[1] । अन्यथा 'असगोत्रा च या पितुः' इत्यत्र पितृग्रहण मनर्थकं स्यात् । उक्ता च गोत्रादिनिवृत्तिर्मनुना—

गोत्ररिक्थे जनयितुर्न हरेद्दात्तिमस्सुतः[2] ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतस्स्वधा ॥

इति । एवं च पुत्रिकाया विवाहो नैव प्रदानपूर्वक इति न तत्र सापिण्ड्यसगोत्रत्वयोर्निवृत्तिः । अत एव वसिष्ठोऽप्य-प्रत्तानां त्रिपूरुषं सापिण्ड्यमाह—

'अप्रत्तानां स्त्रीणां त्रिपूरुषं सापिण्ड्यम्'

इति । न च पुत्रिकाविवाहेऽपि तस्याः प्रदानमस्तीति शङ्कानीयम् । प्रदाने तु गोत्रादिनिवृत्तिवत्पुत्रिकात्वस्यापि निवृत्ति[3]स्तन्निवृत्तौ च तत्कार्यकर्तृत्वं न स्यात् । श्रूयते च तस्याः पुत्रकार्यकरत्वम्—

'अभ्रातेव पुंस एति प्रतीची'

---

[1] निवृत्तिसिद्धिः—ग. [2] दात्तिमः क्वचित्—मुद्रितपुस्तकपाठः.
[3] निवृत्तेस्त—ग.

इति । एतदपि निरुक्ते व्याख्यातम्—

‘अभ्रातृकेव पुंसः पितॄनेत्याभिमुखी सन्तानकर्माणि पिण्डदानाय नयति’

इति । अतश्च पुत्रिकायाः प्रदानाभावेन स्वपितृसापिण्ड्यं सगोत्रत्वं च सिद्धम् । अत एव लोगाक्षिः—

मातामहस्य गोत्रेण मातुः पिण्डोदकक्रियाम् ।
कुर्वीत पुत्रिकापुत्र एवमाह प्रजापतिः ॥

एवमासुरादिविवाहेष्वपि सगोत्रत्वादेरनिवृत्तिः । तत्रापि प्रदानाभावात् । अत एव मार्कण्डेयः—

ब्राह्मादिषु विवाहेषु या तूढा कन्यका भवेत् ।
भर्तृगोत्रेण कर्तव्यास्तस्याः पिण्डोदकक्रियाः ॥
आसुरादिविवाहेषु पितृगोत्रेण धर्मतः ।

मातुः पितृगोत्रेणेत्यर्थः । एवं च पुत्रिकाकरणादौ मातुस्स्वपित्रादिसापिण्ड्यसद्भावाद्युक्तमुक्तम्—

‘असपिण्डा च या मातुः’

इति । ननु च पुत्रस्यापि मातृसपिण्डत्वाद्या मातुस्सपिण्डा सा पुत्रस्यापीति किमर्थं मातृग्रहणम्? उच्यते—यदा तु पुत्रिकासुतस्यैव मातृमातामहाभ्यां परित्यागः तदा तत्सापिण्ड्यानिवृत्त्या तत्सपिण्डाया विवाहप्राप्तौ तन्मा भूदिति मातृग्रहणम् । एवं दत्तपुत्रादेस्त्यागेनैव पितृगोत्रनिवृत्त्या

तत्सगोत्राया विवाहप्राप्तौ तन्मा प्रसांक्षीदिति पितृग्रहणमिति सर्वमनवद्यम् । मातृसगोत्रामपि केचिन्नेच्छन्ति । तदाह व्यासः—

सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि ।

एतदपि पुत्रिकाकरणविषयं, मातुः पतिगोत्रत्वेन गोत्रान्तराभावात् । न च भूतपूर्वगत्या मातृसगोत्राप्रतिषेध इति वाच्यम्, वर्तमाने सम्भवति भूतपूर्वगत्याश्रयणस्यान्याय्यत्वात् । एवं च या परिणेतुर्मातुश्च न सपिण्डा भवति या च परिणेतुः पितुश्चासगोत्रा सा विवाह्येति सिद्धम् । नन्वेवं तर्हि ब्राह्मादिभिर्विवाहैर्निवृत्तपितृसपिण्डभावायां पुत्रस्य मातुलसुता परिणेया स्यात्? सत्यम्; केन वोक्तं न परिणेयेति? ननु मन्वादिभिरेव । यदाह शातातपः—

उद्वहेत सगोत्रां यस्तनयां मातुलस्य च ।
ऋषिभिश्चैव तुल्यां च स तु चान्द्रायणं चरेत् ॥

मनुरपि—

पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ।
मातुश्च भ्रातुराप्तस्य गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धिमान् ।
ज्ञातित्वेनानुपेयास्ताः पतति ह्युपयन्नधः ॥

इति । आप्तस्य सन्निकृष्टस्य सपिण्डस्येत्यर्थः । व्यासोऽपि—

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः ॥

मातृतो मातृपक्षे तृतीयां मातुलसुतां, पितृपक्षे तृतीयां पैतृष्वसेयीमित्यर्थः । शुल्कं मूल्यम् । अनेन कूटस्थ[1]मारभ्य गणयेदित्युक्तं भवति । तथा च पुराणे ययातिवाक्यम्—

यो मे त्वं हृदयाज्जातो वयस्त्वं न प्रयच्छसि[2] ।
पापान्मातुलसम्बन्धात्प्रजा वै ते भविष्यति ॥

सुमन्तुरपि—

'पितृपत्न्यस्सर्वा मातरः; तद्भ्रातरो मातुलाः;
तद्दुहितरश्च भगिन्यः; तदपत्यानि भागिनेयानि;
अन्यथा सङ्करकारीणि स्युः'

इति । उच्यते; सत्यमेतानि मातुलदुहितृविवाहनिषेधपराणि । तथाऽप्यासुरादिविवाहेन पित्रादिभिरनिवृत्तसपिण्डभावायाः पुत्रस्य मातुलसुता परिणेतुर्मातुश्च सपिण्डेति सा तावदविवाह्या । तथैवंविधायाः पितृष्वसुर्दुहिता परिणेतुः पितुश्च सपिण्डा सगोत्रा चेति साऽपि न परिणेया । या तु ब्राह्मादिविवाहोढा तस्यास्त्वपित्रादिभिस्सापिण्ड्यनिवृत्तेस्तत्पुत्रस्य मातुलसुतापरिणयनं न[3] वार्यते । एवं पैतृष्वसेय्यामपि द्रष्टव्यम् । तदिदमुक्तं मनुना—

[1] मूलस्थ—ख; मूलस्थकूटस्थ ग. [2] प्रयच्छाति—ख. ग. [3] केन —ग.

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

इति । या मातृतः पितृतो वा सपिण्डा सगोत्रा च सैव परित्या ज्या नान्येत्यभिप्रायः । अत एव व्यासः—

मातुस्सापिण्डा यत्नेन वर्जनीया द्विजातिभिः ।

इति । अत एव शातातपोऽपि मातृसगोत्राया एव निषेधमाह—

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव द्विजश्चा[1]न्द्रायणं चरेत् ॥

न चात्र मातृगोत्रामित्यनेनैव सपिण्डमातुलदुहितृनिषेधसिद्धेः किमर्थं मातुलसुताग्रहणमिति वाच्यम्, पक्षान्तरत्वेऽपि समानत्वात् । तत्रापि मातृगोत्रादिप्रतिषेधेनैव मातुलदुहितृमात्र निषेधसिद्धेः । अथ पक्षद्वयेनोभयविधमातुलदुहितृनिषेधः, तर्हि मातुलसुताग्रहणेनैवालं, किं मातृगोत्रग्रहणेन ? किं च मनुरपि पैतृष्वसेय्याः पितृसपिण्डाया एव पर्युदासमाह—

पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ।
मातुश्च भ्रातुराप्तस्य गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धिमान् ।

इति । अन्यथा भगिनीशब्दवैयर्थ्यं स्यात्, पैतृष्वसेयीमित्यनेनैव पितृष्वसृदुहितृमात्रनिषेधसिद्धेः । भगिनीवद्भगिनी सपि-

[1] त्यक्त्वा चा – ग ; कृत्वा चा – क ; गत्वा – ख.

ण्डेत्यर्थः । एवमाप्तशब्देऽपि द्रष्टव्यम् । न च भगिनीशब्दः पैतृष्वसेयीं न विशिनष्टीति वाच्यम्,

एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धिमान् ।

इति त्रित्वे सङ्ख्यापनात्[1] । पैठीनसिरपि—

'पितृमातृष्वसृदुहितरो मातुलसुता धर्मतस्ता भगिन्यो वर्जयेत्'

इति । न चात्र सन्देहनिवृत्त्यर्थं भगिनीग्रहणमिति वाच्यम्, 'वर्जयेत्' इत्यादिविधिबलेनैव सन्देहनिवृत्तेः । ननु च 'असपिण्डा च या मातुः' इत्यनेनैव मातृसपिण्डादिपर्युदासे सिद्धे किमिति पुनः 'पैतृष्वसेयीं भगिनीम्' इति तस्या एव निषेध उच्यते? सत्यमेवम्; तथाप्यत्र पातित्यादिदोषप्रतिपादनमुखेनैकान्ततो निवृत्तिसिद्ध्यर्थम् । 'सा प्रशस्ता' इति वचनान्मातृसपिण्डासगोत्रयोरप्राशस्त्यमात्रं स्यात् । न सर्वथा वर्जनीयत्वं, यथा,

चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः ।

इति चतुर्णां विवाहानां प्राशस्त्य उक्तेऽपि न गान्धर्वादीनामेकान्ततः परित्यागः किं त्वप्राशस्त्यमात्रं तथेहापि स्यात् । ततश्च या मन्वादिवचनैर्मातृसपिण्डा मातुलसुता या च पैतृष्वसेयी पितृसपिण्डा सैवोद्वाहकर्मणि परित्याज्या नान्येति सिद्धम् । अत एवोक्तं चतुर्विंशतिमते—

---

[1] त्रित्वसङ्ख्यानात्—क.

तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि।
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः॥

इति। उभयोर्मातापित्रोरित्यर्थः। एवं च यानि मातुलदुहितृपरिणयानिषेधपराणि तान्यनिवृत्तस्वमातृसपिण्डभावाभिप्रायाणीति मन्तव्यम्। किं चैवं सत्येतेषां मन्वादिवाक्यानां चैकमेव मूलं परिकल्पितं भवति। अन्यथा तेषां मूलान्तरकल्पनागौरवं स्यात्। तेन विशेषविषयतैव न्याय्या। ननु यदि च मातुरसपिण्डतया मातुलसुता परिणेया तर्हि तथाविधा मातृष्वसा तद्दुहिता च किमिति न परिणेया? उच्यते; सत्यम्; न ब्रूमः शास्त्रतो न परिणेयेति, किं तु लोकविरुद्धत्वात्। यच्च धर्म्यमपि लोकविरुद्धम् तन्नानुष्ठेयम्। तदुक्तं मनुना—

अस्वर्ग्यं लोकविद्विष्टं धर्म्य[1]मप्याचरेन्न तु।

इति। वराहमिहिरोऽपि—

देशाचारस्तावदादौ विचिन्त्यः
देशे देशे या स्थितिस्सैव कार्या।
लोकद्विष्टं पण्डिता वर्जयन्ति
दैवज्ञोऽतो लोकमार्गेण यायात्॥

इति। ननु च याज्ञवल्क्येन

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्ततः।

[1] धर्म—क. ख.

इति मातृपक्षे पञ्चमादूर्ध्वमुद्वाहविधानात्कथं मातुलदुहितृपरिणयनम्? उच्यते—'मातुरसपिण्डामुद्वहेत्' इत्यनेन मातृबन्धुष्वप्य विशेषेण विवाहप्राप्तौ तन्मा प्रसाङ्क्षीदिति मातृतो मातृबन्धुभ्यः पञ्चमादूर्ध्वमुद्वहेदित्यविरोधः । एवं पितृबन्धुष्वपि द्रष्टव्यम् । अत एव गौतमः—

'ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृबन्धु
भ्यः पञ्चमात्'

इति । बीजिनो यो नियोगादुत्पादयति तस्मादप्यूर्ध्वं सप्तमादित्यर्थः । बान्धवा अपि स्मृत्यन्तरे दर्शिताः—

पितुः पितृष्वसुः पुत्राः पितृमातृष्वसुस्सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वस्सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥

यत्पुनर्वसिष्ठेनोक्तम्—

पञ्चमीं मातृबन्धुभ्यस्सप्तमीं पितृबन्धुतः ।

इति तद्गौतमीयैकवाक्यत्वाय पञ्चमीं सप्तमीं चातीत्योद्वहेदित्येव-परम्, न पुनः पञ्चमीसप्तम्योरेवोद्वाहावधिपरम् । यदपि नारदेनोक्तम्—

पञ्चमात्सप्तमादर्वाग्बन्धुभ्यः पितृमातृतः ।
अविवाह्या सगोत्रा च समानप्रवरा तथा ॥

इति, यदपि विष्णुना—

पञ्चमात्सप्तमाद्धीनां यः कन्यामुद्वहेद्द्विजः ।
गुरुतल्पी स विज्ञेयस्सगोत्रां चैवमुद्वहन् ॥

इति, तत्रापि पञ्चमीसप्तम्योर्नाभ्यनुज्ञा तत्र निषेधश्रवणात् । यदाह मरीचिः—

पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया ।
क्रियापरा अपि ह्येते पतिताश्शूद्रतां गताः ॥

इति । एतेन यत्कैश्चिदुक्तं—

'ऊर्ध्वं सप्तम्या अलाभे सप्तमीमुद्वहेत्'

इति, तदप्यपास्तम् । यदपि पैठीनसिनोक्तं—

'त्रीन्मातृतः पञ्च पितृतः पुरुषानतीत्य विवाहः'

इति, तदप्यर्वाङ्निषेधपरम् । न पुनश्चतुर्थीषष्ठ्योर्विवाहाभिप्रायं, विष्ण्वादिवचनविरोधप्रसङ्गात् । ननु च 'असपिण्डा च या मातुः' इत्यनेन या मातुरसपिण्डा तामुद्वहेदित्युक्तेः स्वमातृपक्षेऽप्यविशेषेण विवाहप्राप्तौ तन्मा भूदिति मातृतो मातृपक्षे पञ्चमादूर्ध्वमुद्वहेदिति नियमः किं न स्यात्? अतः कथं मातुलदुहितृपरिणयनम्? एवं पितृपक्षेऽपि द्रष्टव्यम् । उक्तं च विष्णुपुराणे—

पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ।
गृहस्थ उद्वहेत्कन्यां न्यायेन विधिना नृप ॥

इति । पञ्चमीमतीत्येत्यर्थः । मैवं, गौतमादिभिर्बन्धुष्वेव नियमवि-

धानात् । अथ वा मा भूद्बन्धुष्वेव नियमविधानम्,[1] तथाऽप्युक्त-प्रकारेण मन्वादिभिरेव मातुलदुहितृपैतृष्वसेयीपरिणयनाभ्यनुज्ञानात्तद्व्यतिरेकेण पक्षद्वयेऽप्ययं नियमः क्रियत इत्यविरोधः । यद्वा पञ्चमात्सप्तमादिति याज्ञवल्कीयं पुत्रिकाकरणादिविषयमित्यनुसन्धेयम् । यदत्र युक्तं तद्ग्राह्यम् । यत्तु सङ्ग्रहकारेणोक्तं—

स्त्रीसन्ततिस्तथा पुंसामविवाह्ये उभे मते ।
स्त्रीपुंसोस्तु विवाह्या स्यात्पञ्चमात्सप्तमात्परम् ॥

इति, तदप्युक्तविषयमेवेत्यनवद्यम् । तेन स्मृतितस्सिद्धं मातुलदुहितृपैतृष्वसेयीपरिणयनम् । किं च श्रुतिरपीममेवार्थं श्रावयति । तथा वाजसनेये श्रूयते—

तस्मात्समानादेव पुरुषादत्ता चाद्यश्च जायते ।
उत तृतीये सङ्गच्छावहै चतुर्थे सङ्गच्छावहै ॥

इति । अस्यार्थः—समानादेकस्मात्पुरुषादत्ता भोक्ता भार्यया अद्यश्च भोग्यो भार्यालक्षणश्च जायते, जायापती जायेते इति यावत् । नन्वेकस्मादुत्पन्नयोर्जायापतित्वे भ्रातृभगिन्योरेव जायापतित्वमुक्तं स्यात् इत्याशङ्क्याह तर्हि तृतीये पुरुष इत्यादि । अनेन दौहित्रपुत्रयोर्मातुलदुहितृपैतृष्वसेयीपरिणयनमुक्तं भवति । तयोः कूटस्थमारभ्य तृतीयत्वात् । सङ्गच्छावहै विवाहावहा इत्यर्थः । ननु च स्रग्वयूहनपरोऽयमर्थवादो न स्वार्थे

[1] मा भूद्बन्धुविषयत्वं—क.

प्रमाणम् । उच्यते—सत्यमर्थवादो न स्वार्थे प्रमाणम्, किं तु यत्र प्रमाणान्तरमस्ति तत्र तत्प्रतिपादितार्थावलम्बनेन स्तुतिपरत्वं[1] यथा 'वायुर्वै क्षेपिष्ठा देवता' इति । यत्र तु नास्ति प्रमाणान्तरं यथा 'तृतीये पुरुषे सङ्गच्छावहै' इति तत्र तदनुवादान्यथानुपपत्त्या तथाविधविधिपरिकल्पनं केन वार्यते? अत एव—

'त्रीणि ह वै यज्ञस्य उदराणि गायत्री बृहत्यनुष्टुब्त्र ह्येवावपन्त्यावोद्वपन्ति'

इत्यत्र गायत्र्यादिषु प्रतीतावापोद्वापान्यथानुपपत्त्या तत्प्रापको विधिः कल्प्यते । अत एव च

'उपरि हि देवेभ्यो धारयति'

इत्यत्रापि समिदुपरिधारणविधिः । अन्यथा तत्रापि न स्यात् । यत्र पुनः प्रमाणान्तरविरोधः न तत्र विधिकल्पनं यथा—

'आदित्यो यूपः'

इति । अत एव—

'प्रजापतिर्वै स्वां दुहितरमभ्यध्यायत्'

इत्यत्रापि न विधिकल्पनाया अतिप्रसङ्गः, दुहितृगमने मन्वादिभिः प्रायश्चित्तविधानात् । अथ वा भवत्वर्थवादानुसारेण प्रजापतिस्स्वां दुहितरं गच्छेदिति विधिः । किमायातमितरेषाम्? न च महद्भिरकार्यं[2] कृतमित्यनेनापि कर्तव्यमित्यत्र प्रमा-

---

[1] स्तुतिपरं—क. [2] महद्भिः कार्यं—क. ख.

णमस्ति । न हीन्द्रेणाहल्यादिपरदारगमनं कृतमित्यनेनापि गन्तव्यम् । अत एव शङ्खलिखितौ—

> सुरां पिबन्ति त्रिदशास्सा चापेया द्विजातिभिः ।
> हरन्ति वित्तं यतिसद्धास्तिव[1] सिद्धिर्न विद्यते ॥

वृद्धमनुरपि—

> अनुष्ठितं तु यद्देवैर्मुनिभिर्यदनुष्ठितम् ।
> नानुष्ठेयं मनुष्यैस्तदुक्तं कर्म समाचरेत् ॥

इति । श्रुत्यन्तरेऽपि—

> 'गर्भे नु नौ जनिता दम्पती तदेव त्वष्टा सविता
> विश्वरूपम्'

इति । नौ आवयोः गर्भे जठरे जनिता जगतस्स्रष्टा देवो दम्पती जायापती अकरोदित्यर्थः । मन्त्रोपि—

> आयाहीन्द्र पथिभिरीडितेभिः
> यज्ञमिमं नो भागधेयं जुषस्व ।
> तृप्तां जुहुर्मातुलस्येव योषा
> भागस्ते पैतृस्वसेयी वपामिव ॥

इति । हे इन्द्र! पथिभिर्मार्गैरीडितेभिः प्रशस्तैर्नः अस्माकं इमं यज्ञं आयाहि आगच्छ । आगत्य चेदमस्माभिर्दीयमानं भागधेयं जुषस्व सेवस्व । अत एव यजमानास्तृप्तामाज्यादिना संस्कृतां वपामवदानाख्यां त्वामुद्दिश्य जुहुस्त्यक्तवन्तः । अत्र दृष्टान्तद्वयं,

---

[1] सिद्धास्तथा—क. ख.

यथा मातुलस्य योषा दुहिता दौहित्रस्य भागो भजनीया परि-
णेतुं योग्या, यथा च पैतृष्वसेयी पौत्रस्य तथाऽयं ते तव भागो
वपाख्य इति मन्त्रार्थः। तेन श्रुतितोऽपि सिद्धं मातुलादिसुता-
परिणयनम्। किं चाचारादप्यवगच्छामः यथा[1] ह्याचरन्ति ताव-
द्दाक्षिणात्यास्त्रैविद्यवृद्धा वेदार्थानुष्ठातारश्शिष्टा एव मातुलादिसु-
ता[2] परिणयनम्। उक्तं च तदाचारप्रामाण्यं मनुना—

शिष्टाचारस्स्मृतिर्वेदास्त्रिविधं धर्मलक्षणम्॥

इति। लक्षणं प्रमाणमित्यर्थः। देवलोऽपि—

येषु देशेषु ये देवा येषु देशेषु ये द्विजाः।
येषु देशेषु यत्तोयं या च यत्रैव मृत्तिका॥
येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः।
तत्र तान्नावमन्येत धर्मस्तत्रैव तादृशः॥
यस्मिन्देशे पुरे ग्रामे त्रैविद्यनगरेऽपि वा।
यो यत्र विहितो धर्मस्तं धर्मं न विचालयेत्॥

इति। ननु—देशाचारस्यापिप्रमाणान्तराविरोधिन एव प्रामाण्य-
मुक्तं वसिष्ठेन—

'देशाचारकुलधर्मा आम्नायैराविरुद्धाः प्रमाणम्'

इति। सत्यं, आम्नायो वेदस्तदविरोधिन एव प्रामाण्यमिति।
न चात्र वेदविरोधोऽस्ति प्रत्युतानुकूल एवे[3]त्युक्तमधस्तात्।
ननु स्मृतिविरोधेऽप्याचारो दुर्बल एव,

---

[1] तथा—ख. [2] मातुलसुतादि.—ग. [3] नुकूल्यमेवे—क.

'श्रुतिस्मृतिविहितो धर्मस्तदलाभे शिष्टाचारः प्रमाणम्'

इति वसिष्ठस्मरणात्। अस्ति चात्र 'मातुलस्य सुतामूढ्वा' इत्यादिस्मृतिविरोधः। तेनात्र कथमाचारस्य प्रामाण्यम्? मैवं, तेषां मातृसापिण्डाविषयत्वेन विरोधस्य परिहृतत्वात्। अथ वा मा भूत्तेषां विशेषविषयत्वं, किं तूदीच्यदेशे ये मातुलादिदुहितृसम्बन्धानाचरन्ति तद्विषयाणीत्यविरोधः। तेषामेव दोषश्रवणात्। तथा च बोधायनः—

'पञ्चधा विप्रतिपत्तिर्दक्षिणतः अनुपनीतेन भार्यया च सहभोजनं, पर्युषितभोजनमुच्छिष्टभोजनं पितृष्वसृमातुलदुहितृपरिणयनमिति। तथोत्तरतः पञ्च ऊर्णाविक्रयश्शीधुपानमुभयतोदाद्भिर्व्यवहारः आयुधीयकं समुद्रयानमिति इतर इतरस्मिन्कुर्वन्दुष्यति। इतर इतरस्मिन्। तत्र तत्र देशप्रामाण्यमेव स्यात्'

इति। अयमर्थः—इतरो दाक्षिणात्यः इतरस्मिन् उत्तरदेशे मातुलसम्बन्धादिकं कुर्वन् दुष्यति, न स्वदेशे तथेतरः उदीच्य इतरस्मिन् दक्षिणदेशे शीधुपानादिकं कुर्वन् दुष्यति। न स्वदेशे। कुतः, देशप्रामाण्यात् देशनिबन्धनादाचारप्रामाण्यस्येत्यर्थः। अत एव देवलः—

यस्मिन्देशे य आचारो न्यायदृष्टस्तु कल्पितः।
तस्मिन्नेव स कर्तव्यो देशाचारस्स्मृतो भृगोः॥

इति । न चैवं सत्युदीच्यानां स्वदेशे परदेशे वा मातुलसम्बन्धाद्यविरुद्धमिति शङ्कनीयम् । यदाहापस्तम्बः—

येषां परम्पराप्राप्ताः पूर्वजैरप्यनुष्ठिताः ।
त एव तैर्न दुष्येयुराचारैर्नेतरैः पुनः ॥

येषां पितृपितामहादिपरम्पराप्राप्ताः पूर्वजैश्च त्रैविद्यवृद्धैरनुष्ठिताः आचारास्सन्ति त एव तैराचारैरनुष्ठीयमानैर्न दुष्येयुः, नेतरैः । न ह्युदीच्यानां तथाविधा आचारास्सन्ति (यथा)[1] दाक्षिणात्यानाम् । अतस्तैरेव स्वदेशे कार्याणि नान्यैरिति सिद्धम् । देशव्यवस्थया प्रामाण्यमुक्तं वार्तिककारैः[2]—

सर्वेषामेवमादीनां प्रतिदेशं व्यवस्थया ।
आपस्तम्बेन संस्कृत्य दुष्टादुष्टत्वमाश्रितम् ॥

इति । यत्तु बोधायनेन 'देशप्रामाण्यम्' इत्येवमन्तमुक्त्वोक्तं—

'मिथ्यैतदिति गौतमः । उभयं चैव नाद्रियेत शिष्टागमविरोधदर्शनात् शिष्टस्मृतिविरोधदर्शनाच्च'

इति, तन्न पूर्वोक्तनिराकरणार्थं गौतमग्रहणात् । किं तु शिष्टस्मृतिविरोधदर्शनाद्गौतमस्य मातृसपिण्डापरिणयनमभिप्रेतमिति[3] दर्शयितुम् । एवं च यदुक्तमन्यैः—

'स्यादेवं यद्यनन्तरमेव मिथ्यैतदिति न ब्रूयात्'[4]

---

[1] नेदं पदमावश्यकमपि कुत्रापि कोशे दृश्यते.   [2] वार्तिककारपादैः—क.
[3] यनमनभिप्रेतमितीति वरम्.   [4] इयं चापरार्कोक्तिरिति भाति

इति, तदप्यपास्तम् । तेन श्रुतेः स्मृतेराचाराच्च सिद्धं मातुलदुहितृ-पैतृष्वसेयीपरिणयनमिति[1] सर्वमनवद्यम् ॥

इति स्मृतिचन्द्रिकायां मातुलदुहितृपरिणयनसमर्थनम्.

कन्यालक्षणानि.

'अनन्यपूर्विकां कान्तां' इत्यादिना कानि चित्कन्यालक्षणान्युक्तानि । अधुना लक्षणान्तराण्युच्यन्ते । तत्र मनुः—

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् ॥

शातातपोऽपि—

हंसस्वनां[2] मेघवर्णां मधुपिङ्गललोचनाम् ।
तादृशीं वरयेत्कन्यां[3] गृहस्थस्सुखमे[4]धते ॥

आपस्तम्बोऽपि—

'बन्धुशीललक्षणसम्पन्नामरोगामुपयच्छेत'

इति । लक्षणसम्पन्नामित्यनेन विपरीतां नोद्वहेदित्याह । अत एव मनुः—

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ।
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ॥

वाचाटां बहुभाषिणीम् । पिङ्गलां पिङ्गलाक्षीम् । यमोऽपि—

---

[1] मातुलसम्बन्धादिकमिति—ग. [2] स्वरां ; [3] मुद्वहन्कन्यां ; [4] स्स्वय—वैद्य.

ह्रस्वा दीर्घा कृशा स्थूला पिङ्गाक्षी गौरपाण्डुरा ।
न पूज्या न च सेव्यास्ता नाशमृत्युकरास्त्रियः[1] ॥

विष्णुपुराणेऽपि—

न श्मश्रुव्यञ्जनवतीं न चैव पुरुषाकृतिम् ।
न घर्घरस्वरां क्षामां न च काकस्वनां तथा ॥
नाति[2] बद्धेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः ।
यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ ॥
गण्डयोः कूपकौ यस्या हसन्त्यास्तां न चोद्वहेत् ।
नातिरूक्षच्छविं पाण्डुकरजामरुणेक्षणाम् ॥
आपीनहस्तपादां च न कन्यामुद्वहेद्बुधः ।
न वामनां नातिदीर्घां नोद्वहेत्संहतभ्रुवम् ॥
न चातिच्छिद्रदशनां न कराळमुखीं नरः ।

इति । अथ नामतो वर्ज्याः । यथाह मनुः—

नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ।
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् ॥

ऋक्षं नक्षत्रम् । अन्त्या म्लेच्छा । भीषणं भयानकम् । आपस्तम्बोऽपि—

'नक्षत्रनामा नदीनामा वृक्षनामाश्च गर्हिताः ।
सर्वाश्च रेफलकारोष्मान्ता वरणे परिवर्जयेत्'

---

[1] सा पतिमृत्युकरी यतः—वैद्य.   [2] नाति—वैद्य.

यमोऽपि—

देवनाम्नीं नदीनाम्नीं शैलगन्धर्वनामिकाम् ।
ऋक्षवृक्षलतानाम्नीं दारार्थे परिवर्जयेत् ॥

तथा पुनर्भूरप्यविवाह्या । यदाह काश्यपः—

सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या च पुनर्भूप्रसवा च या ॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत् ।
प्ररोहत्यग्निना दग्धः पादपस्सुचिरादपि ॥
न च पौनर्भवादग्धं कुलं क्वापि प्ररोहति ।

पौनर्भवाः पुनर्भुव इत्यर्थः । तथा च बोधायनः—

'वाग्दत्ता मनोदत्ता अग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्तविधा पुनर्भूः । तां गृहीत्वा न प्रजां न धर्मं वा विन्देत्'

इति । वाग्दत्ता पुनस्संस्कारकर्मणि पुनर्भूर्भवति । अतस्तां गृहीत्वा परिणीय प्रजां धर्मं च न विन्देन्न भजेदित्यर्थः । अत एव नारदः—

कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनस्संस्कारकर्मणि ॥

पाणिग्रहणदूषितेति वाग्दत्तादेरुपलक्षणार्थम् । याज्ञवल्क्योऽपि—

अक्षता च क्षता चैव पुनर्भूस्संस्कृता पुनः ।

इति । अक्षता वाग्दत्तादिका । क्षता तु भुक्तादिका । अत्र यद्य-प्युक्तानि बाह्यलक्षणानि कथं चित् ज्ञातुं शक्यानि, तथाऽप्याभ्य-न्तराणां दुर्विज्ञेयत्वात्तद्ज्ञानमाश्वलायनोक्तविधिना कार्यम् । अत एवाश्वलायनोऽपि दुर्विज्ञेयानि लक्षणानीत्याह—

'अष्टौ पिण्डान् कृत्वा ऋतमग्रे प्रथमं जज्ञे ऋते सत्यं प्रतिष्ठितम् । यदियं कुमार्यभिजाता तदिदमिह प्रतिपद्यताम् । यत्सत्यं तद्दृश्यताम् । इति पिण्डा-नभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति । क्षेत्रा च्चेदुभयतस्सस्याद्गृह्णीयात्, अन्नवत्यस्याः प्रजा भविष्यतीति विद्यात् । गोष्ठात्पशुमती । वेदपुरी-षाद्ब्रह्मवर्चस्विनीति[1] अविनाशिनो ह्रदात्सर्वसम्प-न्ना । देवनात्कितवी । यैदिं चतुष्पथाद्विप्रव्रा-जिनी । ईरिणादधन्या स्यात् । श्मशानात्पतिघ्नी'

इति । विविधं व्रजतीति विप्रव्राजिनी स्वैरिणीत्यर्थः । एवमुक्त-लक्षणयोगिन्यामविशेषेण विवाहप्राप्तौ क चित्कुलतोऽपवाद-माह यमः—

चतुर्दश कुलानीमान्यविवाह्यानि निर्दिशेत् ।

अनार्षेयं ब्राह्मणानामृत्विजां च विवर्जयेत् ॥

---

[1] ब्रह्मवादिनी—मदन.

अत्युच्चमतिह्रस्वं च अतिवर्णं च वर्जयेत् ।
हीनाङ्गमतिरिक्ताङ्गमामयाविकुलानि च ॥
श्वित्रिकुष्ठिकुलादीनां कुर्याद्विपरिवर्जनम् ।
सदा कामकुलं वर्ज्यं लोमशानां च यत्कुलम् ॥
अपस्मारिकुलं यच्च यच्च पाण्डुकुलं भवेत् ।

इति । अनार्षेयमविज्ञातप्रवरम् । अत्युच्चमतिदीर्घा यस्मिन्कुले तदत्युच्चम् । अतिह्रस्वमतिकुब्जा यस्मिन् । अतिशयितो वर्णो यस्मिन् तदतिवर्णम् । एतच्च रोगिकुलवर्जनं तद्रोगसङ्क्रान्तिभयात् । अत एव याज्ञवल्क्यः—

स्फीतादपि न सञ्चारिरोगदोषसमन्वितात् ।

इति । स्फीतात्समृद्धादित्यर्थः । दोषाः पातित्यम् । मनुरपि—

महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः ।
स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ॥
हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ।
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥

इति । हीनक्रियं यागाद्यनुष्ठानरहितम् । निष्पुरुषं पुरुषशून्यम् । निश्छन्दो वेदहीनम् । रोमशं बहुरोमशम् । अर्शसं व्याधिविशेषोपेतम् । एवमितराण्यपि द्रष्टव्यानि । एतच्च हीनक्रियादिवर्जनं तथाविधापत्यपरिहारार्थम् । श्रूयते च तथाविधापत्योत्पत्तिः पुराणे—

मातुलान्भजते पुत्रः कन्यका भजते पितॄन् ।

याज्ञवल्क्योऽपि—

यथाशीला भवेन्माता तथाशीला भवेत्सुता ।

इति । अत एव च मनुस्सद्भिरेव सह सम्बन्धमाचरेदित्याह—

उत्तमैरुत्तमैर्नित्यं[1] सम्बन्धानाचरेत्सह[2] ।

निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ॥

याज्ञवल्क्योऽपि—

दशपुरुषविख्याताच्छ्रोत्रियाणां महाकुलात् ।

मातृतः पितृतः पञ्च विख्याताः पुरुषा यस्मिन्कुले तद्दशपूरुषविख्यातं कुलं, तस्मान्महाकुलात् पुत्रपश्वादिसमृद्धात्कन्यामुद्वहेदित्यर्थः । सा च सवर्णैव ग्राह्या । यदाह व्यासः—

स्नात्वा समुद्वहेत्कन्यां सवर्णां लक्षणान्विताम् ।

इति । एतत्प्रथमपरिणयनविषयम् । अत एव मनुः—

सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्मणि ।

इति । अनेन सवर्णापरिणयनोत्तरकालमसवर्णापरिणयनमविरुद्धमित्याह । अत एव याज्ञवल्क्यः—

तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ॥

ब्राह्मणक्षत्रियविशां भार्यास्स्वाऽशूद्रजन्मन ॥

वर्णक्रमाद्ब्राह्मणस्य क्षत्रिया वैश्या शूद्रा चेति तिस्रो भार्याः ।

---

[1] स्सार्धं—त. [2] बुधः.

क्षत्रियस्य वैश्या शूद्रा चेति द्वे । वैश्यस्यैका शूद्रेति । सवर्णा पुनस्सर्वेषां मुख्या स्थितैव । न च ब्राह्मणस्य ब्राह्मणी क्षत्रिया वैश्या चेति तिस्रो भार्या इति व्याख्यानं शङ्कनीयं, तथात्वे 'स्वाश्शूद्रजन्मनः' इत्यविवक्षितार्थं स्याद्वैश्यस्यापि तथात्वेनाविशेषात् । अतः पूर्वोक्तैव[1] ज्यायसी । अत एव मनुः—

शूद्रैव भार्या शूद्रस्य सा च स्वा च विशस्स्मृते ।
ते च स्वा चैव राज्ञस्स्युस्ताश्च स्वा चाग्रजन्मनः ॥

इति । एतत्तु कामतः प्रवृत्तविषयम् । यदाह स एव—

कामतस्तु प्रवृत्तानामिमास्स्युः क्रमशोऽवराः ।

इति । अवरा जघन्या इत्यर्थः । अनेन धर्मार्थं सवर्णापरिणयनमित्युक्तं भवति । अत एव विष्णुः—

द्विजस्य भार्या शूद्रा तु धर्मार्थं न भवेत्क्वचित् ।
रत्यर्थमेव सा तस्य रागान्धस्य प्रकीर्तिता ॥

इति । सा धर्मार्थं न भवेत् धर्मकार्येषु नानुप्रविशेदित्यर्थः । अत एव मनुः—

दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु ।
नाश्नन्ति पितृदेवास्तं न च स्वर्गं स गच्छति ॥

तत्प्रधानानि तदायत्तानीत्यर्थः । यत्तु तेनैवोक्तं—

न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः ।
कस्मिंश्चिदपि वृत्तान्ते शूद्रभार्योपदिश्यते ॥

---

[1] पूर्वैव—ख.

इति, तदग्रत एव शूद्रापरिणयनविषयं,

‘ इमास्स्युः क्रमशोऽवराः ’

इति तेनैव क्रमविधानात् । उक्तं च याज्ञवल्क्येन--

‘ तिस्रो वर्णानुपूर्व्येण ’

इति । आपद्यपि तिष्ठतोस्सवर्णामलभमानयोरपीत्यर्थः । एतच्चानयोरत्यन्तनिषेधार्थं, न पुनर्वैश्यस्य प्राप्त्यर्थम् । यतस्स एवाह–

हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः ।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥

इति । पैठीनसिस्तु सवर्णालाभे क्षत्रियादिविवाहमाह--

‘ अलाभे कन्यकायास्स्नातकव्रतं चरेदपि वा क्षत्रियायां पुत्रानुत्पादयेत् वैश्यायां शूद्रायां वेत्यन्ये ’

इति । यदपि च याज्ञवल्क्येनोक्तं—

यदुच्यते द्विजातीनां शूद्राद्दारोपसङ्ग्रहः ।
न तन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥

इति, तदपि मानवेन समानार्थम् । न चैवं सति

‘ तत्रात्मा जायते स्वयम् ’

इति हेतुत्वेनानुगुणमिति वाच्यं, तेनापि

‘ तिस्रो वर्णानुपूर्व्येण ’

इति शूद्रापरिणयनस्योक्तत्वात् । किं च हेतुत्वानुसारेण कदाचिदपि शूद्राविवाहानङ्गीकारे क्षत्रियादिविवाहोऽपि न स्यात्,

तत्राप्यात्मन एवोत्पत्तिः । अतो नायं हेतुः किं त्वयमर्थवादः इति मन्तव्यम् । यत्पुनर्यमेनोक्तं—

ब्राह्मणो वृषलीं गत्वा त्र्यहं भवति सूतकी ।
अथास्यां गर्भमाधत्ते ब्राह्मण्यादेव हीयते ॥

इति ; यदपि मनुना—

शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् ।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते ॥

इति, तेनापि व्युत्क्रमेणोद्वाहकर्म गमनं तस्यामेव सुतोत्पत्तिर्निषिध्यते ; न पुनस्तत्र सुतोत्पत्तिमात्रम् । तथात्वे तु,

'चतुस्त्रिद्व्येकभागिनो वर्णतो ब्राह्मणात्मजाः'

इति विभागवचनं न स्यात् । अत एव मनुरपि केवलशूद्रापत्यतया दोषमाह—

शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः ।
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणाम् ।
कुलान्याशु विनश्यन्ति[1] यानि हीनानि मन्त्रतः ॥

इति । गोभिरश्वैर्विक्रीयमाणैरित्यर्थः । तथा मतान्तराण्यपि स एवाह—

शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च ।
शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः ॥

---

[1] कुलान्यकुलतां यान्ति—क & ग.

अस्यार्थः—शूद्रावेदी विप्रः पतति। अत्रात्रेरुतथ्यतनयस्य गौतमस्य च मतमुक्तम्। अतस्तयोर्मते शूद्राविवाहो नास्ति। शौनकस्य न विवाहमात्रात्पातित्यं, किं तु सुतोत्पत्त्या। अतस्तस्य मते शूद्रामृतौ नोपेयात्। भृगोस्तु न तत्र सुतोत्पत्त्याऽपि पतनं, किं तु तदपत्यतया तान्येव शूद्रायामुत्पन्नान्येव अपत्यानि यस्यासौ तदपत्यः; तस्य भावस्तदपत्यता; तयेत्यर्थः। अतस्तस्य मते ब्राह्मण्यामप्रसूतायां शूद्रामृतौ नोपेयादिति। तथा वसिष्ठोऽपि शूद्रापरिणयननिषेधमाह—

'शूद्रामप्येके मन्त्रवर्जम्। तदु तथा न कुर्यात्। अंहोभिर्ध्रुवः कुलापकर्षः प्रत्युतास्वर्ग्यः'

इति। इति स्मृतिचन्द्रिकायां कन्यालक्षणानि.

वरलक्षणानि.

अथ वरलक्षणानि। तत्र गौतमः—

'विद्याचारित्रबन्धुशीलसम्पन्नाय दद्यात्'

इति। विद्या वेदः श्रुतं च। चारित्रमनुष्ठानम्। बन्धुः प्रशस्ताभिजनः। शीलं वृत्तम्। एतैस्सम्पन्नाय कन्यां दद्यादित्यर्थः। आपस्तम्बोऽपि—

'बन्धुलक्षणशीलसम्पन्नश्श्रुतवानरोग इति वरसम्पत्'

इति। यमोऽपि—

कुलं च शीलं च वपुर्वयश्च
विद्यां च वित्तं च सनाथतां च ।
एतान्गुणान्सप्त परीक्ष्य देया
कन्या बुधैश्शेषमचिन्तनीयम् ॥

इति । यत्तु विष्णुनोक्तम्—

ब्राह्मणस्य कुलं ग्राह्यं न वेदा न पदक्रमाः ।
कन्यादाने तथा श्राद्धे न विद्या तत्र कारणम् ॥

इति, तत्कुलस्य प्राधान्यप्रतिपादनपरम् । न पुनर्विद्यानिराकरणार्थम् । अत एवाश्वलायनः—

'कुलमग्रे परीक्षेत'

इति । तथा पुंस्त्वमपि परीक्षणीयं तस्येत्याह याज्ञवल्क्यः—

यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः ।

कात्यायनोऽपि—

अपत्यार्थं स्त्रियस्सृष्टास्स्त्री क्षेत्रं बीजिनो नराः ।
क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति ॥

इति । अतस्तत्परीक्षणीयमिति भावः । नारदस्तु तत्परीक्षोपायमाह—

यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलम् ।
पुमान् स्याल्लक्षणैरेतैर्विपरीतस्तु पण्डकः ॥

इति । बीजं वीर्यम् । ह्रादि शब्दवत् । याज्ञवल्क्योऽपि—

ह्रादिफेनिलमूत्रस्तु गुरुशुक्रो वृषस्वनः ।
पुमान्स्यादन्यथा षण्डो दुश्चिकित्सो मुखेभगः ॥

मुखेभगष्षण्डविशेषः । शातातपोऽपि वरलक्षणान्याह—

वरो वरयितव्योऽर्थी कुलशीलसमन्वितः ।
रूपवान्पण्डितः प्राज्ञो युवा दोषविवर्जितः ॥

इति । वरयितव्यः कन्यापित्रेति शेषः । दोषा अपि कात्यायनेनोक्ताः—

उन्मत्तः पतितः कुष्ठी तथा षण्डस्सगोत्रजः ।
चक्षुश्श्रोत्रविहीनश्च तथाऽपस्मारदूषितः ॥
वरदोषास्स्मृता ह्येते कन्यादोषाश्च कीर्तिताः ।
दूरस्थानामविद्यानां मोक्षमार्गानुसारिणाम् ॥
शूराणां निर्धनानां च न देया कन्यका बुधैः ।

इति । इति स्मृतिचन्द्रिकायां वरलक्षणानि.

कन्यादानकालाः

अथ कन्यादानकालाः । तत्र संवर्तः—

अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत् ।
दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृता ॥

वृषली रजस्वला ।

वन्ध्या तु वृषली ज्ञेया वृषली च मृतप्रजा ।
अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥

इति देवलस्मरणात्। एतच्च प्रायिकाभिप्रायं, न पुनर्द्वादश एव रजस्वला भवतीति, कासां चिदर्वागपि रजोदर्शनसम्भवात्। अत एव यमः—

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥

यत्पुनरापस्तम्बेनोक्तं—

अष्टवर्षा भवेद्गौरी दशवर्षा तु कन्यका।
प्राप्ते तु द्वादशे वर्षे रजस्त्रीणां प्रवर्तते॥

इति, यदपि यमेनोक्तं—

संप्राप्ते द्वादशे वर्षे रजस्त्रीणां प्रवर्तते।

इति, यदपि यमेन—

सम्प्राप्ते द्वादशे वर्षे यः कन्यां न प्रयच्छति।
मासि मासि रजस्तस्याः पिता पिबति शोणितम्॥

इति, तदपि प्रायिकाभिप्रायं, कासां चित्तत्रापि रजोदर्शनासम्भवात्। अत एव मनुः—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥

इति। सत्वरोऽल्पवया इत्यर्थः। एवं च यावद्रजोदर्शनं न भवति तावत्कन्योद्वाहो न विरुद्ध इत्युक्तं भवति। अत एव यमः—

तावदुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्।

इति। गौतमोऽपि—

'प्रदानं प्रागृतोरप्रयच्छन्दोषी प्राग्वासःप्रतिपत्ते-
रित्येके'

इति। संवर्तोऽपि—

रोमकाले तु सम्प्राप्ते सोमो भुङ्क्ते तु कन्यकाम्।
रजःकाले[1] तु गन्धर्वो वह्निस्तु कुचदर्शने[2]॥
तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्॥

इति। वसिष्ठोऽपि—

प्रयच्छेन्नग्निकां कन्यामृतुकालभयात्पिता।
ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति॥

इति। नग्निका च पुराणे दर्शिता—

यावन्न लज्जयाऽङ्गानि कन्या पुरुषसन्निधौ।
योन्यादीन्यवगूहेत तावद्भवति नग्निका।

इति। सङ्ग्रहकारोऽपि—

यावच्चेलं न गृह्णाति यावत्क्रीडति पांसुभिः।
यावद्दोषं न जानाति तावद्भवति नग्निका॥

अमरस्तु यावदृतुदर्शनं नग्निकेत्याह—

'नग्निकाऽनागतार्तवा'

इति। तथा वरस्यापि परिणयनकालमाह मनुः—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥

इति। बृहस्पतिरपि—

---

[1] रजो दृष्ट्वा; [2] कुचौ दृष्ट्वा तु पावकीः—वैद्य.

त्रिंशद्वर्षो दशाब्दां तु भार्यां विन्देत नग्निकाम् ।
एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् ॥

विष्णुपुराणेऽपि—

वर्षैरेकगुणैर्भार्यामुद्वहेत्त्रिगुणस्स्वयम् ।

इति । इति स्मृतिचन्द्रिकायां कन्यादानकालाः.

कन्यादानफलम्.

अथ कन्यादानफलम् । यस्तूक्तविधिना कन्यां प्रयच्छति तस्य फलमाह मनुः—

नाग्निहोत्रादिभिस्तत्स्यादक्षयं ब्राह्मणस्य वा ।
यत्कन्यां विधिवद्दत्त्वा फलमाप्नोति मानवः ॥

मरीचिरपि—

नाग्निचिन्नरकं याति न कन्यादो न तत्सुत ।
विश्वजित्सम्मितो यज्ञः कन्यादानं महाफलम् ॥

संवर्तोऽपि—

ज्योतिष्टोमातिरात्राणां शतं शतगुणीकृतम् ।
प्राप्नोति कन्यकां दत्त्वा होममन्त्रैश्च संस्कृताम् ॥

बृहस्पतिरपि—

सहस्रसम्मिता धेनुरनड्वान्दश धेनवः ।
दशानडुत्समं यानं दशयानसमो हयः ॥
दशवाजिसमा कन्या भूमिदानं च तत्समम् ।
कनकाश्वतिला नागा दासीरथमहीगृहाः ।

कन्या च कपिला धेनुर्महादानानि वै दश ॥

यमोऽपि—

दशानां तु सहस्राणां यज्ञानां धुर्यवाहिनाम् ।
सुपात्रे विनियुक्तानां कन्या विद्या च तत्समम् ॥
गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत् ।
कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलाम् ॥

इति । तथा रजस्वलापरिणेतुरपि स एव दोषमाह—

माता चैव पिता चैव ज्येष्ठभ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥
यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः ।
असम्भाष्यो ह्यपाङ्क्तेयस्स विप्रो वृषलीपतिः ॥
वृषलीसङ्गृहीता यो ब्राह्मणो मदमोहितः ।
सततं सूतकं तस्य ब्रह्महत्या दिने दिने ॥

इति । यः पुनस्तामुपभुङ्क्ते तस्यापि स एव दोषमाह—

यः करोत्येकरात्रेण वृषलीसेवनं द्विजः ।
स भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥
वृषलीगमनं चैव मासमेकं निरन्तरम् ।
इह जन्मनि शूद्रत्वं मृतश्श्वा चैव जायते ॥
वृषलीफेनपीतस्य निश्वासोपहतस्य च ।
तस्यां चैव प्रसूतस्य निष्कृतिर्नैव विद्यते ॥

यदा तु कन्यैव रजस्वला भवति तदा तत्पितुर्भ्रूणहत्यामाह बृहस्पतिः—

पितुर्गृहे तु या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्यास्सा कन्या वृषली स्मृता ॥

भ्रूणहत्या गर्भहत्या । सा च प्रत्यृतु वेदितव्या । तथा च याज्ञवल्क्यः—

अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ ।

नारदोऽपि—

यावन्तश्चर्तवस्तस्यास्समतीयुः पतिं विना ।
तावत्यो भ्रूणहत्यास्स्युस्तस्य यो न ददाति ताम् ॥

यत्पुनर्मनुनोक्तं—

काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ।
न त्वेवैनां प्रयच्छेत गुणहीनाय कर्हि चित् ॥

इति, तद्गुणवति सम्भवति गुणहीनाय न दद्यादित्येवम्परं, न पुनर्गुणहीननिषेधार्थम् । यत आह बोधायनः—

दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे ।
अपि वा गुणहीनाय नोपरोद्ध्या रजस्वला ॥

यमोऽपि—

दद्याद्गुणवते कन्यां नग्निकामेव शक्तितः ।
न त्वेव गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

इति । यदा तु तामपि न प्रयच्छति तदा कन्यैव स्वसदृशं भर्तारं वरयेत् । तदाह यमः—

कन्या तु द्वादशे वर्षे याऽप्रदत्ता गृहे वसेत् ।
भ्रूणहत्या पितुस्तस्यास्सा कन्या वरयेत्स्वयम् ॥
एतच्च वरणमृतुप्रभृति वर्षत्रयादूर्ध्वं वेदितव्यम् ।

तथा च बोधायनः—

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ।
ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ॥
अविद्यमाने सदृशे गुणहीनमपि श्रयेत् ।

सदृशो गुणवान् । मनुरपि—

त्रीणि वर्षाण्युपासीत कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥
अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम् ।
नैनः किं चिदवाप्नोति न च यं साऽधिगच्छति ॥

यं भर्तारमधिगच्छति सोऽपि न दोषमाप्नोतीत्यर्थः । यत्तु विष्णुनोक्तं—

ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरम् ।

इति, तदृतुत्रयादर्वाङ्निषेधपरम् । अत्र मनुः—

अलङ्कारं नाददीत पित्र्यं कन्या स्वयंवरा ।
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत् ॥

यस्तु वाचा कन्यां प्रदाय पुनस्तामपहरति स राज्ञा दण्ड्य इत्याह याज्ञवल्क्यः—

सकृत्प्रदीयते कन्या हरंस्तां चोरदण्डभाक् ।

मनुरपि—

सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥

सकृदंशो निपतति सकृदेव पित्रादिभिर्भागं लभत इत्यर्थः । एतच्चादुष्टवराभिप्रायम् । यदाह नारदः—

दत्वा न्यायेन यः कन्यां वराय न ददाति ताम् ।
अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चोरवत् ॥

अनेन दोषदर्शनेन वाग्दत्तामपि न पूर्वस्मै दद्यादित्युक्तं भवति । अत एव गौतमः—

'प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्'

इति । अनेनैवाभिप्रायेण याज्ञवल्क्योऽपि—

दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेत् ।

इति । यत्तु मनुनोक्तं—

एतत्तु न परे चक्रुर्नापरे चापि साधवः ।
यदन्यस्याभ्यनुज्ञाय पुनरन्यस्य दीयते ॥

इति, तदप्यदुष्टवराभिप्रायम् । अत एव नारदः—

स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते ।
वरणाद्ग्रहणं पाणेस्संस्कारो हि विलक्षणः [1]
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात् ।

---

[1] णेस्संस्करेणाविलक्षणम्—ख ; णेस्संस्कारो विलक्षणः—क. णेस्सम्बन्धोऽयं त्रिलक्षणः ; णेस्संस्कारो ह्यग्निलक्षण.:—मदन.

तयोर्वरणपाणिग्रहणयोर्मध्ये वरणमेव दोषदर्शनादनियतं, न पाणिग्रहणम्। तयोर्वाग्दानमात्रेण[1] पतित्वानुपपत्तेरिति भावः। अत एव यमः—

नोदकेन न वाचा वा कन्यायाः पतिरुच्यते।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे॥

अनेन सप्तमपदादर्वाक्परिणेतुः मरणेऽपि न विधवात्वमित्युक्तं भवति। तथा च वसिष्ठः—

अद्भिर्वाचा च या दत्ता म्रियेतादौ वरो यदि।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा॥

पितुरेव न प्रतिग्रहीतुरित्यर्थः। कात्यायनोऽपि—

वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा।
रक्तागमांस्त्रीनतीत्य कन्याऽन्यं वरयेद्वरम्॥

रक्तागमो रजोदर्शनम्। एवं देशान्तरगतेऽपि द्रष्टव्यम्। यदाह नारदः—

प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत्।
त्रीनृतून्समतिक्रम्य कन्याऽन्यं वरयेद्वरम्॥

मनुस्तु शुल्कदाने विशेषमाह—

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते॥

---

[1] तस्मादर्वाक्· —मदन.

इति। एवं च वाग्दानप्रभृत्या सप्तमपदादोषदर्शने मरणादौ वा कन्यामन्यस्मै दद्यात्, नोर्ध्वमित्युक्तं भवति। अत एव कात्यायनः—

अनेकेभ्यो हि दत्तायामनूढायां तु यत्र वै।
वरागमश्च सर्वेषां लभेतादिवरस्तु ताम्॥
अथागच्छेयुरूढायां न तां पूर्ववरो हरेत्।

पूर्ववरस्स्वदत्तं शुल्कमेव हरेन्न कन्यामित्यर्थः। मनुरपि—

न दत्वा कस्य चित्कन्यां पुनर्दद्यात् विचक्षणः।
दत्वा पुनः प्रयच्छेद्यः प्राप्नोति पुरुषानृतम्॥

तदपि तेनैवोक्तं—

पञ्च पश्वनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥

पञ्च बान्धवानित्यर्थः, तेषामेव प्रकृतत्वात्। वसिष्ठस्तु पाणिग्रहणादुपर्यप्यन्यस्मै दानमाह—

पाणिग्रहे कृते कन्या केवलं मन्त्रसंस्कृता।
सा चेदक्षतयोनिस्स्यात्पुनस्संस्कारमर्हति॥

नारदोऽपि—

उद्वाहिताऽपि या कन्या न चेत्सम्प्राप्तमैथुना।
पुनस्संस्कारमर्हेत यथा कन्या तथैव सा॥

एतदपि दोषदर्शने वेदितव्यम्। अत एव यमः—

वरश्चेत्कुलशीलाभ्यां न युज्येत कथं चन ।
न मन्त्रः कारणं तत्र न च कन्यानृतं भवेत् ॥
समाकृष्य तु तां कन्यां बलादक्षतयोनिकाम् ।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत् ॥

कात्यायनोऽपि—

स तु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मा वा सगोत्रो वा दासो दीर्घामयोऽपि वा ॥
ऊढाऽपि देया साऽन्यस्मै सप्रावरणभूषणा ।

मनुरपि—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

एवं च यानि संस्कारादूर्ध्वमक्षतयोन्याः पुनरुद्वाहपराणि तानि युगान्तराभिप्रायाणीति मन्तव्यम् । अत एवादिपुराणे—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥

स्मृत्यन्तरेऽपि—

देवराच्च सुतोत्पत्तिं गोमेधं च कमण्डलुम् ।
अक्षतां पौरुषं मेधं कलौ पञ्च विवर्जयेत् ॥

मनुस्तु दोषदर्शने कन्याया अपि परित्यागमाह—

विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् ।
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥

विविधं प्रकर्षेण दुष्टां विप्रदुष्टाम् । नारदोऽपि—

नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम् ।
दोषे सति न दोषस्स्यादन्योन्यं त्यजतोर्द्वयोः ॥

एतदपि सप्तपदादर्वाग्वेदितव्यं, तत्रैव भार्यात्वस्योपपत्तेः[1] । अत एव मनुः—

पाणिग्रहणिका मन्त्रा [2] नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिस्सप्तमे पदे ॥

यस्तु कन्यादोषमनभिधाय प्रयच्छति स राज्ञा दण्ड्य इत्याह नारदः—

यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्यान्नृपो दण्डं पूर्वसाहसचोदितम् ॥

पणशतद्वयं सप्तत्यधिकं पूर्वसाहसम् । यत्तु याज्ञवल्क्येनोक्तं—

अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम् ।

इति, तद्दोषभूयस्त्वाभिप्रायम् । साशीतिपणसाहस्रमुत्तमसाहसम् । यः पुनरदुष्टामेव परित्यजति सोऽपि दण्ड्य इत्याह नारदः—

प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेन्नरः ।
विनेयस्सोऽप्यकामोऽपि कन्यां तामेव चोद्वहेत् ॥

विनेयो दण्ड्य इत्यर्थः । दण्डमपि स एवाह—

अदुष्टां प्रतिगृह्याथ त्यजन्नुत्तमसाहसम् ।

---

[1] स्योत्पत्तेः—क. [2] पाणिग्रहणमन्त्रास्तु—ग.

इति । कन्यादोषा अपि तेनैवोक्ताः—

दीर्घकुत्सितरोगार्ता व्यङ्गा संस्पृष्टमैथुना ।
धृष्टाऽन्यगतभावा च कन्यादोषाः प्रकीर्तिताः ॥

इति स्मृतिचन्द्रिकायां कन्यादानफलानि.

कन्यादातृनिर्णयः.

अथ कन्यादातृनिर्णयः । तत्र याज्ञवल्क्यः—

पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥

प्रकृतिस्थ उन्मादादिदोषरहितः । अप्रकृतिस्थत्वे तु पित्रादिनाऽपि कृतमकृतमेव । यदाह नारदः—

स्वतन्त्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः ।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य [1] हेतुतः ॥

यत्पुनर्मनुनोक्तं—

यस्मै दद्यात्पिताऽप्येनां भ्राता चानुमतौ पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितं [2] च न लङ्घयेत् ॥

इति । तत्तयोः प्राधान्यप्रतिपादनार्थं न पुनरन्यनिषेधाय । अत एव नारदः—

पिता दद्यात्स्वयं कन्यां भ्राता वाऽनुमतौ पितुः ।
मातामहो मातुलश्च स कुल्यो बान्धवस्तथा ॥

---

[1] स्वतन्त्रत्वहे—वैद्य. [2] स्वर्यात—ग.

मातात्वभावे सर्वेषां प्रकृतौ यदि वर्तते ।
तस्यामप्रकृतिस्थायां दद्युः कन्यां स्वजातयः[1] ॥

इति । यदा तु सर्वेषामभावस्तदा राजा दद्यात् । तदाह स एव—

यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् ।

यदाऽसावपि क्षितिपालनाद्याकुलतया न ददाति तदा कन्यैव तदनुज्ञया स्वसदृशं भर्तारं वरयेत् । तदपि तेनैवोक्तं—

अनुज्ञया वरं तस्य प्रतीत्य[2] वरययेत्स्वयम् ।

याज्ञवल्क्योऽपि—

गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम् ।

गम्यं गमनार्हमित्यर्थः । तथा च वरयेदित्यनुवृत्तौ नारदः—

सवर्णमनुरूपं च कुलशीलवहु[3]श्रुतैः ।
सहधर्मं चरेत्तेन पुत्रांश्चोत्पादयेत्ततः ॥

इति । इति स्मृतिचन्द्रिकायां कन्यादातृनिर्णयः

विधवानियोजनम्

अथ विधवानियोजनम् । तत्र मनुः—

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये ॥

स्त्रिया श्वशुरादिभिर्नियुक्तया देवराद्भर्तुर्ज्येष्ठात्कनिष्ठाद्वा तदभावे

---

[1] सजातयः—वैद्य. [2] प्रतीतं—वैद्य. [3] बल – क.

सपिण्डाद्वाऽभिलषिता प्रजा पुंस्त्वलक्षणा तयोत्पादनीयेत्यर्थः। याज्ञवल्क्योऽपि—

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्॥

पुत्रकाम्यया तस्या इति शेषः, अन्यथा नियोगनिषेधात्। तथा च यमः—

नाकामा सन्नियोज्या स्यात्पुत्रकामां नियोजयेत्।

इति। न चापुत्रायास्स्वर्गाद्यभावेन पुत्रकामनया भवितव्यमिति शङ्कनीयम्—

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्म[1]चारिणः॥

इति स्मरणात्। पुत्रोऽप्येक एवोत्पादनीयो न द्वितीयः। तदाह मनुः—

विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथं चन॥

केचिदेकपुत्रोऽप्यपुत्रसम एवेति नियोगार्थानिष्पत्तिं मन्यमानाः पुत्रान्तरोत्पत्तिं मन्यन्ते। तदपि तेनैवोक्तम्—

द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः।
अनिर्वृतं नियोगार्थं पश्यन्तो धर्मतस्तयोः॥

अत्र गमनविधिमाह यमः—

[1] यथावद्ब्रह्म.—क.

ऋतौ तु तस्यां स्नातायां वाग्यतोऽस्तमिते निशि ।
न स्पृशन्नखरोमाणि गन्धस्पर्शाविवेदयन् ॥
एक एव घृताक्ताङ्गो दुर्गन्धश्शोकदुर्मनाः ।
मुखान्मुखं परिहरन्गात्रैर्गात्राण्यसंस्पृशन् ॥
यतात्मा गर्भमादध्याद्गर्भे दत्ते त्वपव्रजेत् ।

अपव्रजेत्पुनर्न गच्छेदित्यर्थः । अत एव याज्ञवल्क्यः—

आ गर्भसम्भवाद्गच्छेत्पतितस्त्वन्यथा भवेत् ।
अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः ॥

अस्य पूर्वपरिणेतुरित्यर्थः । यत्पुनर्मनुनोक्तं—

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन्विनियुञ्जाना धर्मं हन्युस्सनातनम् ॥

इति, यदपि स्मृत्यन्तरे—

न द्वितीयश्च साध्वीनां क्वचिद्भर्तापि[1] दिश्यते ।

इति, तत्कलौ निषेधपरमित्यविरोधः । अत एव क्रतुः—

देवरान्न सुतोत्पत्तिर्दत्ता कन्या न दीयते ।
न यज्ञो गोवधः कार्यः कलौ न च कमण्डलुः ॥

बोधायनोऽपि—

विधिर्योऽनुष्ठितः पूर्वं क्रियते नेह साम्प्रतम् ।
पुराकल्पस्स यद्गच्च विधवाया नियोजनम् ॥

इति । इति स्मृतिचन्द्रिकायां विधवानियोजनम्.

---

[1] द्वर्भोऽप—क. ग.

विवाहभेदाः

अथ विवाहभेदाः । तत्र मनुः—

अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत ।
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः ॥
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥

इति । तत्र याज्ञवल्क्यः—

ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता ।

यस्मिन्नुक्तलक्षणं वरं स्वगृहमानीय तस्मै यथाशक्त्यलङ्कृता कन्या दीयते स ब्राह्मो विवाह इत्यर्थः । मनुरपि—

आच्छाद्य चार्हयित्वा च श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥

अर्हयित्वा अलङ्कारादिभिः पूजयित्वेत्यर्थः । अस्यां जातस्तु दश पित्रादीन्दश पुत्रादींश्चात्मानं पापान्मोचयति । तथा च गौतमः—

‘दश पूर्वान्दशापरानात्मानं च ब्राह्मीपुत्रः पुनाति’

इति । स यदि सद्वृत्त इति शेषः । तथा च मनुः—

दश पूर्वापरान्वर्गानात्मानं चैकविंशकम् ।
ब्राह्मीपुत्रस्सुकृतकृन्मोचयत्येनसः पितॄन् ॥

गौतमोऽपि—

‘पुनन्ति साधवः पुत्राः’

इति । दैवार्षयोरपि लक्षणमाह याज्ञवल्क्यः—

यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयम् ॥

यज्ञे प्रारब्धे यस्मिन्नलङ्कृत्य ऋत्विजे कन्या दीयते स दैवो विवाहः । तथा च मनुः—

यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते ।
अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते ॥

यत्र पुनर्गोद्वयमादाय कन्या दीयते स आर्षो विवाहः । गोद्वयग्रहणं प्रदर्शनार्थम् । अत एव मनुः—

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ।
कन्याप्रदानं विधिवदार्षो धर्मस्स उच्यते ॥

मिथुनं वृषभो धेनुश्च । अनयोः फलमाह याज्ञवल्क्यः—

चतुर्दश प्रथमजः पुनात्युत्तरजष्षट् ।

प्रथमजो दैवोत्पन्नस्सप्तपूर्वान् सप्तापरान्पुनातीति । उत्तरज आर्षोत्पन्नः । स पुनस्त्रींस्त्रीन् । तथा च मनुः—

दैवोढजस्सुतश्चैव सप्त सप्त परावरान् ।
आर्षोढजस्सुतस्त्रींस्त्रीन् षट् षट्कायोढजस्सुतः ॥

कायः प्राजापत्यः । तत्स्वरूपमपि स एवाह—

सहोभौ चरतां धर्ममिति वाचाऽनुभाष्य तु ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिस्स्मृतः ॥

इति । तथाऽऽसुरादिचतुष्टयमाह याज्ञवल्क्यः—

आसुरो द्रविणादानाद्गान्धर्वस्समयान्मिथः ।
राक्षसो युद्धहरणात्पैशाचः कन्यकाच्छलात् ॥

वराद्द्रविणमादाय यत्पित्रादिभिर्दानरहितं कन्यार्पणं स आसुरो विवाहः । तथा च मनुः—

ज्ञातये द्रविणं दत्वा कन्यायै चैव शक्तितः ।
कन्याऽऽप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥

आप्रदानमादानं स्वीकारः । स्वाच्छन्द्यात् स्वेच्छात इत्यर्थः । गान्धर्वस्तु कन्यावरयोरिच्छयाऽन्योन्यसंयोगः । तथा च मनुः—

इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वस्स तु विज्ञेयो मैथुन्यः कामसम्भवः ॥

मैथुन्यो मैथुनाय हित इत्यर्थः । राक्षसस्तु युद्धेन कन्याहरणम् । तथा च मनुः—

हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात् ।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥

प्रसह्य वलात्कारेणेत्यर्थः । पैशाचः पुनः कन्यकाछलाद्भवति । छलनं छलः । छद्मना स्वापाद्यवस्थासु कन्याहरणं पैशाच इत्यर्थः । तथा च शौनकः—

'सुप्तानां प्रमत्तानां वाऽपहारे पैशाचः'

इति । तेष्वासुरादिषु सन्ततिदोषानाह मनुः—

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः।
ब्रह्मवर्चसिनः पुत्रा जायन्ते शिष्टसम्मताः ॥
रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥
इतरेषु तु शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषस्सुताः ॥

नृशंसो हिंस्रः। ब्रह्मद्विषो वेदद्विषः। न चासुरादिविवाहेषु सप्तपदातिक्रमणाद्यभावेन पतित्वभार्यात्वयोरनुपपत्तिरिति शङ्कनीयं, तत्रापि स्वीकारानन्तरमेव संस्कारविधानात्। तथा च देवलः—

गान्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः।
कर्तव्यश्च त्रिभिर्वर्णैस्समयेनाग्निसाक्षिकः ॥

गृह्यपरिशिष्टेऽपि—

गान्धर्वासुरपैशाचविवाहा राक्षसश्च यः।
पूर्वं परिश्रय[1]स्तेषां पश्चाद्धोमो विधीयते ॥

परिश्रय[1]स्स्वीकारः। अत एव वसिष्ठोऽपि न बलादपहारमात्रेण भार्यात्वमाह—

बलाच्चेत्प्रहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥

अत्र वर्णव्यवस्थया विवाहानियममाह मनुः—

---

[1] परिणय—ख.

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽपरान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥

ब्राह्मादीन्गान्धर्वान्तान्ब्राह्मणस्य धर्म्यान् धर्मादनपेतान् विजानीयात् । अपरानासुरादीन्पैशाचान्तान्क्षत्रियस्य । वैश्यशूद्रयोरपि तानेव राक्षसवर्जितान् । एतेष्वपि प्रशस्तानाह स एव—

चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः ।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥

स्मृत्यन्तरेऽपि—

चत्वारो ब्राह्मणस्याद्याश्शस्ता गान्धर्वराक्षसौ ।
राज्ञस्तथाऽऽसुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः ॥

गर्हितो न कस्यापि प्रशस्त इत्यर्थः । अत एव यमः—

अपकृष्टो विवाहानां पैशाचः कथितोऽष्टमः ।

इति । अत एवान्यविवाहालाभ एव पैशाचमाह व्यासः[1]—

सर्वोपायैरसाध्या स्यात् सुकन्या पुरुषस्य या ।
चौर्येणापि विवाहेन सा विवाह्या रहस्स्थिता ॥

इति । केचिदार्षमपि प्रशस्तं नेच्छन्ति, तत्रापि शुल्कग्रहणात् । तथा च मनुः—

आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ।
अल्पोऽपि वा महान्वाऽपि विक्रयस्तावदेव सः ॥

---

[1] वत्सः—वैद्य.

इति । मृषा मिथ्या । नैतद्धर्माय, यतस्तावन्मात्रेणाप्यसौ विक्रय इत्यर्थः । देवलस्तु न गोमिथुनं शुल्कमित्याह—

एवं[1] विवाहाश्चत्वारो धर्म्याश्श्रेयःप्रदायकाः[2] ।
अशुल्का ब्राह्मणाद्यर्हास्ततो यान्ति द्वयोः कुलम्[3] ॥

इति । एवं च ब्राह्मणस्य आसुरगान्धर्वौ प्रशस्तविवाहालाभे वेदितव्यौ । एवं क्षत्रियादेरपि द्रष्टव्यम् । यत्तु काश्यपेनोक्तं—

क्रीता द्रव्येण या नारी न सा पत्न्यभिधीयते ।
न सा दैवे न पित्र्ये च दासीं तां कश्यपोऽब्रवीत् ॥

इति, तत्प्रशस्तविवाहसम्भवविषयम् । यदप्यत्र प्रशस्तविवाहाभिप्रायेण मनुनोक्तं—

दुर्विवाहैः क्रियालोपैः वेदानध्ययनेन च ।
कुलान्यकुलतां यान्ति ब्राह्मण्यातिक्रमेण च[4] ॥

इति, तदपि पूर्वोक्तेन समानविषयम् । तथा शुल्कादानेऽपि स एव दोषमाह—

न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि ।
गृह्णञ्छुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी ॥
नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु ।
शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयम् ॥

---

[1] पूर्वं ; [2] स्तोयप्रधानिकाः ; [3] ब्राह्मणार्हाश्च तारयन्ति कुलद्वयम्—वैद्य.
[4] नैष श्लोको मुद्रितायां मनुस्मृतौ.

यमोऽपि—

> यो मनुष्यो मनुष्यस्य विक्रयाद्धनमिच्छति ।
> तस्य मूत्रं पुरीषं च स परत्रोपजीवति ॥
> कन्याविक्रयिणो मूर्खा इह किल्बिषकारिणः ।
> पतन्ति नरके घोरे दहत्या सप्तमं कुलम् ॥

इति । एतदात्मार्थं धनग्रहणे वेदितव्यम् । कन्यार्थे तु न दोष इत्याह मनुः—

> यासां नाददते शुल्कं ज्ञातयो न स विक्रयः ।
> अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ॥

इति । यच्छुल्कं कन्यार्थं तत्कुमारीणां केवलमर्हणं पूजनमित्यर्थः। आनृशंस्यमपापित्वम् । अत्र यज्ञपार्श्वः—

> विवाहे वितते तन्त्रे होमकाल उपस्थिते ।
> कन्याया ऋतुरागच्छेत्कथं कुर्वन्ति याज्ञिकाः ॥
> स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि ।
> युञ्जान आहुतिं हुत्वा ततस्तन्त्रं प्रवर्तयेत् ॥

इति श्रीसकलविद्याविशारदकेशवादित्यभट्टोपाध्यायसूनुयाज्ञिकदेवणभट्टोपाध्यायविरचितायां स्मृतिचन्द्रिकायां विवाहप्रकरणम्.

समाप्तस्संस्कारकाण्डः.